जयद्रथयामलम्

प्रथम षट्कम्

ॐ

Jayadratha yamalam - part 1;{Patala-51;Slokas-5467}
Edited by- M. Sampath kumar;[Ahmedabad]
30-March-2011

under supervision of - Mark.Dyczkowski.

Two Manuscripts are concidered for this correction.One is K and second is Kh, these are simbled as like this,क - ख doubtful and ambiguity words are kept as it is.

प्रथमः पटलः

।ओं नमः शिवादिभ्यो गुरुभ्यः ॥

श्रीश्रीपरमशिवशक्तिश्रीश्रीनाथ अशेष पारंपर्यक्रमं स्वगुरुपादाम्बुजं यावत् प्रणौम्मि ।

आक्रान्ता चन्द्रलेखाकर हततमसा सज्जटामण्डलेन
मन्त्रग्रासोग्रसर्गग्रथितगुणगणा गोर्विशालालिकाला ।
वान्तभ्रान्तप्रशान्तप्रभृतिगुणगणा वाम वामेति वामा
वामा वामेति वामं वितरतु विविधं सिद्धयोगेश्वरी वः ॥ १ ॥

चन्द्रबिम्बप्रतीकाशे हेमपाषाणमण्डिते ।
स्रवन्निर्झरिणीभोग च्छिन्नटङ्कसमाकुले ॥ २ ॥
विटङ्कोदग्रशृङ्गाग्रदेवयानावलम्बिनि ।
क्रीडा प्रभातिदिव्याद्रिपुरंध्रीणां समन्ततः ॥ ३ ॥

Sampath_eBooks

सालक्तकपद्राक्रान्तशिलानद्धनितम्बिनि ।

प्लवनावेगसंचिन्नपतत्प्रालेयसानुनि ॥ ४ ॥

पातालतरुसालाभा गंभीराम्बुधिवाहिनी ।

जाह्नवीविमलाम्भोभिर्द्धौनकर्षमकल्मषे ॥ ५ ॥

मुनीन्द्रजीर्णविच्छिन्नमौञ्जीरज्जुसमाकुले ।

क्वचित् कृष्णाजिनानन्तलम्बितानेकभूभृतिश्रा ६ ॥

क्वचित् कौशेयवासोभियोगिभिः समलङ्कृते ।

क्वचिज्जर्जरविक्षिप्तकमण्डलुगणावृते ॥ ७ ॥

क्वचित् समिद्धतपसां कन्थाकौपीनचिह्निते ।

क्वचित्सदा पुष्पितवृक्षविस्तृतैर्लतावितानैःस्थगिते समन्ततः ॥ ८ ॥

तमालगुल्मान्तरवासिभिर्जनैः क्वचित् सुराणां कलगीतनादितैः ॥ ९ ॥

क्वचिन्नभोरत्नमयूखसङ्गमाद् विलीनहैमप्लवनष्टसत्पथे

सुपङ्क्तिनाङ्गुलमेकमध्वगैः न पार्यते यत्र समेपि यातुम् ॥ १० ॥

अशोकपुन्नागलतागृहोदरे रमन्ति यत्रासुरयोषितो नवाः

सुरामृतास्वादनमत्तचेतसः स्त्रगायुधोद्दामहुताशदीपिताः ॥ ११ ॥

यत्रारयो अपश्रियो गृणाः स्वर्गगृहाणि परिहाय तु ।

पल्लीगृहाधिपकृतभूप्रदेशेषु रेमिरे ॥ १२ ॥

हिमे पङ्कजमग्नेषु स्वपत्रामृतजन्तुषु ।

स्वात्मनः प्रमदानीय मन्मथेनावजृम्भिताः ॥ १३ ॥

रुद्रचक्षुष्कमालिकाङ्करराम्बुजैःसाधकैर्हराराधनैककृतनिश्चयैः
सम्बद्धसन्मतनिवासकैर्यत्र ललुसिद्धिश्रियैर्निर्विघ्नमासितम् ।
देव सुन्दरी कोमलाङ्गुलितलाहतैर्यत्र वल्लकी धानमूर्चनावितानकैः ॥
१३ ॥

श्रोत्ररन्ध्रकावेशनिर्भरमनोहृता मूर्चिताः मृगाः ।
कन्दरेषु दिनशायिनः पाकशासनानन्तविप्रमुनिवेशमतां
रुद्रवह्निधूमान्धकारहृतवासवे ।
यत्र चन्द्रसूर्यावु भावपिनरश्मिनिर्भासनक्षमौ तस्य तौ नवलशालिनौ ।
रुद्र पत्रशृंगाग्रलेख्यकृतवाहकैर्यत्रचैक रूपाप्यनेकमुखतां ययौ भूमिर्श
भोर्जटाभ्यो विमुक्त सुरनिम्नगा भूतिपाण्डुराद्भिः पवित्रितमहीतलाः यत्र
यत्र वेधसो रनुग्रहाद्वितततसम्पदः संचरन्ति वेदार्थवेतृमुनिसत्तमाः ॥
चन्द्रमौलिलिङ्गार्चनहित मनश्विनोजह्नुसुनु वा त्रिविध्रौ ततनुकल्मषाः ।
क्वचित् सुरारामसुदुर्लभश्रियां महीरुहानां सुमनप्रभञ्जनैः ।
सुगन्धिभिर्यत्र समन्थैर्वनं व्याधूयमानं प्ररिनृत्यतीव ॥
क्वचित् कलालापकरैः शिलीमुखैः क्वचिच्चक्रांकारिभिरोधसान्जलैः ।
क्वचिन्महाकीचकघृष्टनादितैर्यस्मिन्वनं मन्तमिवाभिगायते ॥
विषप्रतीते स्फुटमंजरीणां सुगन्धवातैर्हृतजीवितानाम् ।
यस्मिंश्च पुष्पक्षत विग्राहाणां जयन्ति सत्वानि न सात्विकानाम् ॥
१४ ॥

Sampath_eBooks

यस्मिन् कुरङ्गानि शशिप्रभानि वलिच्चिदः कन्दलभोजनानि ।

मृगाधिपातातंकविवर्जितानि दरीषु विष्टभ्य वियोगभांजि ॥ १५ ॥

यस्मिन् बदर्याश्रमिणो मतङ्गजा ऋते च तैर्नापि गुहासु सिंहाः ।

नवा नराः सन्ति वने विशीर्णे हिमानिलोत्तालशिलाकलापैः ॥ १६ ॥

सरांसि फुल्लाम्बुजसत्पयांसि कल्हारनीलोत्पलमालितानि ।

क्रौञ्चै रथाङ्गैः कलहंसवृन्दैः सेव्यन्ति यस्मिन्मुनिभिश्च शान्तैः ॥ १७ ॥

घण्ठा धैरैर्वद्धविचित्र चामरैः पताकिभिर्मौक्तिकदामलम्बिभिः ।

यस्मिन् विमानैरधिरुह्य सर्वतः साधू निषेवन्ति सुरा अजस्त्रम् ॥

१८ ॥

तस्मिन् गिरावुन्नतशृङ्गशालिनि विचित्र दिव्य द्रुमराजिमण्डिताः ।

नाम्नाश्रमो वादरिकेति विश्रुतस्तपोवनावासशतैरलङ्कृतः ॥ १९ ॥

तस्यान्तरे चित्रशिखण्डखण्डितैः कन्ठैमहानीलरुचोऽवलम्बिभिः ।

विलम्बितैर्भ्राजति कालिकागृहं माहिष्यरक्तच्चटकर्दमाविलम् ॥ २० ॥

विराजते चापि पुलिन्दबालकैर्मृगेन्द्र पुच्छाङ्कितताम्रचूडकैः ।

युवानि गोचामरिकासु चामरैः प्रलम्वितैर्यस्य हि मण्डपोदरे ॥ २१ ॥

टङ्कारिणो घर्घरिकाविलम्बिनो दारूर्ध्व लोहोद्भविकाश्च घण्टिकाः ।

याभा हता यत्र विनेदुरुच्चकैः श्रियो विलम्बन्ति च जीर्णवाससाम् ॥

२२ ॥

यस्मिन् मृगाणां करिकेश्वरीणां मयूरसर्पेन्दुपुलिन्दकाननाम् ।

एकत्वमेवाश्रित सौहृदानि क्रीडण्ति शावानि मुखस्थितानि ॥ २३ ॥

२ब् ख तस्मिन् भवान्याश्रितधाम्नि शुभ्रे विचित्रचित्राङ्कितदिव्यकुड्ये ।

समीहितार्थोद्यतसाधनाढ्ये वरप्रदां श्रित्य हिमाद्रिपुत्रीम् ॥ २४ ॥

जयद्रथस्सैन्धवदेशराजो निकुम्भजः पन्निलर्वीजजन्मा ।

महीगतं भोगमनित्यरूपं विदेहराज्यं विपुलं विहाय ॥ २५ ॥

जगाम तं सिंहरथो निवासं प्रालेयसानाववधारिताग्रम् ।

तस्मिन् हिमाद्रेस्तनयां सुभक्त्या आराधयामास तपः स्थितोऽसौ ॥

२६ ॥

धूमाशनो वाहुवभोजनश्च मरुद्भयी पञ्चहुताशजोषी ।

ऊद्ध्वाङ्ग्यधोमस्त्कलम्बपाणिरङ्गुष्ठमात्रं प्रतिलम्बभूमिः ॥ २७ ॥

नवारविन्दोत्पलविल्वपत्रैः कल्हारसिन्दूरशशाङ्कवो वै ।

कौरण्डजातीतिलकाशिलातैर्हयानियूथीकशताह्वपुष्पैः ॥ २८ ॥

पूजारतो ध्यानकृतास्पदश्च जपैकनिष्ठो हुतभुग् रतस्तु ।

सन्ध्योचितैर्वस्तुभिरद्वितीयः स कालिकां चेतसि संतुतोष ॥ २९ ॥

तस्यैकदा सा गिरिजाह मध्ये क्षीणे शुभे कर्मणि शैलपुत्री ।

उवाच चेदं गिरिराजपुत्री जयद्रथं पुन्यभृतां वरिष्टं ॥ ३० ॥

उपास्यतां हे विपुलं तपश्च वपुर्निजं ह्येकपदे दधत्स्व ।

अलं मृषा वत्स तपोधिकेन तपोधनेभ्योऽधिककर्मणाद्य ॥ ३१ ॥

वदस्व हृद्गताखिलं ददामि तेऽभिवाञ्छितं विहाय ह्रीर्भयं नृप

Sampath_eBooks

महेशशक्तिचोदितः ।

निशम्य वाक्यमीरितं पिनाकपाणिजायया ॥ ३२ ॥

प्रणम्य दण्डवत् क्षितिण्डवा व ख क्षिताण्डवा च पन्निलात्मजः ।

अनन्तदुःखभूभृता त्रयी भयेन पीडिताः ॥ ३३ ॥

वयं भवाब्धि मध्यतो विशेषतो विमग्नकाः ।

तमोगुणेन भूरिणा रजोऽधिकेन चोदिताः ॥ ३४ ॥

किमत्र वेद्मि मार्गितुं त्वमेव जानसे हितम् ।

यदर्थसाधनेन भीर्विनश्यते भवार्तिजा ॥ ३५ ॥

विचित्रकर्म- वपुश्च येन धार्यते ।

अशेषयोनिसङ्गमो भवेन्न येन कर्मणा ॥ ३६ ॥

नन्दीश्वराङ्गवासिनि कुरुष्व मे प्रसादतः ।

जयद्रथास्यनिःसृतं वचोऽवधार्य शैलजा ॥ ३७ ॥

उवाच पन्निलात्मजं न तेऽधुना भयं भवेत् ।

नन्दमानवृषभोद्धतारवैर्वाद्यमानवरदुन्दुभिस्वनैः ॥ ३८ ॥

शङ्खकाहलनिनादनादितैः वेणुवल्लकिरुणत्कृतैः कलैः ।

किन्नरामरवधूजनोदितैर्देवगीति मृदुतारगीतकैः ॥ ३९ ॥

इन्दुलाञ्छितजटाकपालिनां हास्यघोषमुखरं समन्ततः ।

नृत्यमानसुरसुन्दरीजनैः खेलमानशिवकामिनीगणैः ॥ ४० ॥

दिव्यबुद्धिगणरुद्रताण्डवैरुत्सवश्रियममाद्यदद्भुताम् ।

Sampath_eBooks

तदाश्रयं धूर्जटिनो मनोहरं जयद्रथं गृह्य हिमाद्रिनन्दिनी ॥ ४१ ॥

विलोचनैः कृष्णसितार्द्धशालिभिर्निरीक्षमाणा रभसाद् विशिष्य तु ।

सुरेन्द्रचूडामणिरश्मिरञ्जितां कृपक्षिनां शेखरचन्द्रभासिनाम् ॥ ४२ ॥

पिनाकिनः कायरुचाविभासितां सभां प्रविष्टासुरशत्रुवीथिषु ।

प्रणम्य नाथं दशषड्दलाङ्कितं विनम्य तस्मै नृपतिञ्च भूयशः ॥ ४३ ॥

उपाविशच्चूलभृतोऽङ्कविष्टरे हरेण लीला करकर्षिता सती ।

ततोऽतिरम्येण मनोभुवा गिरा दृशोर्भरेण स्मितमीक्ष्य शङ्करः ॥

४५ ॥

उमामुखं प्रेमवतातिलालसमुवाच वाचोऽमृतविप्रुषालयः ।

कृतं प्रिये सिन्धुपतेरभीप्सितं रसातले चित्रविभूतिलालसम् ॥ ४६ ॥

सुरालये वाथ मुकुन्दवेधसोः फणीन्द्र दैत्यैन्द्रगृहेषु चाखिलम् ।

प्रणम्य देवी रभसात् पिनाकिने परोपकाराय निशम्य मानसम् ॥ ४७ ॥

नतोत्तमाङ्गोत्तमपाणिसंपुटं पुरो निधायामृतं हि भाषते ।

भवार्णवे नाथ रुगूर्मिमालिन्यनन्तदुःखप्लवगोत्कराकुले ॥ ४८ ॥

निमज्जमानं स्वमवेक्ष्य सैन्धवः तवास्मि युग्मं शरणं प्रपन्नः ।

न वाञ्छते हेमकटाहमध्यमान् विचित्रभोगान् न जलादिधामजान् ॥

४९ ॥

त्वया प्रसन्नेन पदास्यते हर तदस्य सर्वं हि समास्यतां तनौ ।

ततः स्वधा विप्लुतचक्षुषा जनं सभागतं वीक्ष्य समन्ततः शिवः ॥

५० ॥

विविक्तये चेतसि कृत्य कल्पनां समादधौ नन्दिमुखं पुनर्दशम्।

प्रभोरभिप्रायमवेत्य पुष्कलं विसर्जयामास सभां स दण्डभृत् ॥ ५१ ॥

अधिष्ठ्य धाम्नो मुखमात्मना ततो जनः प्रवेशाय नियोगमाचरतः।

विनिर्गतैर्देवगणैः सनन्दिभिर्जयद्रथं वीक्ष्य शिवेन शङ्करीम् ॥ ५२ ॥

विभाषितं वीरजनस्य शंकरी मयोच्यतां देवि हृदीह लेऽखिकम् व ख

हृदी हेताखिलम्।

श्रीदेव्युवाच।

तोषितास्मि महादेव तपोभिर्मुनिदुर्लभैः ॥ ५३ ॥

अनेन नरसिंहेन नरसिंहो व ख नरसिन्धो विषयभासिना।

एष देव महासत्वः संसारात्या निपीडितः ॥ ५४ ॥

मद्भक्तस्त्वत्पदोद्धूलिभासितस्तु विशेषतः।

यथायं मन्त्रजां भोगं भुनक्ति च परं पदम् ॥ ५५ ॥

प्रयाति यस्य समतां प्राप्तो नैवाभिशोचति।

तथा कुरु सुराराातिरक्तरञ्जितशूलभृत् ॥ ५६ ॥

श्रीभैरव उवाच।

अस्य शान्तावुमे उमे वेत्सि ज्ञानोपायमनन्तकम्।

तथापि पृच्छसे यत् मां तत् ते विनयलक्षणम् ॥ ५७ ॥

वक्ष्येऽहमञ्जसा तुभ्यं समाक्षिप्तमनाः प्रिये।

न तज्ज्ञानान्तरं किञ्चित् हृदि तिष्ठति गोपितम् ॥ ५८ ॥

प्रत्युप्तं यत् त्वया दैत्य शत्रुमूर्तिनिवासिनि ।

कामिकादीनि यान्यासन् दश प्रोक्तानि शूलिना ॥ ५९ ॥

शिवभेदगतानीह शैवेशैवार्थदानि तु ।

विजयादीनि चान्यानि परमेशान्तिकानि तु ॥ ६० ॥

रुद्रभेदप्रभिन्नानि भेदानन्तगतानि तु ।

वामस्रोतसि विस्तीर्णे निर्गतानि पराणि तु ॥ ६१ ॥

सम्मोहकानि तन्त्राणि स्रोत्रसंज्ञाधराणि च ।

याम्य स्रोतसि सिद्धानि पञ्चाशेषादिकानि तु ॥ ६२ ॥

त्वद्यामलविरामानि शास्त्राणि पार्वती ।

भैरवाणि विचित्राणि चतुष्पीठगतानि तु ॥ ६३ ॥

यत्र यन्मानवीं पीठं स्वच्छदाद्यानि तत्र तु ।

मौद्रेऽपि हृदयादीनि धामभिन्नानि चैव हि ॥ ६४ ॥

एवमादीनि चान्यानि ज्येष्ठा सौपर्णिकानि तु ।

वितानमध्यमावस्थं समासानि समासतः ॥ ६५ ॥

त्वया श्रुतानि रुद्राणि मौलिचुम्बितपङ्कजे ।

तेषां मध्ये समासेन विस्तरेणाथ शैलजे ॥ ६६ ॥

यत् ते स्फुरति तन्वङ्गि तद् वदाद्य विचारतः ।

श्रीदेव्युवाच ।

Sampath_eBooks

विद्यापीठे महातन्त्रे शिरश्छेदे सुविस्तरे ॥ ६७ ॥

मुद्रापुरगणाकीर्णे दशकन्धरपूजिते ।

कालसंकर्षणी नाम या विद्यासीन्मया श्रुता ॥ ६८ ॥

सा नितान्तबलादेव प्रस्फुरद्वीर्यविस्तरा ।

शंसिता भवता सम्यगुपलब्धा मयापि हि ॥ ६९ ॥

तया सा मत्प्रसन्नस्य वाञ्छितं दुःशलापतेः ।

सम्पद्यते निरायासात् संप्रदायात् त्वयोदिता ॥ ७० ॥

तस्याग्रे विस्तरं कल्पमसंप्राप्तार्थनिर्णयम् ।

फलपक्षाय संबन्धसाधनाशेषसङ्कुलम् ॥ ७१ ॥

यच्चोपयुज्यते किञ्चिद् वीरवीर्यविवृद्धये ।

निगद्यतां हि तत् सर्वं प्रसादादिन्दुशेखर ॥ ७२ ॥

श्रीभैरव उवाच ।

स्त्रीणान्तु कुटिलं चित्तं निम्नं वापि विशेषतः ।

विलक्ष्यते स्वकार्याद् विस्नेहाद् वाप्युपलक्षणात् ॥ ७३ ॥

अर्थलाभे स्वकार्यं च बन्धूनां चार्थलाभता ।

स्नेहमभ्यासमं मृत्युः प्रव्रज्या सातिविस्तरा ॥ ७४ ॥

संदिग्धज्ञानसम्प्राप्तिस्ततोऽस्य च महीयते ।

प्रतिपन्नार्थसम्पत्तिर्युक्तायुक्तिरनुष्ठिता ॥ ७५ ॥

सैन्धवानयनादत्र भुवः स्नेहोऽथ गौरवम् ।

भक्तिर्वा गौरवो न्यायस्त्वया मे दर्शितः प्रिये ॥ ७६ ॥

साम्प्रतं पृच्छितानान्तु प्रश्नानामुत्तरं शृणु ।

किन्तु यद् भावि तद् ब्रूहि संस्थितं सैन्धवं प्रति ॥ ७७ ॥

वपुर्धृतं हि यदिदं तत्क्षयात् फलभागयम् ।

श्रीदेव्युवाच ।

वपुषः संक्षयादेव यदि लभ्येत सत्फलम् ॥ ७८ ॥

तदाविद्या च विद्या च त्वमहञ्च निरर्थकाः ।

श्रीभैरव उवाच ।

पूर्वमेवं मया देवि त्रय एते नियामिताः ॥ ७९ ॥

रावणान्धकसिन्ध्वीशाः क्रूराशयविधायिनः ।

ज्ञानभाजो महावीराः पिण्डास्तेन तेन भाजनाः ॥ ८० ॥

श्रुत्वैवं वाक्यमीशानी विरुद्धं त्रिपुरद्विषम् ।

हास्ययुक्तमुवाचेदं गूढधन्वानमर्मरुषः ॥ ८१ ॥

किमर्थं ज्ञानभाजस्ते न भाजो देहशुद्धिषु ।

त्वया स्वतन्त्रभावेन तेषां किन्नियमः कृतः ॥ ८२ ॥

किं वा स्वाङ्गगुणः कश्चिदेतदिच्छामि वेदितुम् ।

उवाच भैरवः श्रीमानश्रीत्य श्रीमतीं वचः ॥ ८३ ॥

स्वातन्त्र्यं देवदेवस्य त्वं मे मुख्यञ्च सुन्दरि ।

त्वदृतेऽन्ये स्वतन्त्रानो जगत्यस्मिन् मदादयः ॥ ८४ ॥

Sampath_eBooks

योऽसौ सर्वस्य कर्ता तु सर्वज्ञाता महेश्वरः ।
तस्य वीर्यं परं शान्तं तद्धर्माश्रयशालि च ॥ ८५ ॥
तद्यथा भाविजन्तूनां विदूरं सर्वतोमुखम् ।
तेन यो यादृगर्थे तु चोदितस्तस्य तादृशः ॥ ८६ ॥
सोऽर्थः सन्मुखतां याति देवि नास्त्यत्र संशयः ।
अनन्तेशादेवक्राणि ख दिवक्राणि कर्तृत्वं तत्समीरणात् ॥ ८७ ॥
गोप्ता प्रशांतमध्ये यत् स्वातन्त्र्यं तस्य तद्गतम् ।
तन्निपातवशाद् यस्य यादृग्रूपोचितं फलम् ॥ ८८ ॥
स तादृशं समश्नानिर्वाजं ख समश्नाति निर्व्याजं च नगात्मजे ।
श्रीदेव्युवाच ।
शक्तिः स्वतन्त्रभावेन यदि चोपरतचितः ॥ ८९ ॥
चित्तेन फलभोक्तृत्वं तदा पुंसां विरुध्यते ।
यतोऽनुग्रहशीलासौ मुख्यपक्षेण धूर्जटे ॥ ९० ॥
अतः स्वशीलदर्शित्वात् सर्वानुग्रहभाजना
प्रकाशदाहौ द्वौ गुणौ शीलं हि सर्वतः ॥ ९१ ॥
तत् तृतीयो जगत्यस्मिन् बुधैरप्युपलक्षितः ।
एवं रागविहीनो यः स विरामफलं भजेत् ॥ ९२ ॥
भिन्नभोगा नराः सर्वे शक्तिसञ्चोदनाद् यदि ।
तदा रागादयः सन्ति शक्तेरपि यथा नरे ॥ ९३ ॥

रागः संपृक्त कर्तृत्वाद् यादृक्क्लैव्ये प्रगीयते ।
तादृशं विमलं ज्ञानं त्वमेव हि विवेचय ॥ ९४ ॥

श्रीभैरव उवाच ।

असमानभुजो दृष्ट्वा भोक्तारस्त्वमिदं प्रिये ।
श्रुतार्थाप्यश्रुतं द्य मसश्वोघं ख व्य मसश्चौघं विभाषसे ॥ ९५ ॥
अमूलकौन्शेव ख शिवर्भवौ तावन्योन्यविमर्दकौ ।
शान्तैकान्तगुणः शम्भुर्विपर्ययगुणो भवः ॥ ९६ ॥
भवश्च जन्तुचक्रस्य न शम्भोस्तु कदाचन ।
शम्भुर्भवे गश्च अनाद्यं शाश्वतं त्रिकम् ॥ ९७ ॥
चेतनाचेतनं विश्वं संस्थितं स्वस्वभावतः ।
दामकं दामदास्यञ्च सर्वज्ञाज्ञञ्च स्वल्पवित् ॥ ९८ ॥
एवमेकमनेकञ्च विभुत्वपरिनिष्ठितम् ।
त्वयि कार्यविलीनेऽपि जागर्ति स्वगुणाश्रितम् ॥ ९९ ॥
अविकारि सचित् तत्र विकारिपदचेतनम् ।
सचित् समानं जानीयमसमानमचित् स्मृतम् ॥ १०० ॥
निरम्बरं साम्बरं च तदम्बरमचेतनम् ।
शोधकं बोधकं बोध्यं शोध्यं चान्यत् तथा परम् ॥ १०१ ॥
एवं शिवनरानन्ततत्वत्रयमिदं प्रिये ।
प्रतिष्ठितं जगत्यस्मिन् स्वधर्मेण प्रकाशितम् ॥ १०२ ॥

Sampath_eBooks

तस्य देवातिदेवस्य यद् वीर्यमतिरस्कृतम्।

तत्सुतंत्रं न सन्देहो रागहीनश्च सुन्दरि ॥ १०३ ॥

पुंभ्याः प्रदर्शयेद् भोगान् स्वगुणेन समर्जितान्।

न प्रेक्षापूर्वकारित्वाद् ददाति स्वकृतं क्वचित् ॥ १०४ ॥

यथा नाकृतकर्मासौ कर्मणा सह युञ्जते।

युञ्जते च तथा भाविव्यंग्येर्थै व्यञ्जकार्थया ॥ १०५ ॥

पश्चानुग्रहशीलत्वाद् युगपत् क्षिन्न संस्पृशेत्।

जन्तुचक्रं तद्प्यस्मिनसद् ख तद्प्यस्मिन्नसद् देवि त्वयोदितम् ॥

१०६ ॥

पृथिव्यां ये गजाः सन्ति गजजात्यैकसङ्गताः।

युगपत् ते गर्वशान्त्यै मदशक्त्यावलम्बिताः ॥ १०७ ॥

विधुबिम्बे समग्रे वै सत्यप्यम्बरमध्यगे।

कुमुदाकर ः समानन्ते विकासं संप्रयान्ति हि ॥ १०८ ॥

कालान्तेजस्विनां तेजोनिमित्ताद् विनिवर्तते।

भोग्यत्वं कुञ्जरादीनां स्वगुणत्वप्रकाशकम् ॥ १०९ ॥

सन्ततापि शिवास्याच्चदिव्यभव्यविवक्षया ।

जन्तूनां कुरुते बोधं पद्मानां भानुमानिव ॥ ११० ॥

इति श्रीभैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षणीकल्पे प्रथमः पटलः ॥

Sampath_eBooks

१ ॥

द्वितीयः पटलः ।

अथ वीक्ष्यमुखं नम्रः शैलपुत्र्या ः जयद्रथः । तस्याः भ्रूलब्धस

वित्तिः प्रणम्याष्टाङ्गमादरात् ॥ १ ॥

प्रोवाच वचनं भक्त्या प्रह्वीभूतो जगत्पतिम् ।

सर्वज्ञं व्यापकं शान्तं शुद्धमव्ययमीश्वरम् ॥ २ ॥

संपूर्णममलं तृप्तममनस्कं निरामयम् ।

सूक्ष्मं सर्वगतं स्वच्चमवर्णानमनादिमम् ॥ ३ ॥

प्रमाणातीतसद्भावं शक्तिमद् विश्वभैरवम् ।

यत् तत्वं तत् कथं शम्भो प्रतीतिमुपगच्चति ॥ ४ ॥

सर्वस्मिन् वस्तुग्रहणं प्रमाणादुपजायते ।

नाप्रमाणं क्वचिन्नाथ परिच्चिन्नं हि केनचित् ॥ ५ ॥

चक्षुरादीनि देवानि यदर्थे ग्राहकानि तु ।

सोऽर्थः संगम्यते सम्यगेव कोसोभाक्त समन्ततः ॥ ६ ॥

अनन्तो भानुजो वीरस्तूर्यमेतत् स्वरूपगम् ।

परिमलं स्वादुरूपं सृष्टिलक्षणशालि च ॥ ७ ॥

दृश्यं ग्राहकपञ्चैव व्यूहकं च स्वधर्मगम् ।

चतुर्गुणं सभाध्यक्षमेतदेव चतुष्टयम् ॥ ८ ॥

अस्मान्न पञ्चमन्नाथ ह्यस्माकं विचेष्टते ।

श्रीदेव्युवाच ।

यत् तद्धि पञ्चगं वस्तु प्रत्यहं सर्वतोमुखम् ॥ ९॥

तस्य वेदविदो वेत्तृप्रमाणं नेतरे जनाः ।

किन्तु वत्स स्वकार्येत्वमक्षाणां गणनाङ्कुरु ॥१०॥

येन जानासि तत् तत्वं पञ्चमं भ्रान्ति वर्जितम्

विहस्य सैन्धवो ब्रूते वृषलक्ष्म्या न मारुष ॥ ११ ॥

न मह्यं सर्वसत्वानां सामान्द्रियवाहिनी व सामान्द्रिय- ख

सामान्येन्द्रीय ।

नासिका रसना चक्षुस्त्वक् श्रोत्रोपस्थपायुरेव च

यत् पाणिगामिनः कालः शेमुषी च प्रदृश्यते ।

श्रीभैरव उवाच ।

एषां व्यापारधर्मों यो ग्राह्यग्राहकलक्षणः ॥ १३ ॥

तत् समानगुणं ब्रूहि निर्व्याजं पन्निलात्मज ।

श्रीजयद्रथ उवाच ।

आमोदरसरूपेषु स्पर्शशब्दान्तिकेषु वै ॥ १४ ॥

ग्राह्येषु ग्राहकं दृष्टं नासिकाद्यन्तु पञ्चकम् ।

आनन्दोत्सर्गगमनं ग्रहणं वचनं तथा ॥ १५ ॥

इच्छानिश्चयबोधाश्च वृत्तिरुक्ता भगादिषु ।

विहस्यामितगम्भीरचन्द्रचूडामणिस्मितम् ॥ १६ ॥

Sampath_eBooks

विलोक्य वदनांभोजं हैमवत्यां स्फुरद्रुचिम्।
विभाषे वाक्यमितरमद्दक् तिमिरमर्दनम् ॥ १७ ॥
दुःशलाधिप भूतानां तूर्यमेतत् त्वयोदितम्।
प्रतिपत्तिकरं पुसां पुंसां प्रत्यक्षे पञ्च सन्ति हि ॥ १८ ॥
शब्दस्य ग्राहकं श्रोत्रं साधर्म्येण व्यवस्थितम्।
श्रोत्रमाकाशरूपन्तु शब्दस्तद्गुणलक्षणः ॥ १९ ॥
पृथिव्यप्तेजोमरुतां गुणा : गन्धादयो मताः।
न हि शब्दगुणास्तेषां प्रमाणैरुपलभ्यते ॥ २० ॥
कार्यकारणभावोक्ते धर्माधर्मक्रियावहः।
आशयादिगुणैर्ज्ञेयः शब्दो व्योमप्रतिष्ठितः ॥ २१ ॥
शब्दस्य साधनं श्रोत्रं श्रोत्रं व्योम व्यवस्थितम् ।
तत्वं यत् त्वयोक्तमलक्षणम् ॥ २२ ॥
तस्य वेद्येत प्रत्यक्षं दिक्क्रियोद्वहम्।
चक्षुराद्यैश्च यद्ग्राह्यं प्रत्यक्षं तद्धृदि संस्थितम्।
तदसद्दूरदोषो न सूक्ष्मन्यग्भूतवस्तुभिः।
समासन्नसमानाभिभूतवस्त्वंअतरीकृतैः ॥ २४ ॥
प्रत्यक्षं बाधितं वत्स काव्यसूत्रप्रदर्शितम्।
दूरत्वाद् वहिर्दश्येत शक्रक्रीडावलोकनैः ॥ २५ ॥
किमसावसन् महाभाग सन्नप्यम्बरगो विधुः।

Sampath_eBooks

ज्योतिर्हीना न पश्यन्ति किमचन्द्रं तदम्बरम् ॥ २६ ॥

काण्डभिन्नकरीं सेनां गजवाजिसमाकुलाम् ।

अभ्यसन्नपि गच्छन्तीं मनोहीनो न पश्यति ॥ २७ ॥

किं सानुनि पथानेन विलीना भवतेऽनघ ।

परिपूर्णं समं पश्य समन्तात् परमाणुभिः ॥ २८ ॥

न ते दृश्यंति सूक्ष्मत्वात् किन्न ते सन्ति सुव्रत ।

न्यग्भूतं तिलसिद्धार्थं पयसा स्नेहलक्षणम् ॥ २९ ॥

त्र्यक्तं ख व्यक्तं प्रत्यक्षतां यान्ति तदसत् किन्नृपात्मज ।

नेत्रस्थेनाञ्जनेनैव दृष्टं प्रत्यक्षगोचरम् ॥ ३० ॥

असत्यादिविहीनैकस्तत्त्वमेव विवेचय ।

प्रभ्रष्टः पंजरात् कीरो लीनः कीरकदम्बके ॥ ३१ ॥

समानराशिभावानः संवेद्यो नास्त्यसौ तु किम् ।

पतङ्गपद्धतिव्रातैरक्षिभूतो नभोऽन्तरे ॥ ३२ ॥

ज्योतिबर्गो न संग्राह्यः किमसौ नास्त्यरिन्दम ।

अन्धाश्च न हि पश्यन्ति निक्षिप्तानि च मन्दिरे ॥ ३३ ॥

घटादींश्च तथैवं हि पटसंचादितानि हि ।

न तेन सन्नपृच्चस्त्वं सन्निधौ मां स्वमातरम् ॥ ३४ ॥

एवं श्रुत्वा तु गम्भीरा शर्वाणी सर्वभाषितम् ।

जहास समदन्तेन्दुप्रभाभासितदिङ्मुखम् ॥ ३५ ॥

Sampath_eBooks

ततः प्रोवाच खण्डेन्दुभासाद्योतिकपर्दकः।

सूनृतं वद देवेश प्रमाणं भैरवं प्रति ॥ ३६ ॥

येन धीरन्नवैमल्यं भवते सिन्धुभूभृतः।

श्रीभैरव उवाच

प्रत्यक्षमनुमानञ्च शाब्दं चैव तृतीयकम् ॥ ३७ ॥

प्रमाणत्रयमेतद्धि स्पष्टमीशप्रसाधकम्।

प्रत्यक्षं फलते सिद्धं तत्पूर्वमनुमानकम् ॥३८ ॥

आगमैः साधयेते द्वे -ताभ्यामागमसाधनम्।

ग्रहविक्षेपचायाभिर्विबीजं ग्रहदर्शनम् ॥ ३९ ॥

मास एतत् प्रमाणपञ्चक दृश्यं ज्योतिर्विदां ज्ञानम्।

कफवातपित्तसम्भवरोगजवेदनं ह्यविभ्रान्तम् ॥ ४० ॥

तन्निग्रहश्च भोजनशक्तिः संस्थिता यद्वत्।

कालसमीरण लक्षं पुंसामुपतापदोषनिर्वाणम् ॥१ ॥

अन्धेष्विदमेवमौषधदानाद्भिषजां हि प्रत्यक्षम्।

भद्रमृगमन्दजातिद्विजकुम्भकरी विकारपदैश्च ॥ ४२ ॥

सल्लक्षणैर्गजेन्द्रा वाक्कलिमद व ख वाक्कलि- दर्शिताःशुभदा।

आयुर्विजयं वृद्धिं राज्यं बन्धुप्रियं च विपरीतैः ॥ ४३ ॥

निघ्नन्ति तच्च तादृग् दृश्यं सुस्फुटतरं जगत्यस्मिन्।

कौशिकहरिणीयोगात् संभूतारण्यसम्भवा ये च ॥ ४४ ॥

Sampath_eBooks

खुर्वालकेशटङ्कांगाः पुण्ड्रकावर्तदशकगुणैः ।

सम्यग्विशुद्धदेहा भवन्ति राज्यादिविजयकर्तारः ॥ ४५ ॥

हरयः ककुदावर्तादिदूषिताः दुःखिता शीघ्रम् ।

एवं तनुतालुरोमत्वगग्रे सावयवचरणकरजनखैः सलक्षणैः ॥ ४६ ॥

बाला यत्र पुमांसो वनिताश्च जुषन्ति सुखमतुलम् ।

विपरीतशितैरपि दृश्यन्तेऽनेकरुग्भाजः ॥७ ॥

अव्याजरसरसायनसेवाकृत दिव्यवपुषोऽन्ये ।

शेफशतकल्पदर्शितदिव्यौषधिसम्भवं बलं यच्च ॥ ४८ ॥

निजगोचरगं तदपि हि दृश्यते ह्यव्याजवीर्यगुणम् ।

द्यूतकचेटकचिपिटानां दिवि शिव पार्वतीमतगताश्च ॥ ४९ ॥

मनुजाः स्वगोचरोदितसामर्थ्यविधानोद्देश्याः ।

स्पर्शदृषदमलमणिगुणविवरान्तरगमनपादलेपाद्यम् ॥५० ॥

धरणीमतप्रदर्शितविधिविधानसन्दर्शनाध्यक्षम् ।

गारुत्मत्यपि विषदं मन्त्रमुद्राध्यानधारणाभिस्तु ॥ ५१ ॥

विषनिग्रहभुजगग्रहविषादनाद्यैरनेकैश्च ।

भूतपिशाचार्थं नयननिग्रहसंप्रेक्षणादिभिरनेकैः ॥५२ ॥

भूतपतिशास्त्रविहितं प्रत्यक्षं दृश्यते तथ्यम् ।

जिह्वाच्छेदनवेधनलोचनसंस्पर्शनांत्रकृष्टिश्च ॥ ५३ ॥

मुद्रणबन्धनमारणप्रेष्यफलं मातृतन्त्रमपि ।

Sampath_eBooks

पातालखेचरामलतमालगुटिकातिरोहणादीनि ॥ ५४ ॥

प्रेश्याति साधकतनौ स्फुरन्ति भैरवविधानेषु ।

पुण्यविषयोऽवुजवनं कालोसितरुद्रभुक्ति निशि मध्यम् ॥ ५५ ॥

पात्रयोगिन्यो द्रव्यमामिषं खेचरं सपदि ।

एवमष्टाङ्गवादादिवीर्यविभवेन सस्फुरं शैवम् ॥ ५६ ॥

शिवकृतमण्डलमन्त्रैरभिलषितावाप्तिकृतदृश्यम् ।

संहारकारि विरहणमालाकर्षोग्रसत्ववधबन्धैः ॥ ५७ ॥

खड्गांश्च डाकिनीनां ज्येष्ठा तन्त्राणि दृश्याणि ।

नरकिन्नरोरगामरयक्षपिशाचमुनिनिशिवरस्त्रीणाम् ॥ ५८ ॥

संसाधनेन्द्रजालैर्दृश्यं चण्डासिधारमपि ।

एवमुद्दिष्टवस्तुषु निजगोचरसंस्थितं क ख निजगो च संस्थितं बलं यादृक् ॥ ५९ ॥

तन्नियमं सर्वज्ञः करोति न हीतरेऽल्पविदस्तत् ।

प्रत्यक्षालोकादनुमानात् सिध्यते ह्यानुश्रविकम् ॥ ६० ॥

प्रारोहदर्शनादि च वृक्षस्य भवोत्तरविधानम् ।

एते स्फुटप्रमाणे स्यातां यस्मिन् स चागमः ॥ ६१ ॥

शिष्टस्ताभ्यामव्यभिचारी ध्रुवमीशकृत् तस्य नित्यफलः ।

ईशश्च रूपहीनोऽपि भूतकृत्योपलक्षितो जगति ॥ ६२ ॥

आम्नायकार्यकारणभावैः प्रत्यक्षकृतामगमनं ।

रविरश्मिंपद्मवोधप्रत्यक्षालोकनं समाम्नायः ॥ ६३ ॥

कार्यं प्रावृषि भानोरदर्शने पङ्कजविकासः ।

करेणमपि सूर्यमणिर्दिनबन्धोर्गमात् सदा वह्नेः ॥ ६४ ॥

तच्चापि तत्स्वरूपं समवायनिमित्तबीजगुणम् ।

सूर्यमणेः समवायो हेतुस्तरणेर्ह्यपादानात् ॥ ६५ ॥

सन्नग्ने कार्यमिदं भृत्यः सिद्धश्च पावकः ख पावकस् तस्य ।

पावक सम्भवोऽयं मणिः यो माया दिनेशवच्चैषः ॥६६ ॥

शिखिसंभवे च सत्ता वस्तूनां नान्यथा सृष्टिः ।

रविकान्तस्य न कामः कामो न हि विश्वकर्मणो यद्वत् ॥ ६७ ॥

उत्पत्तमे व उत्पान्नये ख उत्पन्नये कृशानोस्तद्वन्न भवस्य भवकर्तुः ।

कामो वरमात्रकृते सञ्चरतो न हृदि तदाह सर्पस्य ॥ ६८ ॥

स्वबलार्पणैकनिष्ठाःस्वत एवैते हि धर्मिणां धर्माः ।

उत्पत्तिस्थितिसंहारवियोजनानुग्रहैर्भवो दृश्यः ॥ ६९ ॥

तद्दर्शनाच्च दृश्यस्तत्कर्ता कार्यतो दृष्टः ।

असुशिरशरणान्तर्गतमुग्ला निजकर्णकुवलयविकासात् ॥ ७० ॥

वेघे दृश्यमपीन्दोरुदयं कार्यानुमानाद्धि ।

एवममूर्तोऽपि विभुः कालश्च प्रकटितः स्वकृत्येन ॥ ७१ ॥

सम्भवशल्योद्धरकः कन्दुक इव देहहीनोऽपि ।

क्षुदिवानुभवसुगम्यो मन्मथ इव सौख्यमात्रसंवेद्यः ॥ ७२ ॥

Sampath_eBooks

कथनाद् यत् प्रतिपाद्यो निजबलसंवेदनाध्यक्षः ।

अचलो निरञ्जनश्चबलो मन्तव्योऽनुभवविवर्जितः शान्तः ॥ ७३ ॥

भैरवरूपः शम्भुर्जगतिगतिः प्रकटिता तुभ्यम् ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं-
शतिसाहस्रे कालसंकर्षण्याः कल्पे द्वितीयः पटलः ॥ २ ॥

तृतीयः पटलः ॥

जयद्रथ उवाच ।

आलोच्यं ज्ञेयरूपं तु मन्तव्यं सर्वतो हर ।

आलोचक मनोज्ञानं चेता पुंस्वार्थसाधकः ॥ १ ॥

आलोचिता च मन्ता च यन्न कर्ता नरं स्मृतः ।

एतावान् व्यवहारोऽत्र योगिनां योगसाधने ॥ २ ॥

मन्तव्यमपि यत्नेन तत्संवित्तिः कथं भवेत् ।

श्रीभैरव उवाच ।

मनोग्राह्यं तु मन्तव्यं यस्य न ग्राहकं मनः ॥ ३ ॥

मन्तव्यं तन्न जल्पन्ति मन्तव्यार्थविदो जनाः ।

वालाग्रयुतमात्रं हि लक्षाधिष्ठानमादरात् ॥ ४ ॥

मनसैकत्वनिभृतं मन्तव्यं मध्यसंहृतम् ।

तेजोऽनुरूपं लक्षाख्यं पञ्चावयवलक्षणम् ॥५॥

मनोरूपं हि तज्ज्ञानं निकृष्टं योगिभिर्मतम् ।

Sampath_eBooks

नेच्चातः स्पर्शसंकल्पो यावत् तावत् किमप्यसौ ॥ ६ ॥

स्वभावः सर्वभावानां भावहेतुरनादरः ।

प्रथमोऽनुभवो विष्णोर्द्विर्भावं यावन्नोत्सहे ॥ ७ ॥

तदावेशकालकृष्टिः कालसङ्कर्षणो परः ।

सुस्वप्नो ह्यसुसुप्तश्च द्विरूपगुणलक्षणः ॥ ८ ॥

सुसुप्तो भावविरमात् संवित् तेन सुसुप्तकः ।

योऽस्यैवानुभवः पुष्टश्चिन्तादिपरिवर्जितः ॥ ९ ॥

स यस्य सत्सदा योगी शेषो योगी परापरः ।

असमाधौ मुनिर्बाणं समाधिर्भवसाधनः ॥ १० ॥

बुद्ध्याद् व्यवस्थितो निम्नः समाधिर्योगिभिर्मतः ।

सा च वृत्तिगुणाख्या तु यतो धीर्गुणकारणा ः॥ ११ ॥

समत्वं यद् भवेत् तस्यास्तद्गुणद्वयवर्जनात् ।

न व्यापारो रजस्त्यागात् तमोऽन्ते नियमो न हि ॥ १२ ॥

प्रख्यारूपन्तु विज्ञानं यत् स्वच्चं स्फटिकोपमम् ।

तत्सत्वं निर्मलं शुद्धं तव प्राधानिकं मतम् ॥ १३ ॥

संहृतं कार्यरूपन्तु कारणे विलयं व्रजेत् ।

कार्यं विद्धिः समायाता गुणाः कारणमिष्यते ॥ १४ ॥

बोध्य हानिं यदासौ धीस्तिमितत्वमुपागता ।

तदास्वकारणाकारं भजते तन्न संत्यजेत् ॥ १५ ॥

यत् तस्याः कारणं तद्धि यदि तत्वं परं भवेत्।
तदोत्सवः कापिलानां हन्त चैवादयो हताः ॥१६॥

ध्यानं ध्येयं प्रवृत्तन्तु ध्येयं सालम्वनं भवेत्।
निरालम्बं हि तद् ब्रह्मध्यानगम्यं न युक्तितः॥ १७॥

उहाप्रकाशितं सर्वं जह्यते वस्तुलक्षणम्।
वस्तुवृत्तेन यस्यास्ति तस्योहा क्रियते कथम्॥ १८॥

प्रत्याहृतिप्रयोगेन ह्येकोद्देशप्रतिष्ठितम्।
सन्निधीक्रियते नैशं यत्र तत्र च तद्गुणम्॥ १९॥

धारणा सविशेषा तु ख स्तु विशेषो यस्य नेष्यते।
धारणासाधनं तस्य कथं स्युरविशेषतः॥ २०॥

प्राणो वायुः समाख्यातः आयम्यावष्टभ्य वेदनम्।
यदा कार्यत्रयग्राही तदासौ किल निर्वृतः ॥११॥

तस्य हेनुरहंकारो ख हेतु- बुद्धिस्तस्यापि कारणम्।
बुद्धेः स्वकरणीयं तु कारणं प्रागुदीरितम्॥ २२॥

प्रलीने कारणे कार्यं लयं याति न संशयः।
मनोनिरोधोऽहमिति ह्यहंलीनप्रबोधकः ॥२३॥

प्रबोधे परमः सत्वमनन्यगुणबृंहितम्।
सत्वस्य परमा काष्ठा प्रकृतिः शासने मता॥ २४॥

तत् तन्मयत्वात् स्वं रूपं तदाकारं प्रसिद्ध्यति।

Sampath_eBooks

तथात्वेनोदितः कालस्ततो भावं प्रगृह्यते ॥ २५ ॥

भावे च भावलिङ्गानि विचित्राण्यसृजत्पुनः ।

अथ चेदम् शुद्धत्वे मनुसो लक्षणं त्विदम् ॥ २६ ॥

विशुद्धमन्यथाभावि शृणु बुद्धि विचार्यते ।

प्रधानकार्यानुदयस्तमर्थं संस्पृशेद्यदा ॥ २७ ॥

साम्बरीयैर्गुणैश्चैव तदा तच्छुद्धमुच्यते ।

उक्ताश्रयो हि मनसोऽणुचैतन्यप्रचोदितः ॥ २८ ॥

आदरात् प्रीतिमान् भावो मलिनः प्रोच्यते बुधैः ।

शुद्धार्थालोचनं यत्तु पदशुद्धार्थलोचकम् ॥ २९ ॥

तज्ज्ञानं सहजं पुंसि व्यञ्जिका तस्य वेदनी ।

शुद्धार्थवेदनाच्छुद्धा सा शुद्धेतरवेदना ॥ ३० ॥

मायेया सा च विख्याता यतो मायात्मकं जगत् ।

यस्य साधनभावत्वं माया साध्यस्य युज्यते ॥ ३१ ॥

मायात्मकं तदप्यत्र ग्राह्यग्राहक भावतः ।

प्रपञ्चः प्रोच्यते माया प्रपञ्चो द्विविधार्थगः ॥ ३२ ॥

एकार्थो निष्प्रपञ्चस्तु प्रेर्यप्रेरकवर्जितः ।

स्वभावः सन्निराधारः शून्यताभावमाश्रितः ॥ ३३ ॥

नित्यः सर्वगतः शान्तः सदोदयसमागमः ।

तद्ग्राहिका भवेद् बुद्धिर्यदि बुद्धिविभुर्भवेत् ख बुद्धिर्वि- ॥ ३४ ॥

न स्मृतिं व्याप्नुयाद् यस्तु तद्व्याप्तिं कथमाश्रयेत्।

उत वा चित्तवृत्तिन्तु ऌ वृत्तिस्तु ययैवानुभवो भवेत्॥ ३५॥

चित्तवृत्तौ न तत्तत्वं तेन तत्र न लक्ष्यते ।

संरम्भाद् व्यापकं तद्धि हृषीकेषु तथैव च॥ ३६॥

तद्ग्राह्येषु च तन्वङ्गि निसर्गस्थितवस्तुषु।

अथ तत्र तदस्तीह तद्योगो विफलस्तदा॥ ३७॥

प्रयत्नाल्लोचनाक्षीणि स्वात्मन्येव नियामयन् ।

प्रबोधो वस्तुरूपस्य तत्त्यागो भाव एव च॥ ३८॥

त्रिकस्यास्य प्रसाधात्वं साधने त्रिकमेव हि।

इच्छाप्रयत्नचित्तं च सूक्ष्मात् सूक्ष्मं च वानघ॥ ३९॥

बोधाश्रयो भवेद् बोधो बोध्यं स्थूलं यदा ऌ यथा भवेत्।

तत्त्यागस्तु यथा व ऌ यदा योग्यो तत्त्यागो भवितापि च॥ ४०॥

देवतावयवे स्थूले बोध्ये बोधांतरङ्गमः।

इच्छाद्यभिहितं तद्वदन्तरङ्गं हि प्राङ् मया॥ ४१॥

मन्तव्यो व ऌ -व्य मनसो योगो व ऌ योग विश्लेषस्त्याग उच्यते।

प्रपन्नेचापहारश्च स चाभावः प्रशंसितः॥ ४२॥

चिन्मात्रोद् बोधसंवित्तिः कालत्रयविवर्जिता ः।

कारणं करणात् कार्यं त्रिकमुत्सीलितं यदा॥ ४३॥

तदा भावगतो योगी निस्तीर्णो जन्मबन्धनात्।

Sampath_eBooks

एवं काष्ठमयी वृत्तिरेषां मुक्तिः प्रयत्नगा ॥ ४४ ॥

तेषां तद्वृत्त्यसंयोगान्मोक्षाभासोऽपि दुर्लभः ।

इच्छाप्रयत्नबोधाद्यानर्थान् सर्वान् हि शून्यताम् ॥ ४५ ॥

व्यापयित्वा स्थिता यद्वदसतादीन् खमुज्ज्वलम् ।

न तत् किञ्चित् परित्यज्यं ग्राह्यं एकत्वात् किञ्चन ॥ ४६ ॥

न तद्दूरे न चासन्ने न नादस्तत्र तद्वहिः ।

न मद्विरामो महतो न कालमनसो प्रिये ॥ ४७ ॥

न तद्दृषीकचरमं न च बिम्वावसानकम् ।

न च तद्धारणान्नीतं न गुणैः परिवर्जितम् ॥ ४८ ॥

नाव्यक्तां ख नाव्युक्तं तदसद्देवि न च पुंरागयोरपि ।

आदिमध्यावसानेषु सत्रे ह्यस्मिन् महाधिपे ॥ ४९ ॥

चरतः पौरुषानर्थान् संवित्तिर्यास्य तत्त्वगा ।

स चात्रामृतवांल्लोके मृतवान् यत्र योगगः ख -तः ॥ ५० ॥

श्रीदेव्युवाच ।

ससाधनेषु भोग्येषु गुणरागादिषु प्रभो ।

अनपानेषु ख अन्न- तुल्लर्व्वियदिस्यात्तदिदं जगत् ॥ ५१ ॥

किमर्थं तिष्ठते बद्धं ख वद्धं दृढया पाशमालया ।

अधोमुखमवीक्ष्य क्ष्मां स्फुरिताधरपल्लवः ॥ ५२ ॥

ततः प्रोवाच भगवाञ्श्चन्द्रचूडामणिः प्रभुः ।

Sampath_eBooks

नालिकेरैकरस्थे तु क्षुत्क्षामस्तु वनेचरः ॥ ५३ ॥

पञ्चत्वमर्हते तस्य भेदविज्ञानवर्जितः ।

स मुच्यते हयो देवि वृत्तिस्थं वेत्ति शङ्करम् ॥ ५४ ॥

निर्द्वन्द्वमुन्मनीव्यक्तमचलं दारुवद्दृशम् ।

न योगी योगमाप्नोति चलत्वाच्च सदाचितः ॥ ५५ ॥

अथातिनिश्चयाद्योगः स योगः कस्यचिद्भवेत् ।

मोहयोगेन योगीन्द्रो निर्विचारेण तेन सः ॥ ५६ ॥

श्रीदेव्युवाच ।

दैत्येन्द्रवक्षस्पृष्ठोद्य ख वक्षपृष्ठाद्य स्थूलाभेद्यविभेदनः ।

शौर्यकारी घनोत्ताल ज्वालादीप्तदृगानलः ॥ ५७ ॥

दुष्टारातिभटान्युग्रहेतिक्षणकिणाङ्कितः ।

रत्नालङ्कृतमूर्द्धोर्ध्वफणिमण्डितदोर्गणः ॥५८ ॥

मार्गणाग्राति दीप्ताक्षिवह्निदीपितमस्तकः ।

उत्खायान्धकहृच्चल्यं दत्तामरमहासुखः ॥ ५९ ॥

कुटीरान्तरबालेन्दु कलाकन्दलभासितः ।

गरलापः सुविस्तीर्णवलयाङ्कितकन्दलः ॥ ६० ॥

राकाशशाङ्कबिम्बाभकपालकृतहस्तकः ।

इरायुतवपुःशूलकरकोकनदानलः ॥ ६१ ॥

दक्षिणानलः दंष्ट्रांशुभग्नविश्वमहातमः ।

Sampath_eBooks

संसारहिममार्तण्डो व्याधो ध्वनहुताशनः ॥ ६२ ॥

अद्यस्तिभिरपूर्णेन्दुदुःखपङ्कजलप्लवः ।

दोषानलमहाज्वालाटोपैः शम्भु हलाहलः ॥ ६३ ॥

क्षुधां कामफलाहारस्तृषाममृतसागरः ।

धूर्तारातिमहारण्यदीप्तदावशिखिध्वजः ॥ ६४ ॥

दिवौकसां गवां गोपो रुरोधोरुगवीश्वरं ।

त्वत्पादपद्मगम्भीरकोशाभ्यन्तरशायिनीम् ॥ ६५ ॥

शरण्यं शरणानां च नाथ बाह्यनाथमरिन्दम ।

यत् तत् परमसद्भावः प्रतिपन्नः त्वया हर ॥ ६६ ॥

सर्वामृतगुणाधारसमादरमनिन्दितम् ।

प्रत्यक्षमचलं शान्तं मनोऽहङ्कारवर्जितम् ॥ ६७ ॥

विषयास्वादवियुतं सर्वा रमनाश्रितम् ।

तत्तत्वमुपदेशेन कथमत्रोपलभ्यते ॥ ६८ ॥

श्रीभैरव उवाच ।

चिन्ता ध्यानं कृकं निश्चिंतं शिवमव्ययम् ।

स्वभावं तं विजानीयात् स्वभावेनैव भावयेत् ॥ ६९ ॥

स्वभावस्तु चलावस्था ह्यन्यभावाबोधिते ।

भावाभावेऽपि सा नित्या स्वावस्थां न जहाति च ॥ ७० ॥

तस्यामन्तर्गतं चेतः पुंसां सर्वक्रियास्फुटम् ।

ग्रामं ग्रामं समर्थात्मा गोचरस्तां समर्पयेत् ॥ ७१ ॥

चलन्ति वस्तु जातानि स्तैमित्यं यान्ति तानि वै ।

चलत्वं सत्यसापेक्षं तिमिरत्वं यतः शृणु ॥ ७२ ॥

यस्य नोऽचलधर्मस्तु तस्य तद्धाममिङ्गितम् ।

चलधर्मा मरुद्व्योम्निमितं नित्यलक्षणम् ॥ ७३ ॥

उभयोधृच्यते ------------------ ।

वायुवत्सत्तमादीनि व्योमवद् व्योम तत्परम् ॥ ७४ ॥

चलन्मरुद्यदा व्योम्नि लीनो ह्यचलतां गतः ।

तदा व्योमोपलब्धिस्तु किन्न सा मरुता सह ॥ ७५ ॥

यदा समस्तवस्तूनि विलीयन्ते स्वरूपतः ।

तदानुभवमायाति तत्तत्वं किन्नरैः सह ॥ ७६ ॥

निष्कलं खगमासक्तास्तस्मिंल्लीनोऽपि निश्चलः ।

व्योम्नः पृथग्गतं दृश्यं तत् पृथग्व्योमदर्शनम् ॥ ७७ ॥

यथोपलभ्यते तद्वत् वस्तुतत्वान्तरं प्रिये ।

शम्भोः शक्ती रणात् सर्वमीरितं चलतां ययौ ॥ ७८ ॥

समानत्वात् समानं स्यात् संहाराल्लय एव च ।

तदेवमेकरूपन्तु सततं सर्वतो मुखम् ॥ ७९ ॥

अप्रेर्यं स्थिरगं शान्तमसंहार्यमनादरम् ।

भूतान्तरंगसंभूतं भूतभूतं विलक्षयेत् ॥ ८० ॥

Sampath_eBooks

विपञ्ची स्वरटङ्कारात् कस्माद् व्यज्यन्ति सुव्रते।

व्यक्तावस्थायिनः कुत्र कुत्र लीयन्ति वानघे ॥ ८१ ॥

झल्लरी पटहादीनां रवाणां द्विरदारिणाम्।

महारवोपशासेया संवित्तिः स्वोदयेऽपि हि ॥ ८२ ॥

वर्तमानेऽपि सा तादृङ् महाभूतात्मिका प्रिये।

दीप्ता दीप्तशिखा देवि निर्वाता व ख -णा भुवनोदरे ॥ ८३ ॥

झगित्येव हि यां वृत्तिं प्रसाधयति तत्क्षणात्।

सा वृत्तिर्यस्य संकल्पसामरस्यमुपागता ॥ ८४ ॥

स योगी योगयुक्तः स्यद् योगी स्याद् वृत्तिजिवर्हितः।

महाभूतरतिर्ह्येषा सुसुप्ता सर्वतोमुखी ॥ ८५ ॥

सङ्कल्पसरसा नित्या परामृतविधायिनी।

गुरुवक्रात् समुत्पन्ना यस्याः संकल्पनिश्चयः ॥ ८६ ॥

संश्लिष्टचित्तसंताने नासौ हृयति केनचित्।

तस्यार्थं सा च तद्योगस्तस्याः नेष्टस्तु योगिनाम् ॥ ८७ ॥

अविच्छिन्नस्तु सङ्कल्प भूतयोः सन्निधिर्यतः व ।

ततः पूर्वोदितं तन्मे सर्वं शष्टं भविष्यति ॥ ८८ ॥

भूतादिष्टस्तु संकल्पः संकल्पो भूतमाश्रित ः।

यानयोः समरसता साव्युच्चिन्ना विनश्वरा ः ॥ ८९ ॥

विनश्वराणि वस्तूनि शरीराद्यानि सुन्दरि।

तानि दृष्ट्वा पृथग् स्थानि सा दृष्टापि विनश्वराः ॥ ९० ॥

श्रीजयद्रथ उवाच ।

सङ्कल्पोलक्षमनसः प्राक् त्वया समुदीरितः ।

स चाप्यग्राहकस्तस्य महतश्च हि साम्प्रतम् ॥ ९१ ॥

तत्सामरस्यभावेन तत्संवित्तिः प्रकाशते ।

श्रीभैरव उवाच ।

चिद्रूपान्ता भवोत्पन्नः संचित्तिरुपलब्धिभिः ॥ ९२ ॥

आस्वाद्य भोगसंज्ञाभिः सङ्कल्पो ह्युपचर्यते ।

स्वचित्तापरचैतन्यस्योपलब्धिर्यदा ययौ ॥ ९३ ॥

तदा तदाह सङ्कल्पं न च तस्य मनोगुणैः ।

क्षुत्तृषोरन्तरंगे तु स्वशरीरेरप्रवृत्तयः ॥ ९४ ॥

न तयोर्ग्राहकश्चेता न च ते तु भवोज्झिते ।

रेतोत्सर्गसुखं पुंसां यत्सञ्चित्तेरुपागतम् ॥ ९५ ॥

न तस्य ग्राहकं चित्तं तद्वृत्तेर्वारिकुम्भज ।

स्वदेहे वेदनादीनामन्येषाञ्च महातपाः ॥ ९६ ॥

मनोमहदहङ्कारपूर्वाणां ग्राहकं व ख ग्राहिता नहि ।

चिच्चैतन्यं हि चिद्रूपं ग्राहकं नेतरं क्वचित् ॥ ९७ ॥

लोकेसमानजातीयं यथा प्राणो व ख प्राणं नभोमणिः ।

विशेष लक्षणो वाक्यं माणिक्यांशु विमार्जिते ॥ ९८ ॥

सत्यज्ञानतपोयोगादुवाचेदं पुनर्नृपः।

यथोपदिष्टं सर्वेश भवतां तादृशं हितम्॥ ९९॥

सदा तु भवमात्रं हि न च यानि प्रकाशितुं।

तथापि मह्यं दीनाय नाथानाथाय भीरवे॥ १००॥

कृपयोपायमाख्याहि तस्योपायस्य सञ्चितः ।

प्रोवाच हास्यसंयोगाद्रदनोद्भूतरश्मिभिः ॥ १०१॥

विद्युतां पुञ्जरूपैस्तु प्रच्छादिततमोभरः ।

तद्वत् सपुष्टं पश्यामि तस्योपायं प्रयत्नगम्॥ १०२॥

तमुक्त्वानुभवं शून्यमुभयोर्भूतभूतयोः।

तथापि हि तदाभासभोगावस्थानलक्षणम् ॥ १०३॥

लेशतो ब्रूमि वीरेन्द्र शिरश्छेदे यथोदितम्।

विद्युतः प्रोच्चलल्लेख्यं वाग् वा द्राधीयसीं चलाम्॥ १०४॥

अस्त्वग्नीनां चितां वीक्ष्य को न तां वेत्ति शून्यताम् ।

ऐशानी विद्युवच्चक्तिः सा बाधा भुवनाङ्किता ॥ १०५॥

तस्योत्पत्तौ स्थितौ मे यद् गांभीर्यं सुनिम्नगम्।

सर्वाकारं निरालम्बं तच्चिन्त्यं तद्विभूतिगम्॥ १०६॥

यथा साधारणे व्योम्नि वपुर्व्योम्नि तथा हितम्।

विस्मृतं स्मरणे काले योनेराधारतां प्रिये॥ १०७॥

स्वदेहे तु मया ख्यातं को न जानाति शङ्करम्।

प्रस्त्रावमुपविष्टे तु सूत्रागमतींशुके ॥ १०८ ॥

पानादननिरालम्बा या वति साद्वयशून्यकृत् ।

यस्त्वैकगतचित्तश्च भवितानान्यचिन्तनम् ॥ १०९ ॥

विहाय संस्थितश्चेति निरालम्बो यदा हृदि ।

स्वभावादप्रपन्नाच्च तदा स्वादय सेन्दव ॥

द्रव्याच्च सन्निकर्षाच्च या निराधरताक्षणे ।

तया तद्भूततोद्भूतं न कदाचिद्विनिष्क्रमेत् ॥ १११ ॥

मैथुनानन्दसंप्राप्तिक्षणे समरसी भवेत् ।

पश्चादिष्वप्ययत्नेन भूतें भूते परे प्रिये ॥ ११२ ॥

गान्धर्वमूर्च्छनाव्यक्तेर्भावनैकाग्रतां गते ।

द्विरूपमपि तच्चून्यमेकं भवति नादरात् ॥ ११३ ॥

विस्मृतेरस्तमात्रे च विमुक्ते प्रेयसः प्रिये ।

सा निराधारतां याति स्वभावेनैव पुद्गलः ॥ ११४ ॥

या निराधारता तस्य निरालम्बा प्रपञ्चिनी ।

सामृताधरमाकण्ठा सुनिर्वाणविभूतिदा ॥ ११५ ॥

इत्येतत्स्थूल सूक्ष्मं सकलमसकलं चञ्चलं वाचलं च

सावद्यावद्य हीनं शिवपुरवपुषं सेश्वरं वाप्यनीशम् ।

सा यत्नं भूतयुग्मं समरसमसकृत् सङ्गतं यो विभेद

निर्वाणोपायमार्यं शरणमशरणस्तं गुरुं गच्च लोके ॥ ११६ ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे कालस

ंकर्षण्यां निर्वाणनिर्णयो नाम तृतीयः पटलः ॥ ३ ॥

चतुर्थः पटलः

श्रीभैरव उवाच ।

अथ धातुः प्रवक्ष्यामि वीर्यसन्तानमादरात् ।

तदेकमप्यनेकान्तं कृत्यभेदाद् उपागतम् ॥ १ ॥

भोक्तृभोग्यप्रतिष्ठानाद् विश्वरूपं प्रतिष्ठितम् ।

चितेर्न लक्षणाख्यानाद् भिन्नमेकमधीक्ष्यते व ख -क्षते ॥ २ ॥

निरस्ताश्रयभावाच्च समस्तस्य निराश्रयात् ।

तन्निराश्रयमाख्यातमनार्थं नाथवर्जनात् ॥ ३ ॥

अन्ताद्यमृतभावत्वादनन्तं व्योमरूपतः ।

व्योमरूपमनिन्द्यं तं व्यापित्वाद् व्यापकाश्रयात् ॥ ४ ॥

नीयते परमेशस्य ह्यभिन्नपरमात्मनः ।

कर्तारं चापि धातारं हर्तारं सर्ववस्तुषु ॥ ५ ॥

नेतारं च वियोक्तारं भोक्तारं ह्यर्थसन्ततेः ।

वेत्तारं चाभियोक्तारं एवमादिगभस्तिभिः ॥ ६ ॥

अनन्ताभिः समापूर्णं कृत्यसंज्ञाविधायिभिः ।

उताभिचिद्विलाघ्रातं दुर्गाप्रगुणलक्षणम् ॥ ७ ॥

अधःस्त्रोतःसमासन्नं स्थानं विश्वस्य भास्वरम् ।

योगक्रीडाविलासेन योगमूर्तिभिरीश्वरः ॥ ८ ॥

क्रीडते भोग्यभोक्तृत्व रूपाभिर्यत्रलीलया ।

विधूके शशिखण्डास्तु भोक्तारो भैरवात्मकाः ॥ ९ ॥

कापालिकास्त्रिनयना दोर्दण्डोद्यतहेतयः ।

अनाथानाश्रितानन्तव्योमरूपविभूत्तमाः ॥ १० ॥

नररूपाः शान्ततमास्ता एव हि कलात्मिकाः ।

योनिरूपा महाभागा ः पतिरूपानुकारगा ः ॥ ११ ॥

व्यापिनीव्योमरूपाश्च अनन्तं नाथमाश्रिताः ।

एतद्धि कथितं वत्स परं मिथुनपञ्चकम् ॥ १२ ॥

भोगस्थाने महाबिन्दावस्मिन् भोगविलासनम् ।

स्वतोधिकारगं धाम्नि प्रागुक्तेऽलपलक्षणे ॥ १३ ॥

ततो घोरा महावीरा भैरवाः परमेश्वराः ।

कपालमालाभरणा नागयज्ञोपवीतिनः ॥ १४ ॥

खंडेन्दुमौलयः सर्वे तथा पञ्चदशेक्षणाः ।

व्यालकल्पास्थिमृत्प्रोताः सितभस्माङ्गरायिणः ॥ १५ ॥

पुण्डरीकाजिनालम्बा गजचर्मोत्तरीयकाः ।

कल्माषकंठबिम्बोष्ठा दिग्दोर्दण्डकलापिनः ॥ १६ ॥

वक्रपञ्चकदंष्ट्रेन्दुकरोद्भासितदिङ्मुखाः ।

मञ्जीरोरगपूर्णेन्दु रश्मिरञ्जितपद्युगाः ॥ १७ ॥

Sampath_eBooks

व्यापि भैरवदेवेशोद् ह्यमृतामृतभैरवः ।

पीयूषभैरवो वीरः सुसूक्ष्मो सूक्ष्म एव च ॥ १८ ॥

अजगो विजिनानन्दो सुषुम्ना मन्दरोदयः ।

गान्धारभैरवो घोरस्तथा भैरवभैरवः ॥ १९ ॥

द्वादशैते महावीरा युग्मं युग्मं समाश्रिताः ।

द्वादशान्ते ख द्वादशारे वुजे ख म्बुजे शुभ्रे वन्ध्यादित्येन्दुकर्णिके ॥

२० ॥

ग्रहर्क्षतारकानेकपत्रान्तर निवासिनि ।

विद्येश्वरगणाकीर्णे यत्र सन्धिविसारिणि ॥ २१ ॥

नादकेसरसङ्कीर्णे बिन्दुकिञ्जल्कवासिते ।

व्यापिनी ससुधासौधा सुसूक्ष्मा सूक्ष्मरूपिणी ॥ २२ ॥

वीरा जगाविनी नन्दा सुषुम्णा मन्दरोदया ।

गान्धारी भैरवी देवी द्वादशी परिकीर्तिता ः ॥ २३ ॥

भर्तृरूपधरा देव्यो रमन्त्यक्लिन्नसम्पदः ।

नवयौवनलावण्यपुञ्जोद्भासितविग्रहाः ॥ २४ ॥

एवमस्मिन् सुविस्तीर्णे द्वादशारकशालिनी ।

श्रीवत्से द्वादशैतानि दम्पत्यानि रमन्ति हि ॥ २५ ॥

एषां सामीप्यगानीह सायुज्यस्थानि यानि च ।

सालोक्यगान्यनेकानि तेषां संख्या न विद्यते ॥ २६ ॥

व्योमव्योमेश्वरो वीरो वैकुण्ठः शिखिवाहनः ।

प्राणोऽपानः समानश्च ह्युदानो व्यान एव च ॥ २७ ॥

नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ।

विभ्रमश्च भ्रमश्चैव वेधषुर्वृषभोऽमलः - ॥ २८ ॥

पुण्डरीकः शशाङ्कश्च चण्डः संवर्त्तभैरवः ।

इडापिंगलनामा च यूषो यूषेश्वरो नलः ॥ २९ ॥

ईशानभैरवः शुक्लश्चन्द्राभोऽनलभैरवः ।

वकुरूपभैरवः श्यामो रक्तो वामेश्वरो मतः ॥ ३० ॥

क्षीरोदपुञ्जरुचिरो विख्यातः सद्यभैरवः ।

रक्तः करालश्चण्डाक्षो महोच्चुष्मोऽथ वाडवः ॥ ३१ ॥

वाडवो घुर्घुरो घोषो कुलिः कौशिकभारुद्रः ।

लम्पटो वावटो द्वोण्डो दामो वुलुवुलः किलः ॥ ३२ ॥

कह्लोदः पिचुमान्यीडो हेड्रोहेड्राधियो बली ।

क्रौञ्चसत्त्वो महासत्वः पक्षः सारस एव च ॥ ३३ ॥

व्योमव्यापी दशार्णश्च नवात्मा चलभैरवः ।

संहारभैरवो हंसो झाङ्कारो भवभैरवः ॥ ३४ ॥

हुङ्कारः सुशिरो ख्यातोऽन्यो ज्ञानाङ्कुशभैरवः ।

वागीशभैरवो ज्ञेयः सप्त ह्यूर्ध्वे द्वितीयकः ॥ ३५ ॥

अमी वीराः समाख्याता ः सामीप्यस्थानमाश्रिताः ।

Sampath_eBooks

श्रीपादलाञ्छिता ह्येते भोक्तारो भोग्यरूपिणः ॥ ३६ ॥

ज्ञातव्या वीरपानज्ञैर्धीरदर्शनवेदिभिः ।

अतः सायुज्यगाः सन्ति तेऽपि नाम विशेषणात् ॥ ३७ ॥

युग्मभावं समायान्ति योषित्पुंसो कपायतः ।

करालो दन्तुरश्चैव भीमास्यश्च महाबलः ॥ ३८ ॥

खेलो नीलः खरः कालो मन्मथो गहनाम्बरः ।

दंष्ट्रोद्धाती विषादी च कन्दर्पो दर्प एव च ॥ ३९ ॥

सृष्टिसंहारभूतेशा भूतोत्कीलनभैरवाः ।

ध्वजचत्राब्जशङ्खेषु शूलपिच्चकभैरवाः ॥ ४० ॥

वल्कोल्मुखः सुताराख्यः कबन्धो ध्वनिभैरवः ।

मदमोहविषादाश्च रागवैचित्र्यविस्मयाः ॥ ४१ ॥

क्रोधाहङ्कारसन्तोषलोभदम्भादयस्तथा ।

पैशुन्यंमत्सरः कामः कौटिल्यानुनयः परः ॥ ४२ ॥

कल्पाणो बिन्दुकश्चैव भर्गः कल्याणधेनुकः ।

विद्याप्रसूती मनङ्गो समशीर्षो दशाननः ॥ ४३ ॥

घंघलो घूर्णनो घूको महाघंघलभैरवः ।

शम्बलः शृङ्खलो नन्दो महानन्दो निरन्दुकः ॥ ४४ ॥

नरकश्चर कोलीनःमादकोवडवानलः ।

द्वासप्तति प्रोक्ता मिनौघा निकुम्भज ॥ ४५ ॥

प्राक् प्रोक्तां रूपधातारःयोगक्रीडाप्रसादतः।

रमन्ते विविधैर्भोगैर्योगजैर्योगसम्पदः॥ ४६॥

पर्वद्वयगता ह्येते चोदिता योगभैरवाः।

सिद्धाणवो महावीराः सालोक्यं स्थानमाश्रिताः॥ ४७॥

ते प्रोच्यन्ते सपत्नीका नामभिः शान्तमूर्तयः।

महाविभवपर्यङ्ककृतास्पदमहोदयाः ॥ ४८॥

स्वशेखरमहारत्नभास्वद्भासितविग्रहाः।

मन्त्रानलशिखाटोपदग्धसार्द्धेन्धनतृकाः॥ ४९॥

सर्वज्ञाः सर्वकर्तारः सर्वभैरवसम्पदः।

विद्याधिपतिसोमेशौ मेघवाही च गोपतिः॥ ५०॥

यमपालो विकरालः शिखावाही हरः परः।

महादेवस्तथा क्रूरः शिखेशाङ्गवङ्गणावुभौ ॥ ५१॥

चण्डीशश्चैव संवर्तः श्रीगर्तबलशालिनौ।

प्रद्युम्नो ह्यनिरुद्धश्च अनन्तो मदनस्तथा॥ ५२॥

अक्रूरचक्रदेहौ च वक्षश्च हरस्तथा।

शौण्डी प्रमथनामा च भीमो मन्मथ एव च॥ ५३॥

अतिकायो विदेहश्च शुष्काक्षश्च कटङ्कटः।

भिन्नकेशः करोघा------ऽ यस्तथा॥ ५४॥

गोकर्णोऽथ महानासो बिडालः ः सुमुखोऽपि च।

करालवह्निजिह्वा उल्काक्षोभत्मकः परः ॥ ५५ ॥

विपुलो दुलुदुण्डश्च दन्तुरः कालरात्रिकः ।

मुकुटो यमघण्टास्थो यमजिह्वो महामुखः ॥ ५६ ॥

रेवतः कुम्भकर्णश्च रक्ताक्षो गर्जनो बली ।

धूम्रकः कर्कटो राहुः पुंश्चली चचिनस्तथा ॥ ५७ ॥

हिलिहिलिः किलो रुद्रः सुभद्रो भीमभद्रकः ।

भीमोऽथ भीमवान् भीष्मः भद्रकालः सुमानसः ॥ ५८ ॥

देवको बलवान् वीरो भीम्मकश्च महारवः ।

क्रमको विक्रमधुरः कम्पनः सूक्ष्मविग्रहः ॥ ५९ ॥

विश्वो विश्वेश्वरश्चैव भारोग्रो वीरनायकः ।

अश्वो घूर्वश्च सर्वज्ञः कोष्ट्रकोच्चुष्मसंज्ञकः ॥ ६० ॥

एते वीराः समाख्याता वसुमङ्गलसंख्यया ।

नाम्ना विशेषणादेषां जायाख्यः पूर्ववद्गणः ॥ ६१ ॥

त्रिपर्वे द्वादशारस्य स्थितोऽयं यामलोऽमलः ।

वहिरन्तर्महावीरः कालसङ्कर्षणस्थितः ॥ ६२ ॥

कालसंकर्षणीयुक्तः कुटिलः कुटिलेश्वरः ।

समवायश्चित्स्वभावः ः परिग्रहश्च नः प्रभुः ॥ ६३ ॥

पदमन्त्रकलावर्णतत्त्वाधाराण्यसंख्यया ।

यश्चकार जगत्यस्मिन् भोक्तृणां भोग्यहेतवे ॥ ६४ ॥

विशुद्धं मन्त्रसन्तानाः शुद्धभैरवमूर्तयः ।

विरक्ताख्य स्वरूपे तु स्थित्वा यान्ति परं पदम् ॥ ६५ ॥

तत् ते स्वयं विनिक्षिप्य योगव्योम्नि निरामये ।

ज्ञानमूर्त्यंशकायौ तु ज्योतिःशब्दौ तु भास्वरौ ॥ ६६ ॥

मलयोगवियोगाभ्यां बन्धमुक्ती प्रसाधयेत् ।

जन्मवज्जन्तुवक्राणां स्वधर्मालिङ्गनात्मनाम् ॥ ६७ ॥

पश्चात् पश्चिमजन्मा तु पुमान् संसाध्य लीलया ।

श्लथयत्यावृतिं गूढां स्ववीर्येण मलात्मिकाम् ॥ ६८ ॥

परिग्रहगुणो मूर्चा या रुणद्धि चेतोबलम् ।

सर्वव्यापारकर्तृत्वषट्कं सर्वज्ञलक्षणम् ॥ ६९ ॥

समवायगुणश्चास्य तद् वैधर्म्यप्रतिष्ठितः ।

प्रालेयानपि चार्कांशुभीषणां पक्षिराडिव ॥ ७० ॥

जन्तूनां यत्र सन्तानवाहनात्यं तत्परः ।

अनादिबन्धसम्बन्धो यन्त्राद् यन्त्रान्तरं व्रजेत् ॥ ७१ ॥

पुर्यष्टकतनुश्लिष्टं सकलं कर्मकारणम् ।

सहजांगान्तरप्राप्तः कर्मरज्जोर्यथा दृढः ॥ ७२ ॥

तिरस्कृत्य यागसम्बन्धेन तदुत्पत्तिरूपवान् ।

न च तादात्म्यरूपज्ञः समवायात्मलक्षणः ॥ ७३ ॥

दीपार्चिरजनावस्था तदुत्पत्तिर्बुधैर्मता ।

Sampath_eBooks

केशोर्णासितनाधर्मास्तादात्म्यप्रतिपत्तिकृत् ॥ ७४ ॥

संबन्धः समवायाख्यैर्ज्ञेयस्तन्तुपटात्मकः ।

मलपुंसोरवस्थानं शुक्तिमौक्तिकयोरिव ॥ ७५ ॥

अथ वक्ष्यें डकाकारं सहजाश्चर्यदर्शनात् ।

दृश्यं तदन्तर्जीवानामाख्यायां वा प्रतिष्ठितम् ॥ ७६ ॥

तिरस्कृतिः त्रिभिः कार्या सम्बन्धोऽयमनादिमान् ।

चरितार्थाश्च दृष्टान्तां सहजानादिसाधने ॥ ७७ ॥

तिरस्कृत्तिरसत्कार्यैं वस्तुत्वे च न सर्वतः ।

एवमेतत् पशुत्वं हि पशोरञ्जनमुच्यते ॥ ७८ ॥

येनाभ्यञ्जितचिद्धर्मकर्मकृत् कर्मरूपिणः ।

देहानाप्नोति मायीयान् यतिशक्तिसमन्वितान् ॥ ७९ ॥

मलानुपातभोक्तृत्वं कर्मणो भोगदर्शनम् ।

भोगसाधनदृष्टेन प्रपञ्चोऽप्यनुमीयते ॥ ८० ॥

भोक्ता भोगक्षयो माया व्याप्रियन्ते न शक्तिभिः ।

वपुरित्यादिकाभिस्तु घोराभिर्बलशालिभिः ॥ ८१ ॥

धर्माधर्मक्षयो येषां जातः शिष्टेन कर्मणा ।

निष्प्रपञ्चाणवः प्रोक्तास्तेज्ञनैःकलिबन्धनात् ॥ ८२ ॥

पत्युरिच्चासु ये यूषप्लुतास्ते यान्ति निर्वृतिम् ।

द्विविधामाश्रितां ज्ञानयोगदीक्षासु वर्तनैः ॥ ८३ ॥

श्रद्धाविद्यामनुज्ञाय प्राणकायोद्ध्र्वधर्मतः।

सम्प्रदायचरुभ्यां वा ज्येष्ठाद्यैरथ कुत्सितैः॥ ८४॥

एवमादिभिरन्यैश्च साधनैरमितैः प्रभुः।

संसारिणोऽनुगृह्णाति विश्वस्य जगतः पतिः॥ ८५॥

जयद्रथ उवाच।

अनादिमलसंसर्गाद् भोक्तृत्वं भोक्तुरिष्यते ।

भवादौ तस्य को भोगो वपुषो यो विधायकः॥ ८६॥

सति कर्मण्यजस्राभिः शक्तिभिः सृज्यते घनम्।

बीजांशशबलव्यूहचिच्चक्तेः सर्वदोचितः ॥ ८७॥

निमित्तकारणं यत् तदञ्जनं कर्मणो मतम्।

तत्साधनाय माया च भोक्ता साधयिता व साधयिती पशुः॥ ८८॥

यथा योगस्वरूपञ्च कर्त्र्यो या विभुशक्तयः।

एतावान् व्यवहारोऽत्र विश्वे विश्वपते स्थितः॥ ८९॥

भोक्तृत्वभोग्यभोगेषु साधनादिषु सर्वतः।

सम्भूतिरव्यया बिम्बी नित्या च जननी मता॥ ९०॥

सा चैव हि मलो नाम मुक्तितः प्रतिपद्यते।

न तस्या व्यतिरेकेण मलयुक्तिर्विभाव्यते॥ ९१॥

श्रीभैरव उवाच।

कर्मापेक्षः प्रपञ्चोऽयं यद्वपुस्ततं सदा सृजेत्।

Sampath_eBooks

तत् तथ्यं किन्तु यत् कर्म तदनादिमलं यथा ॥ ९२ ॥

तदस्तित्वाच्च मायीयो व्यापारः केन धार्यते ।

बीजमादिशरीराणामनाद्या कर्मसन्ततिः ।

शेषस्यादिशरीराणां कर्मणो ह्यार्जकानि वै ॥ ९३ ॥

जयद्रथ उवाच ।

क्रियेतेति कर्मशब्दः कर्तुः करणस्य चापि सिद्धोऽसौ ।

कर्तृकरणक्रियाभिहीनिः तद् दृश्यते कर्म ॥ ९४ ॥

अकृतकाभिरूपणाद्यं नो कृतकं कुत्रचित् तत् स्यात् ।

कर्मभिः संज्ञितोऽनाद्यकृतकनाद्यसंभाव्या ः ॥ ९५ ॥

श्रीभैरव उवाच ।

कर्तृशक्तेरनादित्वाद् भवस्य च महामते ॥ ९६ ॥

कर्मणोऽनादिभावोऽयं केन चित्तं निवार्यते ।

चिकीर्षुःसर्वभूतानामनुग्रहविभूतयः ॥ ९७ ॥

स एवानुग्रहोपायमसृजत् परमेश्वरः ।

न स एव विजानाति क्रियामम्बरशुद्धये ॥ ९८ ॥

तद्युक्तवस्तुदानञ्च स एव हि करोति च ।

सर्वकर्तृत्वमर्थ्यात् कर्तुस्तन्न विरुद्ध्यते ॥ ९९ ॥

मूलदेहात्मकं कर्म कर्तव्यं हेतुलक्षणम् ।

माया स्वभावतो व्यक्तेः कर्तृत्वबलशालिनी ॥ १०० ॥

Sampath_eBooks

मूर्च्छैव मूर्च्छाजनिका नासौ चैतन्यसङ्गता ः।

अतो मायात्मिका शुद्धिर्न स्याद् गुणविभेदतः ॥ १०१ ॥

जयद्रथ उवाच ।

वस्तून्येकेन किं नाथ गुणयुक्तिः प्रसज्यते ।

येनासत्कल्पनाशुद्धेरेषा मायातिरेकता ॥ १०२ ॥

दाहप्रकाशको वह्निः शशी शीतप्रकाशकः ।

दीपार्च्चिरञ्जनाधारा प्रख्याकृद् वा न किं प्रभो ॥ १०३ ॥

स्वभावान्मोहनी माया कार्या भावप्रकाशिका ।

चितश्चिच्चक्तिसंश्लिष्टा एतद्धिकिमयुक्तिकम् ॥ १०४ ॥

श्रीभैरव उवाच ।

कोष्ठाभ्यन्तरदेशेषु यत् सूतेषु रजो नृणाम् ।

नानिमित्ता प्रवृत्त्यत्र कस्यचित् प्रविभाव्यते ॥ १०५ ॥

माया तावत् स्वभावेन नवचैतन्यमाश्रिता ।

स्वभावान्नाश्रयाल्लक्ष्यात् प्रवृत्तिनिमित्तका ः॥ १०६ ॥

तनुरियं परिग्रहवर्त्तिनी विभुभये जगतां बलरोधनी ।

पतिपतेः समवायसमीहिताः प्रविसृजन्तनवो हि वपुष्मताम् ॥ १०७ ॥

पञ्चाशद्वर्णरूपामलमणिविभवा वन्धतो भूतिरेषा ।

नानाचक्राम्बुजानां सुविमलसरसो वर्णिता विस्तरेण ॥ १०८ ॥

नेतुर्विश्वस्य दुर्गा प्रगुणगुणवतस्तेजसां बिन्दुमूर्त्तेः

योऽस्याधस्तान्नियोगी स हि खलु विशदे ं वर्णनगुह्यकेशः ॥ १०९॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसाहस्रे प्रथमषट्के कालसङ्कर्षण्यां चतुर्थः पटलः॥ ४॥

पञ्चमः पटलः॥

श्रीभैरव उवाच ।

अथ धातुरधःकृत्य कृत्यैर्वीर्यमलोऽमलः ।
क्रीडतो निपपाताधः प्रगुणः स सदाशिवः॥ १॥
स्वच्चस्य बिन्दोः प्रथमा त्रुटिरुच्चूननात्मिका ः।
सेन्धनादिन्धिका नाम कलामूर्त्तिकरी विभो॥ २॥
अप्रौढगुणसंप्राप्ता दीप्तत्वाद् दीपिका मता।
कलातनोः स्वदेशस्य दृग्रूपायाः प्रसाधिका ः॥ ३॥
षट्कक्ष्यात् पर्वके केलिरुचितस्थानसंश्रयात्।
रोचिकाभिरुपस्पर्शमणिवृन्दविधायिनी ॥ ४॥
सुषुम्णा सूक्ष्मसंस्थानमोचना मोचता मता ।
मुक्ताखिलपथा वाथ मोचिका चात्ममौलिका॥ ५॥
सा तुरीया मत्वेशस्य ततस्तुर्यपदानुगा।
निरालयखमार्गेण ऊर्ध्वमूर्ध्वगमाच्चनैः॥ ६॥
मनोन्मनी स देशस्य मूर्त्तिर्वै सोर्ध्वगामिनी।
पञ्चैता देवदेवस्य शुद्धाक्षाध्यासिताः प्रभो॥ ७॥

चैतन्यशक्तिस्तनवः परिग्रहघनात्मिकाः ।

एताभिर्मूर्त्तिभिर्वीरः पञ्चाशद्वीरयोनिभिः ॥ ८ ॥

अपचारिकदेहेन मन्त्रात्मेति प्रगीयते ।

श्रीकण्ठोऽनन्तसूक्ष्मौ त्रिमूर्त्तिश्च वरेश्वरः ॥ ९ ॥

अर्घीशो भारभूतिश्च तिथीशःस्थाणुरेव च ।

हरो झंटी ख झण्ठी समाख्यातो भौतिकश्च महाबलः ॥ १० ॥

सद्योजातस्त्रिपादश्च हा क्रूरस्मेरसंज्ञकः ।

आदिनिष्ठान्तिका ह्येषो वाच्यवाचकयोगतः ॥ ११ ॥

शिरोमन्त्रविधातारी मन्त्रे सद्योर्ध्वगामिनी ।

संवर्तो लकुलीशश्च भृगुश्वेता बकस्तथा ॥ १२ ॥

खड्गी पिनाकी भुजगो वालिः कालो दुरुण्डकः ।

चगलाण्डः शिखी चैव लोहितो हुटपीनकौ ॥ १३ ॥

त्रिदण्ड्या षढ्युमाकान्तो ह्यर्द्धनारीशदारुकौ ।

लाङ्गलीशश्च सोमेशः शल्मजेशावशानकैः ॥ १४ ॥

कादिमान्ताभिधानानामभिधेयैर्महेश्वरैः ।

मोचिकाख्या स्थिता शक्तिर्वक्तृवृन्दविधायिनीं ॥ १५ ॥

चतुर्मुखैकनेत्रौ च तथा कूर्मैकरुद्रकौ ।

परयोर्लवयोश्चैव वाच्यवाचकरूपयोः ॥ १६ ॥

रोचिकावृन्दमेतद्धि हार्दमन्त्रशरीरिणः ।

अंशगुह्यान्तरङ्गानां निष्पत्तिजनकं शुभम् ॥ १७ ॥

शिवोत्तमश्च पञ्चैते चण्डक्रोधवशादयः ।

दीपिकाबलमेतद्धि पत्युद्गुह्यविधायकम् ॥ १८ ॥

तस्यां हि लक्षणा देवी वामदेवकथात्मिका ।

इन्धिकानन्ततेजोभिरन्विताशेषनायका ः ॥ १९ ॥

एतज्ज्ञानवपुः प्रोक्तं ज्ञानरत्नमहाम्बुधे ः ।

नान्तमूर्तिरधोनन्तचक्रानीकप्रवर्तिनः ॥ २० ॥

श्रीदेव्युवाच ।

ज्ञानरत्नाकरो वीरो न परो भैरवो विभुः ।

आकरं कारणं लोके कार्यजातस्य भाव्यते ॥ २१ ॥

न कार्यं कुत्रचिद् दृष्टं स्वस्वरूपविधानकृत् ।

यत् तज्ज्ञानं त्वया प्रोक्तं स एव हि सदाशिवः ॥ २२ ॥

ज्ञानं ज्ञानक्रियाकारियुक्तिरत्रातिदुर्लभा ।

श्रीभैरव उवाच ।

षोढा सम्बन्धतो ज्ञानं विभिन्नं यस्य चेतसि ॥ २३ ॥

न तस्य दुर्बला युक्तिर्भाक्ता याज्ञानदेहजा ।

वाच्यवाचकसम्वन्धः समवायः स योगगः ॥ २४ ॥

कार्यकारणरूपश्च साध्यसाधकलक्षणः ।

बोध्यबोधकधर्मश्च सकलार्थावभासकः ॥ २५ ॥

अभिधेयोऽभिधानात्मा वाच्यवाचकलक्षणः ।
शब्दार्थयोस्तु विज्ञेयः सम्बन्धः समवायवान् ॥ २६ ॥
सुप्रसिद्धो जगत्यस्मिन् ऊष्मा हुतभुजो यथा ।
वपुरासुरवैकल्यचिन्तादिप्रौढताम्बराः ॥ २७ ॥
अवबोधश्च संयोगसम्बन्धोऽयं दृश स्मृतः ।
आदिक्षांतार्णसंयोगवियोगाद्यर्थयोगतः ॥ २८ ॥
शास्त्रजालोद्भवे द्वे तु कार्यसम्बन्धदर्शनम् ।
साध्वीनां ज्ञेयरूपाणां हेयोपादेयतः ॥ २९ ॥
साधनाज्ञानसम्बन्धः साध्यसाधनलक्षणः ।
गुरुशिष्यप्रतिष्ठानां सम्बंन्धो बोध्यबोधकः ॥ ३० ॥
गुरुः सदाशिवः शिष्यः स्वच्छन्दाद् यत्र निश्चिताः ।
ज्ञानस्याराधकास्ते तु स वै ज्ञानप्रकाशकः ॥ ३१ ॥
तत्वज्ञानं पुरा प्रोक्तं शतार्द्धलिपिमुद्धृतम् ।
नादात्मकं समुद्दिष्टं शब्दार्थकृतनिश्चयम् ॥ ३२ ॥
शब्दकार्योत्थचैतन्यं स वै देवः सदाशिवः ।
असृजज्ज्ञानसन्तानमनन्तं स्वावबोधगम् ॥ ३३ ॥
यथा कश्चिन्नरोऽध्यात्मसंवेद्यत्वात् तु लक्षणम् ।
स्वान्तर्मुखं मुखं वापि बुद्ध्या बाह्ये प्रकाशयेत् ॥ ३४ ॥
स ईर्ष्यालुर्यथालोके स्वस्वभावान्तरङ्गगम् ।

Sampath_eBooks

शुद्धान्ताद्यंतगुप्तत्वात् प्रकाशपति निश्चितम्॥ ३५॥

तथा ज्ञानशरीरोऽसौ प्रकाशयति निश्चित ।

तथा ज्ञानशरीरोऽसौ ज्ञानानि परमेश्वर॥ ३६॥

शिष्याः शय्यानुरूपाणि नानाचाराणि दर्शयेत्।

विस्फुरत्स्वप्रभारश्मिमञ्जरीपुञ्जपिञ्जरः ॥ ३७॥

स्वतेजः स्वल्पसंस्थानकृतास्पदमहोदयः।

चूडामणिशिखाजालभाभिर्भासितदिङ्मुखः॥ ३८॥

रौद्री ज्येष्ठा तथा वामा शृङ्गा जयविभूषितम्।

इच्चादण्डत्रिशूलोग्रधारकः परमेश्वरः॥ ३९॥

श्रुतिपत्राम्बुजावस्थो ज्ञानशक्तिक्रियान्वितः ।

विश्वकर्मोदया शान्तः पत्रेषु युगलान्वितः॥ ४०॥

मोचिकादिमहावीरैर्भोक्ताभोग्यस्वरूपकैः ।

शतमन्योः ककुब्भाले मङ्गलाम्बुजमालितः॥ ४१॥

बभौ नभो युग्मयुतश्चैषः प्रत्येकं कमलाश्रयः।

स्वच्चन्दोन्मत्तक्रोधाख्यश्चण्डश्चोदितविग्रहः॥ ४२॥

संहारश्च कपालीशो बलवानकभैरवः।

कर्णिकासु स्थिता ह्येते विशिखेन विवस्वतः॥ ४३॥

शिपिविष्टान्तकायावद्विष्णोः पन्निलनन्दनः ।

महावरा समाख्याता ज्वाला वक्रांशुमालिनी॥ ४४॥

नारायणी च कन्दर्पा कंपनी मृगलाञ्छना ।

सुचिरोदरा महाभोज नाभिस्थानसमाश्रया ॥ ४५ ॥

स्वच्चन्दादिप्रियाः देव्याः क्रमशः संव्यवस्थिताः ।

प्रोच्यन्ते भोजमालायां युग्मानिदलगानि तु ॥ ४६ ॥

कङ्कालभैरवोच्चिन्नस्तथा तिलकभैरवः ।

हुङ्कारभैरवः श्रीमान् फट्कारश्च कपालधृक् ॥ ४७ ॥

संवर्तः सितनामा च तथा चासितभैरवः ।

प्रथमः प्रथमात्रश्च क्रोधो हयशिरां परः ॥ ४८ ॥

कपिलः काल करालोन्यो विकरालो च भैरवः ।

वज्रभैरवमन्थानमहामन्थानभैरवाः ॥ ४९ ॥

किङ्किणी जालसिंहश्च सिंहकेसरभैरवः ।

सिंहकेसरदा संज्ञा एकपादश्च भैरवः ॥ ५० ॥

भृकुटीजटाप्रचण्डाह्वचण्डोल्कासु मनोहराः ।

कान्तिः कमलभीसाह्वास्तथा विमलभैरवः ॥ ५१ ॥

खचितश्चत्रकान्तिश्च भैरवो दृष्टिनिर्मलः ।

भैरवः शेखरो नाम तथा शिखरशेखरः ॥ ५२ ॥

शशाङ्कशेखरः कूटभैरवः कूटो सुशिरोऽपरः ।

आह्लादभैरवः क्रूरः शशिकान्तिर्यथेत्थितः यथेष्ठितः ॥ ५३ ॥

विरूपाक्षो यमाक्षश्च दंष्ट्राकराल भैरवः ।

Sampath_eBooks

महाकपालसोच्चुष्मो महाकालश्च भैरवः ॥ ५४ ॥

झङ्कारश्चापि फट्कारो महाफत्कार भैरवः ।

अनन्तोऽनन्तविजय शिखाभैरव एव च ॥ ५५ ॥

वीणाशिखा ख शिखो भेरव एव च ।

वीणाशिखोऽथ लाङ्गलीश भैरवः परमेश्वरः ॥ ५६ ॥

मार्तण्डभैरवोऽघोरस्तथा चण्डोग्रभैरवः ।

एते वीराः समाख्याताः कलासंख्यानमाश्रिताः ॥ ५७ ॥

पूर्वात्पूर्वदला ह्येते मूर्तिवृन्दविभागगाः ।

रमन्त्यम्बुजमालायां सपत्नीका महाबलाः ॥ ५८ ॥

कंकालिनी महोच्चुष्मा तिलका हुंकारिणी परा ।

हुंकारिणी वषट्कारा वौषट्कारा नमस्क्रिया ः ॥ ५९ ॥

स्वाहा स्वधा मृतानन्दा मोहनी स्तम्भनीन्द्राणी ।

दहनी पचनी चैव भञ्जनी बन्धनोदरी ॥ ६० ॥

भ्रामणी मुद्रणी चैव क्रमणी क्षोभणी परा ।

विद्रावणी च वमनी त्रासनी शोषणी तथा ॥ ६१ ॥

मृतसञ्जीवनी चाथ ग्रसनी ह्रासनी तथा ।

मारणी द्वेषणी मथनी कर्षणी क्रोधनी तथा ॥ ६२ ॥

वेताली मालिनी माला लोलिहाना तु मालिनी ।

करङ्किणी च चाण्डाली कर्णामोटी विलासिनी ॥ ६३ ॥

कडेवरा करालाक्षी श्रीघोणा घर्घरारवा ।

घंघोरा गोमुखी गोप्त्री शिखण्डी पञ्चशेखरी ॥ ६४ ॥

आह्लादिनी द्युतिः कान्तिर्रिद्धि वृद्धिरथापरा ।

शान्तिःपुष्टिः सुतुष्टिश्च प्रसन्ना मृतमालिनी ॥ ६५ ॥

एताः सदाशिवे पीठे ह्यष्टाष्टकमिताम्बिकाः ।

अष्टाष्टकगते शुभ्रे रमन्त्यक्लिष्टसम्पदः ॥ ६६ ॥

सर्वज्ञानधरा देव्यो ज्ञानमूर्त्यनुगाः सदा ।

चक्राणां स्वांशसंस्थानामधेकार प्रदायिकाः ॥ ६७ ॥

कालसंकर्षणी देहनिर्गतानन्तलक्षणाः ।

ततोऽधः स्वबलालातज्वालाभाभिः प्रभास्वरम् ॥ ६८ ॥

विष्णुद्वादशकं वाक्यं शक्तिपर्यङ्कमध्यगम् ।

विष्णोरन्तर्गतं कौशिक्यां कौशिकस्य च ॥ ६९ ॥

श्रीवत्सः श्रीनिवासश्च श्रीगर्भो विष्टरश्रवाः ।

शौरी मधुलिहा भद्रा सज्जकेशी ह्यधोक्षजः ॥ ७० ॥

मेधाश्चेति महावीर्याः स्वशक्तिवलिशालिनः ।

सदाशिवार्पितात्मानो ज्ञानं पृच्छन्ति शाङ्करम् ॥ ७१ ॥

शुद्धबुद्धस्वभावस्तु शुद्धानामेव योगिनाम् ।

रुद्रोङ्कारस्ततोऽधस्ताद् विंशद्भिर्भुवनैर्वृतः ॥ ७२ ॥

महेश्वराभिलाषी च ज्ञानी ज्ञानधरोंऽशुमान् ।

चन्द्रापीडः सुरापीडस्तारापीडोऽमलेश्वरः ख महेश्वरः ॥ ७३ ॥

सुभीषणो विशालाक्षः कंदर्पः शशिभूषणः ।

पिङ्गकोटीरसामन्तो महासामन्त एव च ॥ ७४ ॥

नागो नागपतिश्चैव सुतारो पवनस्तथा ।

वाचस्पतेः समारभ्य ख सभारभ्य वीरमार्गेण संस्थिताः ॥ ७५ ॥

स्वनामपूर्वाः सर्वे ते रुद्रोङ्कारपरिग्रहाः ।

अमृतामृत ख देवस्य दिव्याज्ञानप्रकाशकः ॥ ७६ ॥

नादरश्मिविशुद्धाक्ष समध्यासितविग्रहः ।

आश्रयश्चेह सिद्धानां तद्धाम चरुभोजिनाम् ॥ ७७ ॥

अमृतामृत संस्थानममानुपरिनिर्मलम् ।

अमृतामृतदेवाय चायाभाभिः प्रभासिनम् ॥ ७८ ॥

प्रमोदामृतगंभीरा जीवानन्दसुनंदना ।

अमृतानन्दसुरानन्दवीजयानन्दमन्थराः ॥ ७९ ॥

सुधानन्दश्रियानन्दमङ्गलानन्दमङ्गलैः ।

उभः सर्वककुब्जाले स्वप्रभामण्डलोज्ज्वले ॥ ८० ॥

नित्यानित्यनिकायस्था शिवानां पत्युरिच्चया ।

शुद्धविद्याविधातार एते वीराः सुरद्विषः ॥ ८१ ॥

उक्तसीमान्तरे स्थानं स्फुरत्किरणसम्पदम् ।

नित्यानित्येऽथ देवस्य नित्यस्य च महोदयम् ॥ ८२ ॥

अनित्यस्य च देहस्य योगनिद्रालुकस्य च।
नीलग्रीवाम्बुजान्तस्य चित्रग्रीव सुमेधसः॥ ८३॥
विघ्नभैरवदेहस्य ह्येते दृग्गुणयोजकाः।
तेजोनिधिविशालांशुक्रियात्यन्तसमीरिताः॥ ८४॥
अमीषामन्तरे वासो विघ्नभैरवसंयुताः।
विघ्नेन्दुचक्रवातानां स्वतेजोंऽशविसारणाम् ॥ ८५॥
निर्विघ्नो ध्वस्तविघ्नश्च व विघ्न च विघ्नहा विघ्नसूदनः।
निर्विघ्नज्ञानदं ह्येतद् विघ्नभैरवपञ्चकम्॥ ८६॥
शिवपञ्चकमेतद्धि स्वबोधामनिवासिने।
प्रभावः समयःक्षुद्रो विमलश्च शिवस्तथा॥ ८७॥
शिवपञ्चकमेतद्धि शुद्धतारकधारकम्।
स्वबोधविमलादीनां बोधरत्नविशोधकम्॥ ८८॥
विमलः प्रचेता गहनो मन्दिरो विष्णुरेव च।
प्रलम्बश्च प्रमोदश्च प्रीतिश्चाभिरतिस्तथा ॥ ८९॥
एते हि गुह्यकेशेच्चाकुलत्रयसमर्थकाः।
तेषां यच्च यदस्थायि तत् स्ववीर्यप्रकाशकम्॥ ९०॥
संवर्त भैरवः कालः तथा कालानलो परः।
अघोरो घोररूपश्च ज्ञेयो घोरतरोऽपि च॥ ९१॥
अघोरश्चक्रवर्तीनामघोराणां प्रवर्तकः।

Sampath_eBooks

घोरोऽपि घोररूपाणामितरेष्टितरो मतः ॥ ९२ ॥

भैरवन्तुर्यमेतद्धि महेशत्रयबोधकः ।

ईशानश्च महेशानो वीरेशानस्तथा परः ॥ ९३ ॥

इच्चानिरञ्जनो नाम स्थानद्वयमथान्तरे ।

इच्चाशाली विशालाख्यः शेखरो रतिशेखरः ॥ ९४ ॥

चन्द्रोष्णीशौ देवेशो इच्चावरणवासिनः ।

निरञ्जनो निरालम्बो निरहो निरहङ्कृतः ॥ ९५ ॥

निर्ममश्च महावीराः पञ्चामी ज्ञानदेहिनः ।

महाप्रणवसायुज्यशिववृन्दप्रबोधकाः ॥ ९६ ॥

क्रोधो विभुः सुखं दुःखं सुप्रणीतः प्रणीतकः ।

जन्ममृत्यू जरोनड्वा दुरालोको दुराननः ॥ ९७ ॥

महातेजोऽथ मुण्डी च दिण्डिवीर्यविशारदः ।

ब्रह्मोदर्कौ ध्रुवो हंसः पिङ्गलेकाक्षमानसः ॥ ९८ ॥

प्रतोदो ब्रह्मरुद्रश्च महाप्रणवपार्श्वतः ।

संस्थिता वीरमार्तण्डा ः वीरज्ञानावतारकाः ॥ ९९ ॥

ततोऽधोनिधनो ज्ञानी तेजोंऽश च क्रियागतः ।

चन्द्रप्रभः सुनेमिश्च सुरामः सुमुखः स्वकः ॥ १०० ॥

निधनेशाधिकारस्थाः सर्वे च प्रभविष्णवः ।

यच्चन्ति शाङ्करं ज्ञानं क्रियाश्रयनिवासिनाम् ॥ १०१ ॥

पटरुद्धोऽम्बुराशिश्च नीलकण्ठोऽनलाननः ।
कदम्बः कङ्कवेतालस्तेजीशस्याप्यमी शिवाः ॥ १०२ ॥
प्रस्फुरत्स्वप्रभापुञ्जपिञ्जराः परिचारकाः ।
एतद्धि भैरवानीकं स्थूलसूक्ष्मगतिस्थितेः ॥ १०३ ॥
कार्यकारणयोस्तत्वे नादाख्ये प्रोदितं क्रमात् ।
भैरवाष्टशिखिज्वालादग्धमायेन्धना नराः ॥ १०४ ॥
रेमिरे यत्र सम्भोगैरिच्चाधर्मविधायिभिः ।
यत्र नातिशयैर्भोगैः मुक्ता ह्येकगुरुक्रमात् ॥ १०५ ॥
न कस्यचिद् बलाधिक्यं समानगुणतोऽपि च ।
देहाः प्रारव्धकर्माणो येषां खेचरतां गताः ॥ १०६ ॥
ते शक्तौ भुक्तसंभोगा लीयन्ते ते परे पदे ।
तत्र ते स्थायिनः सर्वे देदीप्यन्तः स्वतेजसा ॥ १०७ ॥
मण्डले श्रेयिनो भान्ति विश्वकर्मकरा इव ।
यदा चोपरतानन्तव्यापारः परमेश्वरः ॥ १०८ ॥
पररूपं समालम्ब्य स्ववीर्यमुपसंहरेत् ।
तदन्ते शेरते व्योम्नि कुटिलब्रह्मजे स्थिताः ॥ १०९ ॥
तदिच्चोच्चूनतायाश्च मुहुर्भवति स्वेच्चया ।
ततो बुभुक्षवो भूयो भोगाङ्ककृतनिश्चयाः ॥ ११० ॥
स्युः स्वस्थानगता ख गताः शेषा जग्मुराशु परिश्रियम् ।

Sampath_eBooks

शान्त्यतीतगुणकारणात्मकं शान्तिरूपकृतकार्यनिश्चयम् ॥ १११ ॥

भोक्तृभोग्यविभवप्रतिष्ठितं शब्दतत्वमिदमीशमुक्तितः ।

तुम्बुप्रभोजगतीमधिकृत्य विश्वं शान्त्यादिभिः ।

स्वतनुभित्र्यभयात्मिकाभिः ।

या संस्थितातिबलभूतिविलासः धात्री सा वर्ण्यते सुमुखि सम्प्रति

तुम्बुरुश्रीः ॥ ११२ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के कालसंकर्षण्याः पञ्चमः पटलः ॥ ५ ॥

षष्ठः पटलः ।

श्रीभैरव उवाच ।

अथाति नित्यो व्यक्तोऽसावागच्चन् यो निरामयः ।

मृदापूरणशैथिल्यात् मन्थरगतिः स्थितः ॥ १ ॥

महाव्यालशिरोरत्नशिखारूपभगात् प्रभुः ।

तत् तस्याः सकलं रूपं सकलं च कलाकृतम् ॥ २ ॥

शान्त्यातीतां च शान्तिश्च विद्या देहे प्रतिष्ठिता ।

निर्वृत्तिकस्य हृद्गुह्यपादयोः संव्यवस्थिताः ॥ ३ ॥

तुम्बुरुः शान्त्यतीतश्च चित्स्वभावस्तु कारणम् ।

शान्त्यादिभिर्जयाद्याभिः कार्यमस्य घनं शुचिम् ॥ ४ ॥

स्वप्रभामण्डलाटोपभासिताशेषविग्रहम् ।

सौम्यधामाश्रितानन्तमन्त्रनिर्झरसानुमान् ॥ ५ ॥

नानाविद्यामणिव्रातरत्नाशिरगाधवान् ।

मुद्रा हेमशलाकानां शक्रक्रीडाचलः प्रभुः ॥ ६ ॥

नानादामसदागन्धि : स्रक्कल्पाङ्घ्रितनुर्विभुः ।

शक्तिपीठकडिमुद्रां चण्डदोर्दण्डमण्डलः ॥ ७ ॥

विद्यास्यौ व रु विद्यास्यो मन्त्रद्दक्कौ च पादजङ्घोरुमण्डलौ ।

पाशाङ्कुशधरः श्रीमांस्त्रिशूलवरदोद्यतः ॥ ८ ॥

चतुर्मुखः सितारक्तपीतकृष्णहरिक्रमात् ।

विचित्रमण्डिसन्नद्ध मुकुटेन विभासिना ॥ ९ ॥

सुमेरुरिव यो भाति ज्योतिष्कोज्ज्वलसानुना ।

प्रोत्पुल्लानयनांभोज स्वपक्षभ्रमराकुलम् ॥ १० ॥

विभ्रन् मुखशिरोवृन्दं पश्य शोभां मनोहराम् ।

वक्रकुण्डलधारांशु ज्योतिपिञ्जरितानना ॥ ११ ॥

प्रस्फुरद्दशनोद्भूतमयूखैश्चाचिरोपमैः ।

ग्रीवाकल्पमहारत्नदीप्तदीपोत्सवप्रियः ॥ १२ ॥

सनातनगुणा यस्य देहमर्त्यमले नघे । ॥

पुष्परागमहारत्नहारधाराकरङ्कितः ॥ १३ ॥

श्रियं प्रवालशैलेयी मावहद्द्युतिनिर्मलाम् ।

स्फुरदङ्गदकेयूररत्नदीपमयूखिनः ॥ १४ ॥

महाव्यालसमा यस्य दोष्णो भ्राजन्ति कर्कशाः।

पद्मराग महानीलपुष्परागविचित्रया ॥ १५ ॥

काव्यं राजति सर्पेन्द्र व्योडञ्च इव मन्दरः।

स्पृशंत्युरू सुमुखराः किङ्किण्यो यस्य भास्कराः ॥ १६ ॥

वृन्तानि भूषितस्यैव सुशुभ्रा व्योमदन्तिनः।

काश्मीराम्बरसच्चन्नं नितम्बं यस्य विस्तृतम् ॥ १७ ॥

सरागमेघस्थगितसन्ध्यास्यमिव राजते।

मकाराननमञ्जीरहंसयुग्मरवाकुलम् ॥ १८ ॥

पादाम्बुजरजो यस्य वीरमूर्जसुखप्रदम् ।

यस्य नेत्राञ्जनेनांन्तविसर्पणनिरोधनम् ॥ १९ ॥

उवाह कुटिलोग्रोग्रमङ्कुशं जगदंकुशम्।

आलयं सर्वपाशानां मायेयानां वपुष्मताम् ॥ २० ॥

अधोर्ध्वे नागमापाशौघजन्यबन्धनहेतवे ।

स्थित्युत्पत्तिविनाशाय व्यूहमुख्यः समीरिणाम् ॥ २१ ॥

वामादित्रिशिखं शूलं यश्चोद्वहति लीलया ।पुंसां

वामबलाघ्रातचेतसामभिवाञ्चति ॥ २२ ॥

वरदानाय प्रोत्तानं व प्रोन्तानं योऽवहद्दक्षिणं करम्।

इत्येष तुम्बुरुः श्रीमांस्तत्त्वमीश्वरमाश्रितः ॥ २३ ॥

चतुर्दशमहापद्मशक्तिमण्डलमध्यगः।

मन्त्रविद्यास्त्रधाम्नां च पीठतूर्यविमालितः ॥ २४ ॥
दूतीगणसमायुक्तः किङ्करानुचरैर्युतः ।
संहारः प्रभवो वीरो झाङ्कारो घोषसंज्ञकः ॥ २५ ॥
उदर्कस्त्वत् स्वराजा च सुशिराः सुशिरेश्वरः ।
भवः शर्वः प्रभावश्च तारको भिन्नतारकः ॥ २६ ॥
हंसो माहेश्वरः कालो महाकालानलोऽनिलः ।
तैजसो विरजो वीरो विजयश्च विजम्भिकः ॥ २७ ॥
लोहदण्डो विकारी च पापभक्षण एव व रु मेव च ।
दशात्मा च नवात्मा च एकात्मा द्वादशात्मकः ः॥ २८ ॥
पञ्चाक्षरस्त्रिवर्णश्च खखनिरवधीरकः ।
चन्द्रगर्भः सुरागर्भः श्रीगर्भोनरगर्भक ः॥ २९ ॥
क्लिन्नानन्दो महानन्द उच्चिष्टानन्द एव च ।
विजयानन्दो भवानन्द स्कन्दानन्दो महावलः॥ ३० ॥
क्रियानन्दः सुरानन्दो ह्युन्मत्तानन्द एव च ।
कुसुमानन्दो मन्मथानन्दवित् पुरा ॥ ३१ ॥
एवमादिभिरन्यैश्च बिन्दुरूपैर्महावलैः ।
अनन्तं मानवं पीठं तुम्बुरोर्वारणं स्थितम् ॥ ३२ ॥
वेद्यं चापि महावीर्यं नानाभोगप्रसाधकम् ।
घोषावती सुघोषा च कलालापा मनोहरा ॥ ३३ ॥

वीणामणिजयादीनावीणाविद्यासुशान्तिकाः ।

जम्भनी मोहनी चैव स्तम्भनी ह्यन्धनी परा ॥ ३४ ॥

महाबला कालारात्री-------ं निरङ्कुशा ।

चेदनी भेद सुरभिर्मृतसंजीवनीं धनीम् ॥ ३५ ॥

मायाबीजोत्तरा रम्या सौम्या सम्मोहनी स्मृता ।

भृगणी नीलपताका सुश्रिया सुरसुन्दरी ॥ ३६ ॥

संदोहा सङ्गता लीला वसुधारा सुमण्डला ।

मातङ्गिनी मदोन्मत्ता कौसुमा कुसुमावती ॥ ३७ ॥

किण्किराता किराता च चाण्डाली चण्डविक्रमा ।

महाविद्या मिताहारा श्चुन्द तारा च शाबरी ॥ ३८ ॥

पण्याका पण्यमातङ्गी डोम्बि डोम्बिलका शिवा ।

फलाहारा सुराहारा रक्ताहारा नराशना ॥ ३९ ॥

कादम्बरी विशाला च कल्याणा करपूजिता ।

नितम्बमाली मदिरा कन्दर्पा भोगमालिनी ॥ ४० ॥

असिधारा सदाक्लिन्ना रतिक्लिन्ना सुधास्त्रवा ।

सर्वकल्याणहेतुश्च कामधेनुस्तनार्थगा ॥ ४१ ॥

कल्याणी कामधेनुश्च गुह्या गुह्येश्वरी प्रभा । चन्द्रप्रभा चत्रप्रभावामु

ण्डमालिनी ॥ ४२ ॥

करंका चिपिटानासा वलास्या रुणजन्मना ।

पिशङ्गी क्रमधान्या च कल्माषवदनोदरा ॥ ४३॥

एवमेता अनन्तास्तु विद्यापीठेति लालसा।

विजृम्भन्ति महाविद्याः स्वाधिकारपरानुगाः॥ ४४॥

विद्यैश्वर्यस्तथा चान्या योगक्रीडाविलासदा ।

स्वभक्तैर्भो व स्वभक्तभो रमन्त्यत्र शक्तिरिच्छाविधायिका॥ ४५॥

अम्विका ब्रह्मवेताली भृगुली स्थाणुमत्यपि।

रूपिणी च महाज्वाला मालिनी परमेश्वरी॥ ४६॥

वेताली चैव गौरी च नन्दिनी विनता परा।

अघोरा सुप्रिया रक्ता वामेशी च कपर्दिनी॥ ४७॥

रत्नमाला च भुद्याङ्ग संख्या विद्याविनायिका ।

पूर्वपत्रे जया देवी दक्षिणे विजयेश्वरी॥ ४८॥

वामपत्रेऽङ्गिता ज्ञेया शिबिकाङ्गे पराजिता।

वीणाहस्ता महादेव्यो मातृ युक्ता महाबला॥ ४९॥

आसां सायुज्यगाश्चात्र दूत्यो ह्युपलभन्ति हि

बला नीला खरा काला दुर्भगा सुभगा परा॥ ५०॥

ऊहनी च कराली च चर्मा च मदनोदया।

अनङ्गकुसुमा चैव तथा चानङ्गमेखला ः॥ ५१॥

पवनव्योमवेगा शम्भो शशिरेखा मदनातुरा।

मन्मथा च मनोहारी विपुला विपुलेश्वरी॥ ५२॥

Sampath_eBooks

चित्रलेखा च चित्राङ्गी चित्रग्रीवा विलासिनी।

इत्येवमप्रमाणीभिर्दूतीभिर्वहुरुपितः ॥ ५३॥

सुप्रभा मण्डलालातैः वीजभा कुकुभां तिमिरारिभिः ।

समाकीर्णमिदं तन्त्रं योगिनीभिश्च कोटिशः॥ ५४॥

समस्तपीठसन्तानास्ताश्चासंख्याता महाबलाः।

संस्थिताध्वनिविस्तीर्णे पत्युरिच्छाभिधायिकाः ॥ ५५॥

किङ्कर्याश्चात्र दूतीनां तत्र भावमुपागताः।

रमन्ति तु समुत्थानं देवतानां प्रसादतः॥ ५६॥

हालाहलोऽभ्रमातङ्गो करालो वडवामुखः।

केवलः पिङ्गकेशश्च वल्कलः केकरेक्षणः॥ ५७॥

कोलाहलो बिडालश्च हिडिम्वो विकृताननः।

क्रोधनो तुन्नतश्चैव कड्डनोऽथ गजाननः ॥ ५८॥

एते हि किङ्कराः प्रोक्ता युक्ताः स्वानुचरैः प्रिये।

जुषन्ति विपुलान् भोगानुपेयान् वामसाधितान्॥ ५९॥

पूर्णांशश्त्रिशिखाः कङ्को लम्बोष्ठो गुदलोचनः।

उरोमुखोऽङ्घ्रि जिह्वश्च गुदवक्रोऽलकाननः॥ ६०॥

नवशीर्षोष्ट्रशीर्षश्च विपाणिर्द्वादशभुजः।

कृष्णकं विलकोद्धुणुकरिमेढ्रः खरध्वजः॥ ६१॥

भगाननो भगाक्षिश्च सोपनासो घटोदरः।

हिडिम्बो नाडिजङ्घश्च चकः पारावतो हरिः ॥ ६२ ॥

एतेऽत्रानुचराः प्रोक्ता नानारूपा महाबलाः ।

क्रीडाविलासनिरता नीलरक्तार्जुनासिताः ॥ ६३ ॥

बभ्रुलो हामिलोनाभः सर्वे ते तु सकिङ्कराः ।

पोषकानां गणश्चान्यो नानारूपोऽतिवीर्यवान् ॥ ६४ ॥

वर्ण्यते लेशतः सोऽपि व्यापृतत्वव्यवस्थितः ।

तृनुत्तमवपुः शूलं पर्यङ्काङ्कः स्वकच्चकः ॥ ६५ ॥

शृंखलासृणिदण्डश्च मुद्गरः पट्टिशोऽबुजः ।

कुब्जोरागावतिवलोवरदानं कहारकौ ॥ ६६ ॥

वेणुकोटीकुटीधर्मत्रिरिषुवित् स्रुची ।

स्रुवः सन्देशकः पाणिर्भिन्दिपालः कटेच्चरः ॥ ६७ ॥

विकरालं झषः कुम्भं सर्वराकर्षरङ्गलः ।

कङ्कापटी च भ्रुकुटिर्भ्रामणी क्रमणी फलम् ॥ ६८ ॥

विकराला कराला च लेलिहानानुभिर्विरा ।

मुसलोलूखलं चक्रं पलकुम्भं वितानकम् ॥ ६९ ॥

तोरणस्ताडिमुकुलकबन्धाच्चिन्नकन्धराः ।

हरो विदारणी रौद्रीश्यावा माला सुमङ्गला ॥ ७० ॥

करङ्किणी विलोलाक्षी वैजयन्ती मृगानना ।

हालाहला प्रसन्नास्या योगिलिङ्गानुक्षोभिणी ॥ ७१ ॥

Sampath_eBooks

वल्गिनी नृन्तनी हसनी रोदनी पदगायनी ।

कम्बुकच्चपबीभत्सा वर्षे दुर्मुकलात्मिका ॥ ७२ ॥

पञ्चशेखरिणी सुमना सुमर्ती च मनोहरा ।

सप्तध्वजा च गायत्री सावित्री हंसरीन्दिरा ॥ ७३ ॥

ग्रहणी मोक्षणी सूचि पिंचिका सुरमुष्टिका ।

षट्कण्टका सुषण्डिश्च बीजाख्या दोलसंज्ञका ः ॥ ७४ ॥

नन्दिनीविजयाज्ञानीरसवत्यः स्वरोदरा ।

पुष्पवृष्टिः पयोवृष्टिः रसवृष्टचव गूहनी ॥ ७५ ॥

अलाभारविपञ्चीत ख अलाभान- पटही डमरुद्रिका ।

कूर्मनादा महामुद्रा जटाभारकलापिका ॥ ७६ ॥

एकावली च मञ्जीरा काञ्चीतिलककुण्डला ।

दौर्दुरा त्रासनी शूर्पाचादनी विकृतानना ॥ ७७ ॥

शशकर्णी कालकर्णी पुण्डरीका शकुन्तलाः ।

दन्तुरावन्दुनीचैलातुलाकबरिकापराः ॥ ७८ ॥

धम्मिल्ला मुकुटाख्यां च प्रासादरथतोरणा ।

बीभत्सा चर्दिनी ताला ज्वालामुद्रा सुतार्णिनी ख सुवर्णिनी ॥ ७९ ॥

मनोरथामहाघोरासुस्थितासुमनोरथाः ।

एवमादिविचित्राभिर्मुद्राभिर्वपुषोज्ज्वलम् ॥ ८० ॥

क्रियापीठमिदं घोरं सालोक्यस्यापि तुम्बुरोः ।

वेद्यं सायुज्यकं ज्ञेयं सामिप्यसुरभिं प्रिये ॥ ८१ ॥

सर्वाः स्वरूपवपुषः सम्पूर्णावयवाः शुभाः ।

त्रिस्वरूपा महादेवि मुद्रापीठे त्विमा स्मृताः ॥ ८२ ॥

विलक्षणेऽवज्ञायन्ते स्वशिरोऽर्थैस्वरूपिणः ।

रक्षावत्यो महावीर्या मन्त्रविद्यार्जिते सदा ॥ ८३ ॥

विस्पुरजितवलालात चक्रज्वालाति भास्वरा ।

प्रतिभानान्धकारोग्रतनवो विश्वकर्मणः ॥ ८४ ॥

यन्त्रस्थं तत्र पीठं हि स्तोभनं सादनं महत् ।

अण्डवच्चिवसंख्यानमन्त्रोऽध्वनि चकाशते ॥ ८५ ॥

मन्दरं मेरुसंज्ञञ्च दिग्गतं सर्वकामदम् ।

मण्डलाभ्युदयं सिद्धकामाभ्युदयनामिनी ॥ ८६ ॥

अनन्त विजयं लिङ्गं त्रैलोक्यविजयं धनुः ।

योनित्र्यशीतिु षट्कर्णमष्टकर्णं कुशेशयम् ॥ ८७ ॥

ससक्तं विजयं भद्रं सर्वतो भद्र सुन्दरम् ।

ऐन्द्रांतरं गजास्यन्तु स्वस्तिकं नन्दिवर्धनम् ॥ ८८ ॥

नन्दिकावर्तनं किन्तु केयूरं हरलोचनम् ।

विद्याधररतं कान्तं चित्रं चित्रवितानकम् ॥ ८९ ॥

महोदयं सुवीथिं च दुर्गसंसक्तवीथिकम् ।

एकवीथिञ्च त्रिचतुष्पञ्चवीथिकम् ॥ ९० ॥

मनोदयं महारौद्रं सुचित्तं विजयं लवम् ।

सन्दोहविजयानन्दमुक्तादाममनोहरम् ॥ ९१ ॥

मणिदामेन्दुलेखन्तु शुक्लचामरमण्डलम् ।

क्षीरोदममृतोदञ्च सर्वकामालयं परम् ॥ ९२ ॥

धनश्रीशौर्यसौभग्यं कालालयपुराणि च ।

चतुःषडष्टद्विदशकलाव्यक्तारकालयम् ॥ ९३ ॥

विचित्रचक्रे ये द्वेऽन्ये विद्यामन्त्रोदयेऽपरे ।

घटतालु घटद्रव्यं भद्रप्रासादवक्रकम् ॥ ९४ ॥

श्रीपीठं श्रीवितानञ्च वीराभ्युदयमेखलम् ।

मण्डलाभ्युदयं चैव शिवनीडसुमालयम् ॥ ९५ ॥

शत्रुघ्नं शर्वरादित्यं तारकं चित्त्रतारकम् ।

मात्रानन्दं शिवानन्दं योगिन्यानन्दमेव च ॥ ९६ ॥

इत्येतच्चित्रविन्यासं मनःशोभाविलासगम् ।

तेध्यन्तेजो मयूरवोदयि स्वाधेद्धासितं श्रितम् ॥ ९७ ॥

आसनीश्वरवीर्येण व वीर्गेण यत्र वीरा अधोबलाः ।

विचित्रभोगवपुषः चित्रलीलाविलासिनः ॥ ९८ ॥

विद्येश्वरी मुखेन्दूत्थ भाभिर्व्योम्नि प्रविस्तृतैः ।

यत्र चन्द्रातपच्छाया नापास्यति कदाचन ॥ ९९ ॥

सन्दोहानेकनिस्पन्दवपुष्मन्वीरचेतसाम् ।

मण्डलान्तकासोच्चैर्यद्व्योमेद्धेन्दुमण्डलैः ॥ १०० ॥

विद्युद्दिका च तेजांसि मन्त्रावेशितविग्रहा ः।

चक्राशिरेण वै केचित्संहारनिरताःस्त्रियः ॥ १०१ ॥

स्वसाध्यमन्त्रप्रतिमानुरूपकमवाप्यकेचिद्बलशालिनो नराः।

प्रियाभुजाश्लेषणगाढगूहितात् मदालसा श्लाध्यतमञ्च रेमिरे ॥ १०२ ॥

विकाशिनीलोत्पल पत्रचक्षुषी शशाङ्कविम्वोदयभाञ्जिकल्पना ।

मदालसत्कोमलबाहुमण्डला यन्त्रानुविद्धाहिमनाथयोगिनी ॥ १०३ ॥

स्फुरत्कलालापविलासकोमला विलासवत्यो ललितांगुलीहतैः।

विचित्रतन्त्रीविवृतां कलस्वनैः केषान्न चेतांसि मुमोह रुच्चकैः ॥

१०४ ॥

प्रतप्तसिद्धाङ्ग मयूखजालैस्तेषां स्फुरन्मूर्द्धमणीन्द्रचन्द्रकैः ।

विद्या कपोलेन्द्र रुवाव गूहिता यत्रेशलक्ष्मी परमामगात् कलाम् ॥

१०५ ॥

शिखण्डिनश्चन्द्रकलापशेखराश्चूडामणीनां वहुवर्णभास्वरैः।

केषांचिदाकल्पविचित्रिताननना धृतेन्द्रचापा इव रेजिरे दिशः ॥ १०६ ॥

यत्र चन्द्ररविरत्नकृतानि पुष्परागवरनीलचितानि ।

पद्मरागमणिभित्तिगृहाणि व्योम्नि रेजुरिव शक्रधनूंषि ॥ १०७ ॥

वीरवक्र विपुलेषु सदस्सुअक्षगेन जगामचकासम्।

प्रेयसां मुख विधौरवलीकाश्चक्षु रुपलचिरं सुविकल्पैः ॥ १०८ ॥

Sampath_eBooks

चित्रभित्तिवपुषा विराजितां योगभूतिविपुलामितसाराम्।

भूतिभावगुणभोगविलासां वक्तुमत्र न शशाक शिवोपि ॥ १०९ ॥

किं पुनस्तु वयमल्पमनीषास्तन्मयूखवशभावितविद्याः।

ब्रूम एकलवमात्रमपीन्धं प्रोक्तमेतदजवास तथापि ॥ ११० ॥

तत्राधिकाराश्रयिणस्तु किञ्चित् किञ्चित् सुभोगाश्रयिणोऽनुबन्धाः ।

केचिच्च भोगा विकृतीर्जुषन्ति महेश्वरेचाङ्कितचित्तधर्माः ॥ १११ ॥

विवक्रजात्यामलजानि तेषां वपूंषि भास्वज्जनितानि वापि ।

भोगान्धकारान्तमुपागतानि स्वयोनियन्त्राणि निलयं व्रजन्ति ॥ ११२ ॥

विद्याधिपा भोगजमन्त्रवीरास्तेऽनन्तपूर्वाः स्थिररश्मिधर्माः।

शक्तीच्चया जृंभितवेतृभावा महीनुभावाधिकृतानुमार्गाः ॥ ११३ ॥

ब्रह्मा वकाङ्ग प्रभविष्णु वेगारनन्त सूक्ष्मोत्तमन्त्रयं सनाम्नः।

एकक्षणैः केशविभक्तसंज्ञः श्रीकण्ठ देवशशिखण्डितात्मा ॥ ११४ ॥

एतेसु विद्येश गतौकसं श्रीः नियोगभोगाहितचित्तधर्माः।

स्वगोचरालोचित भद्र धाम्नोभ्रातुः प्रसादाविरजं भजन्तिः ॥ ११५ ॥

गतेन्धहीने परमात्मयोगं स्थानं वरीयः समधीत्य शेषाः।

सूक्ष्मादयोऽन्येशमनस्थितेन सिद्धेन कृत्यं समश्नुवन्ति ॥ ११६ ॥

शक्तिः श्रियो निर्गतपद्ममालाः समन्ततो रेजुरनन्तलीलाः ।

शिखण्डिरत्नद्युतिभग्नभीमा हर्म्याधिपानां वपुषोज्ज्वलेन ॥ ११७ ॥

अस्यार्धभागे सुविशुद्धगोत्री वागेश्वरी ज्ञानविशुद्धबुद्धिः ।

विशुद्धविद्येति च नामभिर्यागीतोच्यते सा त्वधुना समासात्॥ ११८॥

ऋतुश्रियोपास्यमालाविशेषाद्विशोध्य चित्तं मलिनन्तु तद्वत्।

यावन्धनं वध्यति योजकं च प्रकाशते सौ व्यति शुद्धविद्यः॥ ११९॥

वीर्याञ्चिता भोगविलासररम्या वामादिकास्थाष्वनियोगवत्यौ ।

यवीयसिद्धास्तु गणें पदस्थं लीलालसैश्चक्षुभिरीक्षमाणाः॥ १२०॥

ज्येष्ठादिवामा रुतशक्तिरुग्रा कालीकराली ।

बस्य शक्तिर्वर्मनी परा केशान्तभूषा च मनोन्मनी च॥ १२१॥

ज्ञानात्मकः शक्तिगणोऽयमन्यः क्रियात्मकोऽसौ विभुबोधकर्ता ।

वाग्वाग्वती चैव सदाथ वामा ज्येष्ठाथ रौद्री द्विनखागणौयम् ॥ १२२॥

रौद्री सुगोत्री जननी सुनेत्री ज्वालाथ योक्री विकरा च वामा।

आह्लादनीया भावनी च संक्षोभिका स्तम्भकरी च भक्तिः॥ १२३॥

त्राणा सरौद्री दशषट्सुदीप्ता गभस्तयोन्यंगसुरूपकाया ः।

त्रिंशश्चतुर्योनिगतस्य वाच्या वामादिकारोद्धय वसानिका तु ॥ १२४॥

सन्तोषसूर्यस्य सरोजवृद्धा ः पयोधरिण्यो सितपद्मनेशः।

वपुर्विभूषारुण रक्ताङ्गान्संधीयमानाः विहरन्ति देव्यः॥ १२५॥

क्रीडाविलासैर्मदनानुरागा --मन्त्रगणैश्च सार्द्धम्।

क्रीडावतीनां वरगुह्यकानां न चात्र तत्वेऽस्ति वरं प्रमाणम्॥ १२६॥

संवित्तिरूह्या व रु संवत्तिरूह्या ह्युपलब्धिमूडानकांचितर्कानुभवो

विचेष्टा।

Sampath_eBooks

तारासु तारात्रयं --तारयन्ति प्रमोदिनी मोदमाना ॥ १२६ ॥

सदा प्रमोदा विमला सुरम्या षोढादशैतास्तु विवेकविद्याः ।

शुद्धं विवेकं परयुक्तिभाजमाविश्य चित्तं जनयन्ति पुंसाम् ॥ १२७ ॥

रुद्राणवश्चाप्यकृताधिकाराः पिपासबोऽध्याससमग्र सौख्यम् ।

धातुर्मरीच्यर्गलया निरुद्धा नियोगिनो ह्यत्र शिवं व्रजन्ति ॥ १२८ ॥

उदितामलमार्गसन्ततिर्भुवनेशैः सहिताभिलाषिभिस्त्रिभिरीश्वर ।

नो चोरेच्त्त्रिभिरीश्वरमूर्त्तिभिर्युता विपरीताप्यधुनोच्यतेखिलाः ॥

१२९ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शति साहस्रे प्रथमषट्के कालसंकर्षिण्यां षष्ठः पटलः ॥ ६ ॥

सप्तमः पटलः ।

श्रीभैरव उवाच ।

अथ पुंसां कलाजालं योगिनां कर्मणां वधः ।

व्यापकव्यापिकानान्तु मायाव्यापकचोदनात् ॥ १ ॥

श्रीदेव्युवाच ।

सत्यं माया त्रिकं ह्येतद् व्यापकं यदि शङ्करः ।

तदा तनुसमायोगोत्पत्तिः पुंसोः कथं भवेत् ॥ २ ॥

व्यापकत्वाच्च शम्वर्याः शुद्धज्ञानी न जातुचित् ।

भवेतां दंपती नैव तद्योगाद्धर्मनिर्मलम् ॥ ३ ॥

मायाधिकारिणः सर्वे ये प्रोक्तास्तत्वतुर्यगाः ।

वर्णितः शाश्वतो भोगो न च तेषां भविष्यति ॥ ४

प्रयत्स्येऽहं तवापीश तद्व्याप्तिर्दर्शनामृते ।

तन्मन्त्रं प्रापितं ह्येतदविरुद्धं कुरु स्वकम् ॥ ५ ॥

स्फुरद्द्वणचन्द्रांशुर्भाभिभासित विग्रहम् ।

प्रहस्योवाच मौलीन्दुरश्मिरञ्जितधूर्जटिः ॥ ६ ॥

दारूपलान्तर्गतजीवदर्शनात् प्रयोजकस्यात्मनि सङ्गमस्थितिः ।

प्रकशते व्यापकता सदात्मनो विश्वे तु विश्वेऽनुभवोपलक्षिताः ॥ ७ ॥

व्यापकस्य वपुर्योगनिमित्तं प्रागुदाहृतम् ।

दुष्टधातुप्रबोधाय विषदं प्रतिपाद्यते ॥ ८ ॥

पुस्पञ्जन ख पुंस्पञ्जन विभोः सङ्गे योऽसौ सोऽनादिमात्मनः ।

तेनतत्तेजसोर्यद्वदेकत्रात्यन्तसंस्थया ॥ ९ ॥

मूर्चा प्रभावतो देहमाप्नोति विभुरप्यणुः

दृक्स्वभावाच्चिवत्वं च स्वभावस्त्वनयोरयम् ॥ १० ॥

धूमान्धकारकृद्यद्वत् प्रकाशोद्योतको विभुवि ।

तद्वन्मलशिवत्वे द्वे स्वस्वभावामहेश्वरि ॥ ११ ॥

निमित्तबीजसंयोगात् कारणानि वपुःकृते ।

नारकात्म्याग्रहैर्निर्वार्यन्ते केन देहिनाम् ॥ १२ ॥

विशेषसन्निधेर्वङ्केरयस्कांतेर्यथा प्रिये ।

Sampath_eBooks

तथार्णोविग्रहौ व ख तथाणोर्विग्रहो दृष्ट्वा तावन्मात्रौ च तौ नहि ॥

१३ ॥

न चापि तन्तुसंयोगाद्विभुत्वं तस्य दीयते ।

प्रासादहर्म्यभिर्व्योम न कदाचिद् विलुप्यते ॥ १४ ॥

व्यापको न कलाकायमसृजद्यदि स प्रभुः ।

तदा तु कर्मणोपान्तफलानां संभवः कुतः ॥ १५ ॥

दृक्क्रियादेहिनस्तस्य शक्तिदेहस्य शूलिनः ।

सर्वावस्थानदोषो न सर्वकर्तृत्वहेतुतः ॥ १६ ॥

चलहृच्चञ्चलस्थित्यात्रतगा सता तथा ।

भवते बलवीर्यं स्याद् व्यापाराद्या यशस्विनि ॥ १७ ॥

तद्वत् तद्यापकं बीजं समलोष्ठं तु निष्प्रभम् ।

जगत्कर्तुर्विशेषाय आशीविषमिवोरगैः ॥ १८ ॥

चक्षुर्विषानलोयद्वल्लोकेषु तलवासिषु ।

भुजङ्गेन कृताबाधस्तद्वन्मायामितेऽध्वनि ॥ १९ ॥

श्रीदेव्युवाच ।

अव्यापारन्तु शम्बर्याः शिपिविष्टेन देहिना ।

विद्याद्याः स्थानिनः सर्वे देहा मायात्मिका मताः ॥ २० ॥

श्रीभैरव उवाच ।

अथर्वणक्रियोपास्तैः पशुमन्त्रैस्तपस्विनाम् ।

पुराणैर्मन्त्रकृत्यानि न श्रुतान्यचलात्मजे ॥ २१ ॥

अनरण्यस्य नृपतेर्दर्शिता प्रेयसी मता ।

पूर्वरूपधरो मन्त्री रम्भाक्षेण तपस्विना ॥ २२ ॥

कपिलाक्षानला ज्वाला भस्मीभूतश्चलासिनाम् ।

सगराय वैजयन्मन्त्रो मन्त्रमूर्त्तिः प्रदर्शितः ॥ २३ ॥

वाल्मीकजनितैर्मन्त्रैः कुशः कुशमयः प्रिये ।

जानकीहृदयानन्दश्चिरञ्जीवी न किं श्रुतः ॥ २४ ॥

बीजरूपन्न कामोत्र तस्याभावान्न मोहनी ।

यन्न कर्ता च न चाप्यायुस्त्रिकमप्यानयत् स्थितम् ॥ २५ ॥

कालो रागहृतं प्राणः प्रयात्यभिमतः स्थितः ।

शम्बराधिष्ठितोऽनङ्गो देवदेवाधिभोगभुक् ॥ २६ ॥

प्रारब्धकर्मणा हीनं तैरेव हि कलादिभिः ।

निबद्धं धारयेत् कायं मन्त्रः पुरप्रवेशकः ॥ २७ ॥

मन्त्रव्यापारिणां बुद्धिः कार्यमायाति सूरिभिः ।

तेऽन्यथा भावकर्तारः सत्स्वसत्स्वपि सुन्दरि ॥ २८ ॥

बीजानुसङ्गतज्ञानं सङ्कोचमधिगच्चति ।

नास्तङ्गस्तिभिरैर्दृष्टः क्रोडीकृतः क्वचित् ॥ २९ ॥

पत्युरुत्सङ्गिनां तावत्शुद्धस्थानप्रभावतः ।

न वीर्यं दर्शयेद्योनिं ज्ञानिनामितरोऽपि नो ॥ ३० ॥

Sampath_eBooks

बीजोत्थवपुषो यास्तु योगिन्यश्चित्रविक्रमाः ।
न तासां पाशवं ज्ञानं पाशसंयोगतोऽपि हि ॥ ३१ ॥
हुतभोज्यान्तरस्थायिज्ञानं कासाञ्चिदद्भुतम् ।
दैविकाभिस्तनुर्वीरा नानापीडाप्रपीडिताः ॥ ३२ ॥
यतो तो निजवीर्येण हेमकारनिरोधिका ।
पतिर्ज्ञानस्य चैवेश सर्वस्यास्य परायणः ॥ ३३ ॥
यथा व्युच्चिन्न सन्तानैर्वैलोच्चैर्मरुतो वशात् ।
तथा कलादिका माला हेतुतो विग्रहे रणान् ॥ ३४ ॥
कालान्तरैकदेशस्थं धामरोधक्रियोद्गमम् ।
कुरु विद्याप्यविद्यायाः संस्था संस्था च कर्मसु ॥ ३५ ॥
रागोरगप्रकामस्तु लिप्सिषुः शशिना सितः ।
आशापाशोपभोगानां काङ्क्षया ह्यपक्षते ॥ ३६ ॥
उच्चादिभिः कलाभिस्तु कालं वक्ष्यामि वर्पणा ।
गर्भतालुतलस्थायि व्यवस्थानं न यत्यपि ॥ ३७ ॥
प्रधानदेहिनो ह्येतदसाधारणतां गतम् ।
तत्र षट्कं तु मायीयं साव्यक्तं सततोद्भवम् ॥ ३८ ॥
श्रीदेव्युवाच ।
प्रदानपञ्जरं ब्रूहि नरसिंहावरोधकम् ।
वत्सकालाच्च हर्म्याणि बीजं धान्यादितः प्रभो ॥ ३९ ॥

श्रीभैरव उवाच ।

यत् तद् भयं उर्कभासि ख ऽकंभासि मीनमम्बुजजन्मनः ।

तस्याधोभागगो भाति पुरदृष्टान्धकारकाः ॥ ४० ॥

शेषाहिफणमाणिक्यं विश्वकर्मप्रसादतः ।

ततो मन्दरखुम्नाग्रघृष्टनिष्ठ्यूतवह्निना ॥ ४१ ॥

प्रदग्धपृथुपृष्ठस्य कूर्माक्षस्य पुनर्महत् ।

अनन्तशक्तिचन्द्रांशुपीयुषोर्मिभिरुल्बणैः ॥ ४२ ॥

आलिङ्गनक्रमादुत्त्येरप्रतापो ः यथोत्सवम् ।

भुवनं तस्य वीरस्य भात्यनन्तस्य स्वश्रिया ॥ ४३ ॥

अनन्तवनितावक्रपद्मखण्डसरः सदा ।

ततो हूहुकरुद्रस्य चूडामणिविवस्वतः ॥ ४४ ॥

त्विषा प्रध्वस्ततिमिरं पुरं वीरगणाकुलम् ।

वज्रोपलमहारत्नविनद्धमुकुटोल्लसत् ॥ ४५ ॥

चन्द्रिकापाण्डुरं धाम शेखरस्य विराजते ।

मौलीन्दुकरक्षरितसुधया पाण्डुरत्विषः ॥ ४६ ॥

मौलीन्दोर्नगरं रम्यं ततः सर्वगुणोदयम् ।

विश्वश्रीविश्वविस्पन्दच्चुर्दिताभ्राजते यथा ॥ ४७ ॥

सा विश्व मन्दिरमा ततस्तूर्ध्वमनोपमा ।

सर्वमाधेयमगमज्जगद्यस्याः स्ववीर्यतः ॥ ४८ ॥

Sampath_eBooks

सा सर्वाधारभूर्लक्ष्मीर्लक्ष्मीवत् प्रविजृम्भते ।

जगतां संपदो दिव्या ना गुप्तस्तुल्यतां यतः ॥ ४९ ॥

जगतोपि पुरं संज्ञामाह जगत्पतिः ।

ततो धर्मे धुराध्यक्षविभवेन्दुमरीचिभिः ॥ ५० ॥

व्योमेव पत्तनं भाति ज्योत्स्नाचन्द्रातपे कृतम् ।

कन्दर्पदर्पहुतभुक्कणरेत प्रदीपितैः ॥ ५१ ॥

प्रज्वलद्भिः परं लीलां तेजस्तत्वं विलम्बते ।

पालयेज्जगतीं विश्वां गतामालयगोचरे ॥ ५२ ॥

यतो नः पालकाः सश्रयो रराज नगरेच्चया ।

ध्रुवाक्षाक्षोत्पलरुचा श्यामायितदिगन्तरम् ॥ ५३ ॥

पुरं रौप्यमिवाभाति निर्मलं चन्द्रबिम्बवत् ।

हर्म्यभूमिगिरीलानां पतिभावा इलापतिः ॥ ५४ ॥

तच्चायाच्चुरितं धाम राजते रवि बिम्बवत् ।

हरिगोपालमाणिक्यभासालिङ्गितमण्डलम् ॥ ५५ ॥

सन्ध्यास्थानमिवश्तां भ्राजते पद्ममालितम् ।

तस्योदग्रोरुधवलहर्म्यमालाविराजितम् ॥ ५६ ॥

व्योम्नीव मण्डले इन्दुः सुराध्यक्षं महत्पुरम् ।

महानीलाचितोत्तुङ्गभित्र स्फुरितया रुचा ॥ ५७ ॥

कालिकेव पुरी भाति प्रमोदस्य तदूर्ध्वतः ।

स्फुरन्मरकतरुचा प्राकाराङ्गसमुत्थया ॥ ५८ ॥

प्राक्प्रावृत्तसुधालीलां सौभद्रा विदधौ पुरीम् ।

नीलकेशवपुच्छायाच्छुरिता खेटमन्दिरम् ॥ ५९ ॥

विष्टपं मरकतद्रावावुत्कीर्णमिव राजते ।

पिनद्धसित माणिक्यवैजयन्तीभिरुच्छ्रितम् ॥ ६० ॥

चिन्मात्रं भुवनं भाति स्फुरिताकैंरिवाम्बरम् ।

स्वावस्थास्थायिबलतः शौर्यं श्रीरपरिव्यथः ॥ ६१ ॥

अधोऽधः शेषमार्गस्य सर्वाध्वगधराश्रयः ।

मौलिचन्द्रकलापांशुचन्द्रिकोर्मिसुधासिता ॥ ६२ ॥

कालस्य पद्मवलभी नगरी राजते ततः ।

पद्म रागमणिप्रोतचन्द्र हर्मोच्चमालिकैः -- ॥ ६३ ॥

गोरोचनाकृतास्येव लघुता भ्राजते पुरी ।

इन्द्रनीलमहाहारधारारम्यविगूहीता ख विगुहिता ॥ ६४ ॥

पुरी कथं न रुद्रस्य निवेशबहुला ततः ।

शतयोजनघनातोऽपि वितानाशीतिकोटिभिः ॥ ६५ ॥

हरखड्गाद् ऋत्तेभेद्या नाम्ना कृष्णशिला शिला ।

वीरवीर्या विभूत्यांशुभासाशेषदिशामलम् ॥ ६६ ॥

अमार्जनपुरस्तस्माद्रवेरिव सुमण्डलम् ।

चकाशे कल्पवैडूर्यरागरञ्जितमण्डलाः ॥ ६७ ॥

Sampath_eBooks

पातालाधिपतेर्लुप्तपातालश्रीरिव स्थितिः ।

वृषबाह्वर्गलारुद्धककुभाहारनिर्गमात् ॥ ६८ ॥

भूतिलक्ष्मी भृता तस्माद् वृषवीर्यविसारिणी ।

लसत्परिच्चदानन्तयोषितां मुखपङ्कजैः ॥ ६९ ॥

नयनाभिमुखैर्भाति दीर्घिकेव ततः पुरी ।

राजहंससमाकीर्णे विचित्रकमलालयम् ॥ ७० ॥

तस्मात् पुरःसरो भूद् यदुदयं हि यवीयसः ।

अध्वतालुगतानन्तपुरागाम्भीर्यहृद्यतः ॥ ७१ ॥

अतो गम्भीरनगरं गम्भीरविभवालयम् ।

हर्म्याण्डानि तमुद्वाहि स्थिरशक्तिकृतास्पदः ॥ ७२ ॥

पत्तनं धारकस्योर्द्ध्वमपत्तनमिति स्थितम् ।

वीरवीर्यमहारज्जुप्रबद्धानि महेश्वरि ॥ ७३ ॥

एतत्पशुपुराण्यत्र निभृतानि शिवात्मनाम् ।

स्वचित्ताण्डादहिर्बुध्नो विलासललितानि तु ॥ ७४ ॥

लक्षोच्छ्रितानि सर्वाणि ललितावेश्मगानि च ।

ततो भेद्य शिलाव्याप्तं समन्तादण्डमद्भुतम् ॥ ७५ ॥

लक्षवत्कालशिखिनो देदीप्यन्तं विराजते ।

तस्यान्ते वज्रपाषाणा निबिडा भूधराःस्थिताः ॥ ७६ ॥

यत्र ते रेमिरे वीराः कृशाणोर्भासुरा भटाः ।

स्वकण्ठोमासेकं व ख -कन्तोष्ठसासेक पिबतानन्दचेतसः ॥ ७७ ॥

कटाहं कोटिनिबिडं सारसाः कोटियोजनाः ।

ततो महापुरं रम्यं चित्र हर्म्यं ज्वलत्विषम् ॥ ७८ ॥

अघोरो घोररूपश्च भीमो भीषण निर्दयः ।

दीर्घजिह्वः करालश्च विकरालो भयङ्करः ॥ ७९ ॥

त्रासको लोकहर्ता च देहत्रासो दुरापहः ।

पद्मगर्भो महाकायः शोषणो रुधिराशनः ॥ ८० ॥

धूर्गलश्चिपिटानासः कालो भुवनयोगहा ।

विकृतो विकृतवेशश्च संवर्तकमहास्वनौ ॥ ८१ ॥

उल्मुकश्च सटाक्षश्च गुडाकेशोऽग्निवामनः ।

मृगेन्द्रनखरोत्खाता व्याधाः समनिभास्वराः ॥ ८२ ॥

व्योमवह्निमिता ह्येते कालाग्निपरितः स्थिताः ।

सन्ततेषु विचित्रेषु भूर्यण्डे तत्वमाश्रितः ॥ ८३ ॥

आरम्भकाले नृपतेस्तदिच्चातोविधायिनः ।

अग्नियोषित् सुखफलाः कामकेतुविमर्दिताः ॥ ८४ ॥

नवमोक्षोक्तकाद्येहामुक्तितीषुर्मनो भुवि ।

तौ तू रथी महाभूतौ योगिनी मातृदूतिभिः ॥ ८५ ॥

वपुष्मत्यो भ्रमन्तीव क्रमद्भिस्तत्परान्तरे ।

नानाभुवनविन्यासं नगरं चातिलालसम् ॥ ८६ ॥

नित्यभोगमहानन्दं व्यासमष्टायुतं मतम्।
लक्षणं धूमकोटीनां दीप्तलोकसमाश्रयम्॥ ८७॥
लिलिङ्ग प्रार्थितं धाम धामवत्यो भिषगुज्ज्वलाः ।
इन्द्रनीलमहानीलपद्मरागरुचोऽजराः॥ ८८॥
चलांशुमालितवपुषश्चात्र केचिद् वभुः व ख वाभा सुराः।
अत्रैव रेमिरे वीरा वह्नीन्द्राः वैनतादयः॥ ८९॥
शैवा आवासमप्राप्ताः सनातनविभूतयः।
कायवानिव तत्तेजो भैरवं संप्रतिष्ठितम्॥ ९०॥
पुनश्चलेन कालाग्नेः समन्तात् कृतहेतुकम्।
अस्यान्तः स महादेवो भैरवः शतमस्तकः॥ ९१॥
हेमयुक्तश्च दोर्दण्डव्यालकुण्डलमण्डितः ।
सूते त्रिशतवक्त्राक्षि पङ्कजेन्दीवरार्चितः॥ ९२॥
कर्कदंष्ट्रोग्रलंबोष्ठो दैत्यो भीम महाशरः।
क्रोधस्कन्धशटाभ्रंशोऽश्रुकेश विलास धृक् ॥ ९३॥
कोटिकायोऽति भीमास्यः सनागो नागलोकवत् ।
यस्य बिंबातपच्चाया समालिंगि नरोधमः ॥ ९४॥
ब्रह्माण्डस्य द्रवत्तेजोऽवतरद् वारि निर्भराः ख निर्झराः।
निरर्गला विषो यस्य न शिवेच्चानियामिताः॥ ९५॥
चूडामणिरिवाभाति राकचन्द्रातपीकृतम् ।

कालाग्नेर्मण्डलमूर्ध्वं कालाग्निरिव राजते ॥ ९६ ॥

इत्येष भगवान् कालो यस्यायुतसमुच्छ्रितम् ।

तद्व्यासमासनं धत्ते तथा च बुहलार्चिषः ॥ ९७ ॥

सावशीरोविशे देशा मण्डभित्तौ सहस्रकम् ।

योजनानां सुरेतश्च कुम्भमुक्ताफलान्वितः ॥ ९८ ॥

युगकोटिपुरं तस्य तथा च बहलार्चिषः ।

अर्चिस्तुत्यै स्मृतो धूमो महाञ्जनशिलार्गलः ॥ ९९ ॥

एषः कालानलो वीर निरर्गल बलः प्रिये ।

स संहरेज्जगत् कृत्स्नं धाम्ना स्यान्मम साधितः ॥ १०० ॥

तामसोऽस्य गुणः सर्वो रौद्रसन्धिः प्रतिष्ठितः ।

शाकिनी देवता रुद्रः किङ्करोऽश्वचरात्मकः ॥ १०१ ॥

आग्नेयमण्डलाधिशिरोगच्चन्तमथोपरि ।

निहितं धूमपटलैः पृथुत्वेनाण्डभित्तिगम् ॥ १०२ ॥

व्योमतूर्यस्वराराध्यो व्योमेवोच्छ्रायगं ततः ।

दिव्यान्यब्दसहस्राणि चत्वारि नरकाश्रयाः ॥ १०३ ॥

यान्त्येते यत्र ते पुण्याः प्राणिनो यातनैर्दृढैः ।

भूयसीं समनुप्राप्य कालाज्ञां यान्ति देहिनः ॥ १०४ ॥

रूपवेदनभःसंख्या भूभृतस्तत्र कीर्तिता ।

प्रकृतिश्चाप्यथैतेषां पञ्चाशत्कोटयो मताः ॥ १०५ ॥

Sampath_eBooks

एतैः सहैव देवेशि भूषाविकरविस्तराः ।

वच्मि तावन्नरेन्द्रं वै नामभिस्तैर्यथास्थितैः ॥ १०६ ॥

उच्छ्वासश्च निरुच्छ्वासः पूतिमांसो जतुद्रवः ।

पङ्कलेपो स्थिभङ्गश्च तथान्यश्च विमर्दनः ॥ १०७ ॥

क्रकचेदो कुठारश्च वसामेदो ह्रदः परः ।

असृक्कूपोर्धकूपश्च परसाम्यश्च वायसः ॥ १०८ ॥

अङ्गारराशिहर्म्योथ अम्वरीषो जलोदरः ।

तमालकान्तारक्षुरा असृजच्चैलजः परः ॥ १०९ ॥

सूचीमुखो महाकायः कालसूत्रसरोरुहः ।

शीतोष्णौ च महापद्मसञ्जीवनसुतापनौ ॥ ११० ॥

महावृष्टिस्तमोमोहः महामोहोऽतिदारुणः ।

तामिस्रो ह्यन्धतामिस्रस्तथा कच्चपसंयुतः ॥ १११ ॥

मृगेन्द्रदलनो दक्षस्तप्तसंदेशपीडनः ।

स्वरोदरविशाखौ रोमकूपाग्निकूपकौ ॥ ११२ ॥

धूमतप्तायसा नारी दंशमंशकमण्डकौ ।

हडिर्न्निगडबन्धश्च गलः शूलप्रलम्बनः ॥ ११३ ॥

लोहभारशतो वह्निर्दावाग्निर्जठरानलः ।

विरूपो रूपभग्नश्च तप्तचर्मभयानकः ॥ ११४ ॥

ताडितास्योऽन्धकारश्च शतवक्रैकवक्रकौ ।

धूर्लोलस्तप्तहर्म्यश्च विचर्मोदरहृत् तथा ॥ ११५ ॥

विभङ्गुरः सुमनदो कथितांगोऽनिलेशकृत् ।

लीलावक्षोऽर्धकायश्च स्वभक्षः कृमिभोजनः ॥ ११६ ॥

विड्भक्षो सुन्दरश्चैव मूषकोत्रविलुम्पकः ।

उलूकास्योऽथ याम्यश्च शतवक्रैकवक्रकः ॥ ११७ ॥

प्रभाजिह्वो ह्यनेत्रश्च विचन्द्रो दरकृत् तथा ।

एकपादो ह्यसंदिग्धः कृतवाक्यश्च भीषणः ॥ ११८ ॥

मुसलोखलगर्हश्च सूचितास्योऽथ रौरवः ।

जवजभक्षो ध्वटश्चक्षो महारौरव एव च ॥ ११९ ॥

कुम्भीपाकेक्षुयन्त्रे च क्षुट्तृडात्मान्तकः पुरा ।

क्रकचः कर्तृनिर्देश महिषोजगरः परः ॥ १२० ॥

लोहगर्दभकुम्भौ च तिलच्छिन्नखसूचिकौ ।

महाशिलो शिरः स्फोटो गुरुर्वृषणवेधकः ॥ १२१ ॥

कुलीरो कङ्कचक्रस्तु खरः स्रावस्तुरुक्यपः ।

वृषदंशास्यमकरः सूक्ष्मचक्री च मोनटः ॥ १२२ ॥

एते धराश्रयाः प्रोक्ताः सर्वतोऽण्डधराश्रयाः ।

सेनाभिः प्राणिभिः पूर्णा मधुपूषा इव प्रिये ॥ १२३ ॥

अवेचिकृमिकूटश्च घोरा वैतरणी परा ।

शाल्मली यमलः शैलो निजोच्छ्वासश्च पूतिमान् ॥ १२४ ॥

Sampath_eBooks

योऽस्थिभंगो क्रकच्चेदस्त्रपुलाक्षोष्णकर्दमौ ।

तीक्ष्णायस्तुण्डशकुनिह्रदोमृक् पूयमेदसाम् ॥ १२५ ॥

अङ्गारराशिभुवनः कुन्भीपाकोऽम्बरीषकः ।

असितालुङ्गमागुल्माः क्षुरधारः शवीमुखः ॥ १२६ ॥

कालसूत्रमहापद्मपद्मसञ्जीवनास्तथा ।

सुतापनोष्णशीताङ्कस्तमोमोहोऽथ रौरवः ॥ १२७ ॥

अम्बरीषोऽवसानश्च स महारौरवः स्थितः ।

महेन्द्रपरमा ह्येते ईषानीषास्तथा परे ॥ १२८ ॥

अर्वाचीरौरवश्चैव कुम्भीपाकस्तृतीयकः ।

आत्मजापाः स्मृता ह्येते तूर्यात्मा चैव शिष्टकाः ॥ १२९ ॥

दशधा पञ्चधा भेदाः प्राप्यन्ते महतोऽणुभिः ।

एतेषामुच्च्रयश्चापि सेनस्याकाशमूर्तयः ॥ १३० ॥

विष्कम्भकाश्च सर्वेषां मरुद्वह्निखभानुगाः ।

व्याप्तियोगावलोकीनां संमतानाञ्च भैरवि ॥ १३१ ॥

तद्बला यान्त्यमी मार्गे वन्ध्यानमृतवो यथा ।

नरकोद्ध्र्वकटाहोद्ध्र्वेस्थानं भूरि तमोऽमयम् ॥ १३२ ॥

चिद्विहीनं महाघोरं सुसुप्तमिव सर्वतः

तत्रास्ते स महाभीमो जात्यन्धोऽजगरो बली ॥ १३३ ॥

नाम्ना चान्धजरत्कारुः समन्ताद्भित्तिसङ्कटे ।

क्रोडीकृतशरीरस्तु पञ्जरस्थो नु तिष्ठति ॥ १३४ ॥

सदा क्षुद्धामकुक्षिस्तु एकाकी विषयोज्झितः ।

वितानित महावक्त्र ःतिष्ठन्ति गरलाषमुक् ॥ १३५ ॥

विशन्ति तन्मुखे ते तु ये शिवागमदूषकाः ।

परार्थे भावमापन्नाः शिववाक्यविकल्पकाः ॥ १३६ ॥

व्याजेन गुरुतो ज्ञानं गृह्य लज्जन्ति तस्य ये ।

याभ्यो वसन्ति नारीभ्यः कामयन्ति च तास्तु ये ॥ १३७ ॥

ज्ञानिनां चुम्बकेन्द्राणां तेऽपि तत्र विशन्ति हि ।

निर्गमं प्रविशन्ते तु स्वयोग्यावस्थया तु ते ॥ १३८ ॥

दुर्गन्धा निर्वास्यंते ख तिरवास्यन्ते दक्षिणा चाभिलाष्यते ।

खत्रयब्रह्ममरुतैः शशिनः स्थानसंश्रयात् ॥ १३९ ॥

द्वे युतेऽर्द्धं च निविडं तस्योद्ध्वञ्च कटाहकम् ।

तस्योद्ध्वें तत्प्रमाणं तु तद्रूपं धाम भीषणम् ॥ १४० ॥

यत्रासौ तिष्ठते ह्यण्डो गुप्तदानस्तुमत्कुणः ।

महासर्पप्रमाणस्तु लुप्ताचारैर्भृतोदरः ॥ १४१ ॥

द्वेष्टारो भैरवाप्तानां द्वेषिणश्चुम्बकादिषु ।

वसन्ति तेऽपि तत्रैव येन द्रविणहारकाः ॥ १४२ ॥

सन्मतानां महादेवि कुलमाशीतिकाश्च ये ।

तस्योपरि कटाहोद्ध्वें येनान्धो दर्दुरः स्थितः ॥ १४३ ॥

Sampath_eBooks

पृथुभुक्तिर्महावक्रो साधनाद्दण्डनीं श्रियम्।

काकैर्मृगैश्चचमरैः सौवर्णादिविभूषकैः ॥ १४४ ॥

व्याजान्निषेकमज्ञान ग्राहकैस्तस्य पूरितम्।

जाठरं जाठरास्यश्च ज्वालामण्डलमालितम्॥ १४५ ॥

यस्योदरमहातालादुदीर्णं जन्तुमण्डलम्।

तिष्ठेत् तदुह्यमानं तु जठरोन्नीतवह्निना ॥ १४६ ॥

अधीनं तत्सकाशात् तु यस्माद्ज्ञानं श्रुतं तथा।

क्रीडायन्ते तु ये तेन गुरुमेकाकिमातुरम्॥ १४७ ॥

कान्तारयुद्धेष्ठाज्ञा ख -कान्तारत्युद्धेष्ठाज्ञा यो हीयमानं त्यजंति ये।

ज्ञानानुक्रमहीना ये गर्विताश्चापि पापिनः॥ १४८ ॥

ते विशन्ति महाघोरं कृकलासं महोदरम्।

तस्योर्ध्वे पामराभिस्तिरोहितां रोहिता तदधोगताः॥ १४९ ॥

कार्कश्यं शास्यमानञ्च सममासां समन्ततः।

प्रयुक्तं प्रक्रियाज्ञानं वेदिना देशिकेन तु॥ १५० ॥

सिन्दूराञ्जनशिलादीनां भिदुरं भैरवायुधम्।

पञ्चाशत्पञ्चलक्षाणि कोटित्रयसमं ततः ॥ १५१ ॥

चिद्धिहीनं तथा कोटिशतधारा धरोपरि।

गर्भोदं दान वै तस्मान् मत्स्यप्रच्चोत्सलं पयः॥ १५२ ॥

कन्दर्पमार्गणाकाशलोकचक्षु सिताक्षगः।

कृष्णाय धारामूर्धं च ककुभिस्त्वेककोटिगा ॥ १५३॥
ततः कूष्माण्डदेवस्य विज्ञानं रुद्रसंकुलम् ।
स चापि भगवान्मुक्तस्त्रिकोणाभिख्यमण्डले ॥ १५४॥
नारके मण्डलेशस्तु त्रिकोणाभिख्यमण्डलः ।
तेन शुद्धेन शुद्ध्यन्ते सर्वे ते भैरवाध्वनि ॥ १५५॥
कूष्माण्डमातरो घोरा : योगिन्यो बलगर्विताः ।
शाकिन्यो रुद्रवेताल्यः कर्कटाः कठपूतनाः॥ १५६॥
मुखमुक्तान्विगृह्णन्ति जम्बूनीताध्वमार्गगाः ।
एते स्फुरदमेयांशु प्रभोद्वलितचेतसः ॥ १५७॥
पिनाकिगोत्राधिकृत्यं दधानं संप्रतिष्ठितम् ।
पुरं कूष्माण्डरुद्रस्य वज्रप्राकारतोरणम्॥ १५८॥
पद्मखण्डशताकीर्णं क्रीडाविन्यासमण्डितम्।
तदग्रे शक्तिलक्षैस्तु ज्ञेयं तत्पुरुषाधिपः॥ १५९॥
तत्रासौ भगवानीशो सत्कर्मार्जितभोगदः।
योजनानां सहस्रैकमासनं तस्य कीर्तितम्॥ १६०॥
अष्टपत्रमहाम्भोजसुरेन्द्रशतपृष्ठगम्।
योजनायुतकायोऽसौ चतुर्वक्त्रोरुवीक्षणः ॥ १६१॥
द्विदशाशाष्टखर्वं दिव्यास्त्राण्युग्रमण्डलम्।
महारजतवासोऽसौ भाति सन्ध्याभ्रपाटलम्॥ १६२॥

यश्चाहोरात्रसाहस्त्रं तुतोष न शमी व ख शमो ऋषिः।

ककुब्जकं कटाहश्च पातालानि तदम्बरे॥ १६३॥

रूपं वापुस्तनुज्ञानि रसाश्रयपृथूनि च।

भृत्त्यर्गलासमा वर्म्मभांजि सर्वाणि सर्वतः॥ १६४॥

आभासवरतालञ्च शर्करालं गभस्ति च।

महातालं सुतालं च सप्तमं च रसातलम्॥ १६५॥

द्विस्कन्धं तत्समाख्यातं पुरदं यन्निदर्शनात्।

एकैकस्मिंस्तु ये दैत्या भोगिनः क्रूरमण्डलाः॥ १६६॥

चित्र सम्पच्छ्रियस्ते तु कोट्येकैकपरिच्छदा ः।

पयोभिरतुलश्रीभिः सार्द्धं हृच्चयसेविनः॥ १६७॥

तेऽभुञ्जश्चक्रसंस्थानस्थितमेतद्वराश्रमम्।

नाना असुरसङ्घाता भुजङ्गोन्मोकवाससः॥ १६८॥

चक्रनेमिचरो भोगी विज्ञेयः शर्वरीचरः।

यत्तदा भासतालन्तु हरेर्मणिधरातलम्॥ १६९॥

नमुचिः व नमूचिः शङ्कुकर्णश्च महानादश्च दानवाः।

चूडामणिरुगुद्योति स्वाधिष्ठानतपोरुहः॥ १७०॥

सौधोन्नतवलभीनां प्राकारोद्यानभूषु च।

रमन्ति दयितावक्रदर्प्पणालोकिताननाः॥ १७१॥

कुण्डगोलादयश्चान्ये वीराः वीरेजकाः शुभाः।

लिङ्गभूरिपटस्थायिध्यानयोगप्रतिष्ठिताः ॥ १७२ ॥

अनन्तः कुलिकश्चैव इलापत्रस्त्रयोरगाः ।

विकटः स्थूलदन्तश्च रक्ताक्षो राक्षसाधिपः ॥ १७३ ॥

द्वितीये वरतालाख्ये सुरम्ये शोणभूमिके ।

देवराद्यास्त्रयः देवि सन्ति भोगिनो धरणीभृतः ॥ १७४ ॥

पहलादो वह्निजिह्वश्च बलीयाननुहाटकः ।

वासुकिः शंखपालश्च धृतराष्ट्रो भुजङ्गराट् ॥ १७५ ॥

स्वभोगचक्रवालेन्दुप्रभापर्यङ्कमध्यगाः ।

रेमिरे रम्यभोगाढ्या नागकन्यारतोत्सवम् ॥ १७६ ॥

विद्युन्माली हिरण्याक्षो विद्युल्लोलश्च राक्षसाः ।

भूयांसोऽन्ये निकुम्भाद्या वसन्त्यत्र धरालये ॥ १७७ ॥

स्वयोषिन्मन्मथास्वादकपिशाक्षीवशे तथा ।

पुष्परागमहांरत्न तद्वद्दिव्यं धराश्रये ॥ १७८ ॥

तद्वर्णनिलयव्रातललिते वलितः प्रिये ।

तृतीयो तारकाक्षस्तु शिशुपालोऽन्धकारकः ॥ १७९ ॥

तारकस्तक्षकः पद्मः कम्बलःश्चोरगा मताः ।

यम दंष्ट्रोग्रदंष्ट्रश्च विशालाक्षश्च राक्षसाः ॥ १८० ॥

वैडूर्यज शिलाजालव्यास व्यालाधिपालयाः ।

विक्रमद्रविणास्तूर्यैर्नवैव महीभृतः ॥ १८१ ॥

कालाख्यो याममहिषौ काव्यविद्यास्त्रयो मताः ।
खण्डकर्णश्च पद्मश्च कर्कोटः फणिनस्त्रयः ॥ १८२ ॥
महोदरो महाकायो रक्षोघ्नश्च महाभुजः ।
महानीलधराधारमिंद्रनीलदृशन्निधिम् ॥ १८३ ॥
पातालं पञ्चमं रम्यं सर्वभूतिं सदाश्रयम्
चित्रयोनिसुदाम्नोऽन्तरमणीमण्डलाकुले ॥ १८४ ॥
रमन्ते वनराजानः सनातनविभूतयः ।
वीरेशार्पितचेतस्को तत्र मन्त्रिजनः सदा ॥ १८५ ॥
ताक्ष्यार्क्षश्च सुवर्णाक्षो दुन्दुभिः सुमनोरमः ।
धनञ्जयो स्थिताः पञ्च यश्च कलिकोमलपत्रयः ॥ १८६ ॥
स्वोत्तमाङ्गमणिच्चायो रंगभूषितविग्रहः ।
धाराधरो विरूपाक्षो ह्युग्ररूपोऽथ वामनः ॥ १८७ ॥
एते सम समाकृष्टाः सुधाम्नो रमणीभुजः ।
नराः सामिषगन्धाढया लोलालापविभूषणाः ॥ १८८ ॥
विधुकान्तिमयी भूमिः षष्ठपातालसञ्चरे ।
लीला पत्यन्तरे यस्य महिष्यों लोलितान्वगाः ॥ १८९ ॥
निशुम्भः व निसुम्भः कालनेमिश्च हिरण्याक्षोऽमरद्विषः ।
सुष्मा विहृत्यामरं स्त्री शूर्पकोऽलिमुखोऽलसः ॥ १९० ॥
दुष्प्रेक्षः पौण्डरीकश्च श्वेतभद्रोऽथ भोगिनः ।

मौलिरत्नप्रदीपश्च शिखाभग्नतमोबलाः ॥ १९१ ॥

मेघनादी महानादी पिङ्गाक्षः पिशिताशनः ।

स्वस्वदंष्ट्रामृगाङ्कांशु मनोमालितविग्रहाः ॥ १९२ ॥

नरामरसुरारातिफल्गुसामिषगृद्धिनः ।

निरर्गलबला वीरा वीरेशार्चापरायणाः ॥ १९३ ॥

यत्तद्रसातलन्नाम सूर्यकान्तरसातलम् ।

तत्राधोक्षजवीर्योग्ररज्जुसंयमितो बलिः ॥ १९४ ॥

आस्ते स्वसूनृतां वाणीं पालयन् बलवानपि ।

वैराजनो जनः सेन्द्रो द्वा धन्यौ नरकेश्वरौ ॥ १९५ ॥

स्फुरद्बलसमाघ्रात सप्तलोकभटश्रियः ।

यदजार्गलया रुद्धा वसन्तीव करेणवः ॥ १९६ ॥

नाद्यापि यद्भयाविष्टा नाकौकेशाः समाकुलाः ।

धनुर्भ्योऽवतरितज्यासु स्वसुखाल्लब्धतन्द्रयः ॥ १९७ ॥

नागश्चाश्वतरस्तत्र पिङ्गलैरावतस्तथा ।

फणमण्डलमणीन्द्रांशुं मञ्जरीकन्दलावृताः ॥ १९८ ॥

पुल्लपादग्धमन्दारा व ख पुलपादग्ध मन्दारा दरपल्लविता इव ।

ईक्षिरे ते महानागाः हाटकेशों ह्यनुक्रमात् ॥ १९९ ॥

माली वा नवमाली च सुमाली क्रूरनायकाः ।

लङ्कापतेर्दशास्यानि ह्येते मातामहा मताः ॥ २०० ॥

अच्युतास्त्रानलज्वालादाहश्यामयिताङ्गिनः ।

सुवीरैः प्रावृडारम्भोत्तुङ्गशृङ्गा घना इव ॥ २०१ ॥

कनकाकल्पसच्छायासमालिङ्गितविग्रहाः ।

स्फुरत्सौदामणीपुञ्जपिंजरा जलदा इव ॥ २०२ ॥

विकटा टङ्कत्रिजटा धूम्रा कोलाहला बला ।

विद्युल्लोला नलाक्षी च नवमी पिङ्गलेक्षणा ॥ २०३ ॥

तिस्रात्तिस्रः प्रिया ह्येतेस्त्रयाणामपि सैन्धव ।

नयेनास्यामिता ह्येते कालिकापत्यपुत्रयोः ॥ २०४ ॥

सप्तपातालराजानो विज्ञेयाधोवलोकिभिः ।

उपरीश्वरमन्दिरं महोच्चं कलधौतामलभूमिमण्डलौकः ।

वनितामुखचन्द्रचन्द्रिकाभिहतभीमान्धतमोभरप्रभावम् ॥ २०५ ॥

वरसिद्धवधूकरावृतं भवरुद्राश्रितसिद्धसेवितम् ।

मणिभूषितरश्मिजालकैरधरोद्याश्च शिरःप्रभावितानन‌म् ॥ २०६ ॥

विभुरत्नाचितहर्म्यभित्तिका अनुषक्ताः शशिनोऽशुजालकानाम् ।

स्रवदच्चजलोर्मिमालिकाभिहतचित्रौघवशान्सुदोषभावम् ॥ २०७ ॥

स्फटिकोपलकुट्टिमप्रभाभि उपगूहं धरणीतलं समन्तात् ।

द्रवहीनहिमांशुमण्डलद्रुत धामां विशदं शुशोभ यत्र ॥ २०८ ॥

स्फुटशोणमणीन्द्रभाभिरुर्ध्वस्थगितं शेखरिभिः समन्ततो यत् ।

अधरो नवसाधुवेशरूपं ललिताम्रशुभांतरानुषङ्गात् ॥ २०९ ॥

सदेन्दुचूडामणिरश्मिजालकैर्वितानकं यस्य निजास्यदेवलम्।

सहाटकः पिङ्गजटाकलापधृक् स्थितोऽधिकार्याच्चु वितानविषये ॥

२१० ॥

विपन्नदेवारिविलासिनीगणैर्मृगेन्द्रसत्केसरिकेशदामनैः।

प्रवीक्ष्यते यस्य पदाब्जमुक्ताकिणांकितं नम्रसुरेन्द्रमौलिभिः ॥ २११ ॥

क्वणन्मधुरवल्लकी - स्फुटसुगीतिकागीतकैर्नदत्मुरजझत

ल्लकीपटहगर्जशङ्खस्वनैः ।

प्रसिद्धधृतताण्डवप्रबलहास्य कोलाहलैर्हसद्भुवनमुल्वणं भवतु वो मुदे

हर्षकृत्॥ २१२ ॥

अभर्तृलयदङ्गना प्रविशनाति संसर्गतः।

अपि स्वमणिभूषणप्रबलरत्नकीर्णोत्करैः॥ २१३ ॥

विलग्नललिताङ्गुलीत्रुटितहारमुक्ताफलैः।

कृतप्रवरपूजनं यदुदरं सदा राजते॥ २१४ ॥

इत स्फुटित रत्नजैर्विमलदीपकैर्मालितः ।

इतः शशिशिलोद्भवैर्हरितपुष्परागैरितः ॥ २१५ ॥

स्फुरत्किरणमञ्जरीप्रकटशोणजातैरितो -।

दधार रभसः श्रियं स्फुरितदीप्तचक्रस्य यत्॥ २१६ ॥

नवागुरुशशाङ्कजप्रचुरधूपधूमालयम्।

मनोजहरिचन्दनप्रबलगन्धवत् सुस्थिरम् ॥ २१७ ॥

प्रकाशसुरपादपोल्लसित पुष्पदामाकुलम्।

ककुध्वजमदाम्बुना सततसिक्तपृथ्वीतलम्॥ २१८॥

वृषोत्थ खुरवर्त्तिकावलनजातरूपाङ्कितम्।

चलत्कनककुण्डलप्रकरमण्डितप्राङ्गम् ॥ २१९॥

समस्तरविमण्डलोदितनभोऽनुरूपं श्रिया।

रराज व ररा सुरसुन्दरीकमलिनी शनैर्यस्य च॥ २२०॥

क्वचित् परशुरोचनाहरितमालमालेषवः।

क्वचित् कनकपादुके रसरसायनादिक्रिया॥ २२१॥

क्वचिन्मदनगोजिकाचरणलेपचिंतामणिः।

क्वचित् कुनदिवाटिकादिको वसुगणः स्फुरपत्रकः ॥ २२२॥

वक्षोमणिरश्मिमण्डलोत्तरीयं ----।

मञ्जीररत्नगरत्नभा नितम्ववस्त्रे।चूडामणिरश्मिपल्लवितोत्तमाङ्गं यत्रामलं विरेमे॥ २२३॥

अनन्तवस्त्रमण्डिताः कृशानुवस्त्रजा ध्वजाः।

पताकिकास्तथोज्ज्वलाः स्पृशन्ति वै ककुब्लताः ॥ २२४॥

सरोजरत्न भासुराः सुजातजातरूपजाः।

प्रवालदामशोभिनो विभान्ति तोरणागणाः॥ २२५॥

अरूपनन्दनेषु च स्ववाक्य वैखरीगणाः ।

ननाद यत्र मेखला मतङ्गजां मदोद्वहम्॥ २२६॥

आस्ते स देवोऽत्र जपेशनामा स्वाधोगतानन्तधराधिपानाम् ।

आज्ञाप्रदः सिद्धजनः प्रगोप्ता सम्पूज्यमानोऽखिलचक्रिभिश्च ॥ २२७ ॥

वक्त्रपञ्चकेन्द्रद्विजोत्थकिरणा व ख -णत्व चारुकुण्डलभारती ।

शुभविभवोदया शेखरेन्दुधारासहस्त्रशबलीकृतजन्तवः ॥ २२८ ॥

वक्त्रशरत्कीलभूतिमतिलालसा दिक्प्रमाणदोर्दण्डमण्डलविभूतिमत् ।

शारदाभ्रशुभ्रप्रवरमनाविलं फुल्ललोचनाम्वुरुहत्रयमनाकुलम् ॥ २२९ ॥

यस्य वक्त्राणिं सदीर्घिका सुहर्षोन्नतमुण्डपञ्चकाङ्गत्रिशूलविमलाशयः ।

वारणजगोधाश्च भीतवरपाणयः कुब्जनागपाशैश्च भूतधवलाङ्गदैः ॥

२३० ॥

यस्याभान्तीकि शारदनभस्थले ।

तस्य शम्बरेच्चा विधानकृतचेतसः ॥ २३१ ॥

सन्ति भूतिभाजः सदैव सुखिनो नराः ।

भुक्ताः सप्तपाताल भोगमनघान्तिकम् ॥ २३२ ॥

यान्ति वीरपुङ्गवेषुं निजहृदीच्चया ।

अस्य देवि देव्यादिकं शृणुष्व त्वमनाविलम् ॥ २३३ ॥

रंजिकाभिनवगात्रोत्फुल्लगात्रकं हृदादिवर्णयोनिराजीवनाभिरचितास्वादम्

।

प्राक्तनं रूपमीक्ष्यं ते सदोक्तं विभवार्थिभिः ।

विभवोऽस्य सर्गस्तु लौकिको न च शक्योभिहितुं समासतः ॥ २३४ ॥

परमा ह्यभिलाषपूर्णना हठशम्भोर्भवते व शम्भोः भवते भिषेरणात्।

अस्मात् परादुपरिपीतकटाहपिण्डश्चैष सहस्रकृतयोजनसत्प्रमाणः ।

विरचितास्पदचित्रशोभा पृथ्वी सरिन्नदसरोद्रुमशैलयुक्ता ः॥ २३५॥

या रत्नसातुविमलोन्नतकर्णिकेनां दीपार्चितोज्ज्वलदलाष्टक शृङ्गा ।

उद्यानकेसरनदीमधुशैलबीजा अम्भोरुही तडिदिवोज्ज्वलभा विभाति

॥ २३६ ॥

उक्त एष पन्थाः यथाक्रमं गोविरामश्च प्रदेशतः ।

पुष्कलास्त्रयोविंशतिस्फुटाः कोटयोऽखिला योजनाख्यया ॥ २३७ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं
शतिसाहस्रे प्रथमषट्के कालसङ्कर्षण्यां सप्तमः पटलः ॥ ७ ॥

अष्टमः पटलः।

श्रीभैरव उवाच ।

अथ शैवाण्डभित्यन्तर्मणिच्चाया विकासिता ।

शुभ्रमध्यंदिनात्युग्रभास्वद्धीमातपोपमा ॥ १ ॥

कोटिमननोच्चा द्वा ततः सन्ध्यारजच्चविः ।

समेच्चा कोटिमानस्था ततोऽसौ शर्वरीक्रिया ॥ २ ॥

शतधामयुतां ज्ञेया भूरिभित्तिप्रभावतः ।

ततोऽन्धकारमत्युग्रं भवनालोकवर्जितम् ॥ ३ ॥

उद्यानगिरिवह्नयन्त स्तिर्यङ्नर सुरासुरैः।

न तत्र लवमात्रापि इत्थमेतद्व्यवस्थितिः ॥ ४ ॥

उक्तान्धकारगन्तारः किलाद्यापि हि सेवकाः ।

स्वर्विचारवतां भाषाः श्रूयन्ते तत्र संस्थिताः ॥ ५ ॥

यद्याह कोटयो लक्षा ः रुद्रभेदप्रमाणगाः ।

अनित्य धर्मगा या मानमस्याख्यातमविस्मृतम् ॥ ६ ॥

तस्याः सीमान्तरं दत्वा गर्भाख्यः प्राक् प्रमाणतः ।

रुचिरः सानुमांस्तस्माल्लोकालोकेति विश्रुतः ॥ ७ ॥

पौलस्त्यमुखसाहस्रो व्यासेन द्विगुणोच्छ्रयात् ।

तस्य मध्ये स्मृतो लोकोऽवलोको वाह्यतो मतः ॥ ८ ॥

मस्तकेऽस्य चतस्रस्तु पुरो लोकात्मनां महान् ।

वसुधामास्थिताः पूर्वे शङ्खया दक्षिणेन तु ॥ ९ ॥

रुक्मके शीलदिग्भागे केतुमालोत्तरेऽपि च ।

वसुधा शङ्खपालश्च रुक्मकेशश्च केतुमान् ॥ १० ॥

अनुलोकेश्वरा ह्येते रेमिरे तु ममाज्ञया ।

ततो निम्ना अहोरम्या कञ्जकोटिप्रतिष्ठिता ॥ ११ ॥

चामीकरमयै ःरम्यैः सदामृद्धूमिसम्मता ।

अस्यास्तले वुदर्कारः सप्तद्वीपान्यनुक्रमात् ॥ १२ ॥

श्रूयतां पन्निलानन्द श्रोतव्योऽस्मिन् समासतः ।

सुराज्यस्य सुतो नाम्ना मनुरासीन् महामुनिः ॥ १३ ॥

Sampath_eBooks

प्रियवतस्ततस्तस्य मनवो दश चास्य तु ।
अग्निदो ह्यग्निबाहुश्च मेधा मेधातिथिर्वसुः ॥ १४
ज्योतिष्मान् द्युतिमान् हव्यः सवनः पत्र एव च ।
मेथातिथ्यग्निबाहुश्च परिवादशिरास्त्रयः ॥ १५ ॥
विनिवृत्तवियोगास्तु परब्रह्मसमाश्रिताः ।
सर्वविद्यार्थसंपन्ना गुरोर्ज्ञानविचिन्तकाः ॥ १६ ॥
ब्रह्मचर्यरताः शान्ता वीरा वीर कृतौजसः ।
इतरा साधिकारास्तु शूर्पकारिकृतश्रमाः ॥ १७ ॥
रागान्धा ज्ञानदीपेष्वभिषिञ्चन्ति प्रियव्रताः ।
पुष्करं मानसं क्रौञ्चकुलं शाल्मलमेव च ॥ १८ ॥
प्लक्षद्वीपञ्च जम्बूञ्च सप्तमं द्वीपसंज्ञितम् ।
पुष्करे सवनः सिक्तः शाके हव्यो महाबलः ॥ १९ ॥
द्युतिर्ज्योतिष्मतीसिक्तौ द्वीपयोः क्रौञ्चदर्भयोः ।
शाल्मलीप्लक्षयोः सिक्तौ वसुमेधातिथीसुतौ ॥ २० ॥
जम्बूद्वीपे तथाग्नीध्रं बलीयांसं सिशिञ्चयः ।
अस्योग्राः पिञ्जराः पूर्णाः स्फुर्जन्त इतरोरगाः ॥ २१ ॥
अवाप्ताः सासुरा गन्धर्वो यक्षरक्षोशगुह्यकाः ।
विशृङ्खला नभः पृष्ठे ह्यमीषां बभ्रमुर्भयात् ॥ २२ ॥
सुवर्णोदमतिक्रम्य स्वाद्वात्मा मकरालयः ।

मेधा वक्राणि नेत्राणि तस्यैव युगलं बिना ॥ २३ ॥

लक्षाणां तत्प्रमाणं हि तन्नालं पुष्करं मतम् ।

कुलाद्रिणा समन्तात्तु मानसेन समावृतम् ॥ २४ ॥

तद्दलीकृत्य सवनो वहिरन्तर्व्यवस्थया ।

स्वात्मजाभ्यां ददौ वीरस्त्वभिषेकपुरःसरम् ॥ २५ ॥

वीतधातकिनामाभ्यां स्थावरं तुल्यंसंपदम् ।

मानसोत्तरमूर्धस्थं नगरीणां चतुष्टयम् ॥ २६ ॥

वस्त्रौकसारपूर्वेण सूत्राम्लोर्दक्षिणे न च ।

यमस्य सा संयमनी आदिभावे सुखावती ॥ २७ ॥

विभावती सुधारश्मिः सुधाग्नेः संव्यवस्थिता ।

पुष्करस्य बहिर्वारिद्विपाः पुर्योऽतिबान्धवाः ॥ २८ ॥

तस्य मध्ये स्थितं द्वीपं शाकमत्यन्त विस्तृतम् ।

चक्राकारं कृतं तद्धि विमलैः पर्वतात्मकैः ॥ २९ ॥

उदयोऽम्बुधरः श्यामो रजतो रैवतः परः ।

अम्बिकेयः स्मृतः षष्ठः सप्तमः केशनिर्मितः ॥ ३० ॥

एतेषामन्तरालेषु हव्यपुत्राणि सिञ्चति ।

महाद्रुमोन्नतश्चैव कुमुदोथमणीचकः ॥ ३१ ॥

सुकुमारः कुमारश्च जलः सप्ततमो नृपः ।

दुःसाध्यतिमिरं तस्यां तद्गर्भाक्रौञ्चसंज्ञकम् ॥ ३२ ॥

Sampath_eBooks

तस्मिन् कुलाः सप्त नामभिः शृणु सैन्धव ।

क्रौञ्चो वामनकश्चैव ह्यन्धकारो दिवाकृतिः ॥ ३३ ॥

पौण्डरीकोऽथ मूकश्च दुन्दुभिः सप्तमः स्मृतः ।

सीमान्तरगतामेषाम् एतेभ्यो द्युतिमान् दधौ ॥ ३४ ॥

सप्तभ्यो निजपुत्रेभ्यो वलवद्भ्यो वलोद्धतः ।

मनोऽनुगोऽन्धकारश्च पुरूषोष्णः प्रवरो मुनिः ॥ ३५ ॥

कुशलो दुन्दुभिश्चैव स्वनामविषयालयाः ।

ततः क्रौञ्चमतिक्रम्य सर्पिरथिरगाधवान् ॥ ३६ ॥

उदरेऽस्य कुशद्वीपं ज्योतिष्मांस्तत्र पार्थिवः ।

तद्द्वितीयनिजापत्य सप्तकाय ययौ दिवम् ॥ ३७ ॥

कपिलः प्रभाकरः कृष्णो लवणो रथकृत् तथा ।

वेणुध्वजो निजाकाक राष्ट्रमार्गप्रपालकाः ॥ ३८ ॥

सानुमन्तः स्थिताः तत्राप्युत्तुङ्गसप्त सानवः ।

उमोश्रयो हेमगिरेर्ज्योतिष्मान् पुष्पवर्धनः ॥ ३९ ॥

कुशेशयो हरिश्चैव मन्दरः सप्तमः स्मृतः ।

शैलविष्कम्भभोक्तारः पुत्रा ज्योतिष्मतो मताः ॥ ४० ॥

वलयार्गलास्ततस्तस्य मध्ये इक्षुरसाधिजाः ः।

तस्यामन्तर्गतं द्वीपं शाल्मलीसंज्ञकं शुभम् ॥ ४१ ॥

वपुषा सूनवः सप्तरथाङ्गाकृतिसंस्थिताः ः।

कुलाद्यरकसंस्थाने ते तस्मिन्नभिषेचिताः ॥ ४२ ॥

जीमूतो लोहितश्चैव सुप्रभो वैद्युतो हरिः ।

मानसश्च रमानाथो सप्तै ते श्रूयतां नृप ॥ ४३ ॥

कुमुदोऽनन्तको भद्रो नलः नीलो बलाहकाः ।

अमी महीभृतः सप्त ततोऽन्ते मन्दरालयः ॥ ४४ ॥

तस्याप्यन्तर्गतं प्लक्षं तत्र मेधातिथिर्नृपः ।

महीन्द्रांतर्गतान् देशानपत्येभ्यो वितीर्य सः ॥ ४५ ॥

मुनिमानगतेभ्यस्तु गतयः सप्तस्वराः प्रभुः ।

ध्रुवो क्षेमो निरानन्दः सुखोदः शिशिरस्तथा ॥ ४६ ॥

स्वशान्तः सप्तमश्चैव देशाप्येते प्रकीर्तिताः ।

कुलांश्च कारकांश्चक्रे लक्षाख्ये श्रूयतामतः ॥ ४७ ॥

नारदो दुन्दुभिघनो वैभ्राजश्चक्रकः शशी ।

गोमेदश्चाप्यसोऽम्मोधिः क्षराख्यो गर्भमाश्रितः ॥ ४८ ॥

अस्याप्यन्तर्गतं तद्धि जम्बूद्वीपं परं भुवः ।

क्रीडन्ते पुष्करे संस्था तत्रेशास्ते ते च सर्वदा । ४९ ॥

स्वादूदादिसमुद्राणामन्योन्य जलगामिभिः ।

समुद्रवच्च वर्षाणि विज्ञेया पुष्करान्चितः ॥ ५० ॥

अग्नीध्रो नामतः प्रोक्तो जम्बूद्वीपे महाप्रभुः ।

तस्यात्मजा नवोत्पन्नास्तेऽपि तर्पभुशालिनः ॥ ५१ ॥

विततानवद् योऽसौ नवभागविभाजितम्।
लक्षयोजनविस्तीर्णे जम्बूद्वीपें च भूपतिः॥ ५२॥
क्षारतोयभृतोऽन्तस्थमस्यावयवलक्षणम् ।
वच्मि संक्षेपतो राजंस्त्वमाविष्कुरु विस्तरम्॥ ५३॥
उदगुदन्वतो याम्ये देशोऽयः संप्रतिष्ठितः।
अग्नीध्रेण सुतस्तत्र कुरुर्नामाभिषेचितः ॥ ५४॥
कोदण्डवद्भुजस्तस्य नवसाहस्रविस्तरम्।
अशीतिपूरणं तुङ्गद्वयविलासितम् ॥ ५५॥
क्षीरवृक्षफलान्धश्च चामीकरधरालयम् ।
युग्मप्रसृतयो लोका ः वसन्त्यत्र सुयौवनाः॥ ५६॥
त्रिदशार्द्धसहस्रञ्च तेषामायुः प्रकीर्तितम्।
वपुर्गोरोचनं दिव्यरूपं चाशून्यकारिणः॥ ५७॥
कुरुसंज्ञमिदं वर्षं रविकान्तीन्दुकारकौ।
यत्राचलौ सुराङ्गक्रीडाहर्म्यसमाकुलौ ॥ ५८॥
अस्य दिग्दक्षिणाशीतिसहस्राणि महानगाः ः।
प्रान्तयोरम्बुराशिस्थः सहस्रद्वयविस्तरः॥ ५९
नाम्ना व नाम्नान त्रिगर्त्तरस्त्रिश्च चत्वारिंशत्सहस्रकम्।
राजावर्त्तोपलाङ्गोऽसौ शतमध्यर्धदैर्घ्यतः ः॥ ६०॥
अस्यापि वर्षसन्तत्यः सहिरण्यं हिरणमयाः ।

चित्राभिषेके च तस्तत्र तन्ननाम्ना तद्धिरण्मयः ॥ ६१ ॥

अभ्रकाभरजःस्थापि कुशोदर्कानुसंस्थितम् ।

आयुस्तु मनुजीवानां तत्तावद्द्वादशैव तु ॥ ६२ ॥

सहस्राणि शतानाञ्च कुरुदैर्घ्यदशार्गलम् ।

किरातः किङ्करातश्च सप्तसानुः त्रयो नगाः ॥ ६३ ॥

हरितो वर्णास्ते चिरंजीवसमाकुलाः ।

धर्मैककुभिशङ्खाभो भृगुक्षेत्र इति श्रुताः ॥ ६४ ॥

कोटिभ्यां स्पृशमेधीव शृङ्गवानिवसंस्थितः ।

विस्तरस्तत्समस्तस्य धूरस्त्वं तर्दशवृद्धिमः ॥ ६५ ॥

पंचत्रिंशत्युदग्रस्थं सहस्राणि नराधिपः ।

तदन्ते रमते नाम रमणस्तत्रसेविनः - ॥ ६६ ॥

हिरण्मयं समन्ताद्धि दैर्घ्येण दशवृद्धिगम् ।

तरुराजफणाहारास्तत्र लोकास्तपोधनाः ॥ ६७ ॥

अब्दैकादशसाहस्रमायुस्तेषां प्रकीर्तितम् ।

मद्यगोपवपुष्मन्तः सर्वे तस्मिन्शरीरिणः ॥ ६८ ॥

अलोकस्सानुमान्नन्दश्चतुर्थो लाङ्गलीयकः ।

अलकाकेन्दुभृङ्गाभाः क्रमेणैते कुलाचलाः ॥ ६९ ॥

गिरिराट् कथ्यते रम्यो रम्यनीलशिलोच्चयः ।

तुर्यायुतसमुत्सेधो लक्षायामः प्रतिष्ठितः ॥ ७० ॥

श्वेतवद्यासससंस्थानं महानीलवपुर्विदुः ।

न रात्रौ विषुवं तस्य नन्दपः सह केन्तरे ॥ ७१ ॥

शक्रक्रीडाचलस्तीर्ण सुचित्रः स्थानकः स्थिरः ।

कान्तः ख कान्त स्वर वपुः श्रीमानधःसानुगणाकुलः ॥ ७२ ॥

सहस्त्रयुग्माभ्यधिकं त्रियुतं तस्य सप्तकम् ।

मल्लकाभिख्यतः सो हि नमितः श्लक्ष्णतामधः ॥ ७३ ॥

ऊर्ध्वेन्दुदग्धसंस्थानश्चतुराशीतिरग्रतः ।

दशषोढासहस्त्राणि गतः पातालगोचरम् ॥ ७४ ॥

फणिभिः पञ्चसाहस्त्रमामूलात् परिवेष्टितः ।

ऊष्मोद्धुरैर्महादेवि निभृतो यः समन्ततः ॥ ७५ ॥

विष्कम्भगिरि यस्तस्य द्दकूमैं ः रूद्धतक्षयः ।

दारिदो विश्वपार्श्वाख्य कङ्कुश्चन्द्रम संस्थितः ॥ ७६ ॥

विपुलो राजवर्ताभो राशयः संप्रतिष्ठिताः ।

नालोपलघनोयस्य नगो वै गन्धमादनः ॥ ७७ ॥

फेनाभो मन्दरो मेरुमौलिभिर्जघनं गतः ।

बिम्बिते वर्णिकैरेषां चित्रवर्णो विराजते ॥ ७८ ॥

सुरालयोद्धताटोप इव हेमाचलो नटः ।

सहस्त्रयोजनायामः कदम्बो मन्दरोपरि ॥ ७९ ॥

गन्धमादनगाज्जम्बूवटवृक्षसुपार्श्वतः ।

विपुलोर्ध्वे महाश्वत्थस्तत्र शाखासमाकुलः ॥ ८० ॥

समानोदर्किणः सर्वे कादम्बं मानमाश्रिताः ।

उक्ताचलोपकण्ठेषु सरांसि विपुलानि तु ॥ ८१ ॥

वराणि च विचित्राणि भृंगोद्गीतानि सुन्दरि ।

वृद्धश्रवसुविख्यातं नाम्ना चैत्ररथं वनम् ॥ ८२ ॥

वैभ्राजमन्दनिर्ज्ञेयं नरहंतनिरन्दरम् ।

सदापुष्पफलोपेतं पालाशं जन्मजन्मनि ॥ ८३ ॥

सरश्चत्र रु सरस्तत्र महाभद्रं शतयेजनविस्तरम् ।

मानसं श्रेयसि गतं सितोदं रत्नधातरि ॥ ८४ ॥

सुरापीरच्चपानीयं तडाकमरुणोदकम् ।

नानापक्षिगणाकीर्णं कनकाम्बुजमालितम् ॥ ८५ ॥

ससमं प्राप्राजितं ं प्रोक्तं सहस्त्रोच्चूरय मन्थरम् ।

वरतूर्यंतडागानां चतुष्कशतविस्तृतम् ॥ ८६ ॥

वने सुहृच्चयोगाश्च सर्वकर्मफलोद्वहाः ।

शृङ्गसङ्गितया स्थाने गायंतीव मदालसां व –सा ॥ ८७ ॥

अमृताम्भोभिरत्यर्थं ये सुगुल्मलतावृताः ।

जुषन्ती च प्रियैः सर्वमशोकादि गृहाश्रयाः ॥ ८८ ॥

रामाः रु रामा सुदर्शनाज्जम्बूगन्धमादनमूर्ध्वगाः ।

महाकुम्भफलाटोपविटपायुतविस्तृताः ः ॥ ८९ ॥

पततां तत्फलानान्तु जीर्णानां रसवाहिनी ।
दक्षिणीकृत्य देवा दंसुर्शि च सुशिरामुहुः ॥ ९० ॥
वापीनां सरसः प्रोक्तं भिन्दन्त्या लोकसंस्थिताम् ।
तटं तूपगता ये तु वल्लिगुल्मलतादयः ॥ ९१ ॥
विकिराः सप्त दृषदः सर्वे ते रुचिरात्मकाः ।
सर्वाधस्ताच्चतुर्दिक्षु नवसाहस्रविस्तरे ॥ ९२ ॥
इलस्तत्राभिषिक्तस्तु अग्नीध्रेण महात्मना ।
नभोऽनुभानुसन्तप्ता सलावृतगता जनाः ॥ ९३ ॥
जनास्ते पुण्यकर्माणो रत्नसानोरिलावृताः ।
कृतान्ते तस्य निषधो मेरुतुल्यो महीधरः ॥ ९४ ॥
बालहेलवपुर्मेरोः समाभिर्माल्यवान्गतः ।
धर्मोदकयुतः सो हि द्वासहस्रायुतत्रयम् ॥ ९५ ॥
सूर्यकान्तशिलानद्धसहस्रब्धी समण्डलः ।
श्वेतस्य पश्चिमे चैव नाम्ना वै गन्धमादनः ॥ ९६ ॥
सुतार्पिच्च च्चविरसौ श्रेयोनिधिविभागशः ।
तस्याधो दिग्गतं वर्षं पदच्चं केतुमालिनि ॥ ९७ ॥
द्वात्रिंशतिसहस्राणि पूर्वपश्चापरं च तत् ।
उदग्दक्षिणतश्चापि गन्धमादनसंज्ञितः ॥ ९८ ॥
तद्भाजनाः पिपासन्ति मानसं सुरसासवम् ।

इन्दीवरदलाभासो वध्याङ्गायुतजीविनः ॥ ९९ ॥

धूतधाम्नीं सुदितिजाह्वित्वा ख -जाजित्वा सीत्के ख सील्के तु

मालिकान् ।

उद्धूकृताहवा मदमुदितेन महात्मना ॥ १०० ॥

तेनैतत् केतुमालन्तु भद्राक्षमपरं शृणु ।

माल्यवत उत्तराशान्तः केतुमालसमाहितम् ॥ १०१ ॥

भद्रश्चापं ददौ सम्यक् सूनवेऽसौ प्रियं प्रति ।

कलधौतरुचस्तत्र जनाश्चूतामृताशनाः ॥ १०२ ॥

आयुः समायुतं तेषामवलं रूपयौवनम् ।

निषधान् महिषः केतोर्हेमकूटाचलो महान् ॥ १०३ ॥

सुहाटकशिला नद्धसानुरान्धनिसम्बकः ।

श्वेतवत् तत्प्रतिष्ठा तु चितिश्चापि सतद्रूहः ॥ १०४ ॥

वशी तस्य तु यो लोको हरये दत्तवान् हितम् ।

आग्नीन्ध्रो नृपशार्दूलो हरिवर्षं हिते न तु ॥ १०५ ॥

हरिणांकवपुष्मन्तो जनास्तत्र सुदर्शनाः ।

अनन्यजविलासाढ्याः प्ररूपा नवयौवनाः ॥ १०६ ॥

रम्याः ख रम्या फलरसाहाराः सुखिनो रमणायुषः ।

रमणं हरिवर्षञ्च समन्तात् समलक्षणम् ॥ १०७ ॥

हेमकूटान्तिके हेमधन्वाख्यः श्रीधराश्रयः ।

Sampath_eBooks

शृङ्गवर्षान्तसंस्थानं शोभा वास्य प्रकीर्त्तिता ॥ १०८ ॥

हिरण्मयसमं राष्ट्रं हिमवद्धेमकूटयोः ।

रत्नागरतं रम्यं तद्गन्धर्वायतच्चविः ॥ १०९ ॥

स्वपिता सुविनीताय कलाकौशल्यशालिने ।

दिण्डीरकं वर्णजनं नाम्ना किंपुरुषं हितम् ॥ ११० ॥

सुप्तक्षोदर्कनिष्यन्द मदिराक्षीव चेतसः ।

तद्गताः प्राणिनः सर्वे सुखिनोऽयुतजीविनः ॥ १११ ॥

प्रालेयरोधसो याम्यें सौम्ये चाद्रिरिव मालिनः ।

कार्मुकाकारसंस्थानं कुरुवर्षं कुरु मानसम् ॥ ११२ ॥

विद्यास्त्रकुशलःश्रीमांस्ताभिस्तत्राभिषेचितः ।

तेन स्वसूनवे ह्येतदृषभाय समर्पितम् ॥ ११३ ॥

तेनाभिविभृतं भूयो भरताय महात्मने ।

तन्नाम्ना भारतं ह्येतत् कर्मार्जनदशावहम् ॥ ११४ ॥

वारिवर्षविभेदोऽस्य वक्ष्यते विष्किरीश्वरः ।

शीतसानोः समाश्लिष्टं नाम्ना बिन्दुसरः सरः ॥ ११५ ॥

तदारभ्याक्षशतिकं चसिमं दुर्जनाकुलम् ।

वा विलुप्तं च तन्मानं दुहित्रे तद् ददौ भुव ः॥ ११६ ॥

कुमार्यै भरतो राजा सपत्नेन्दुनभोग्रहः ।

वर्षं कुमारिकासंज्ञमतो ह्येतत् प्रगीयते ॥ ११७ ॥

योजनानां सहस्रन्तु नानावर्णसमन्वितम्।

भूयांसोऽत्र यवीयांसः संस्थिता कुलसानवः ॥ ११८ ॥

सप्त ते तु प्रवक्ष्यामि श्रूयतां तेन कुम्भज ।

रैवतः पारियात्रश्च शक्तिमानृक्ष पर्वतः ॥ ११९ ॥

सह्यो महेन्द्रो मलयो धेनु वाहतटे गतौ।

कन्यकाख्यस्य मध्यस्थं तन्मानं तत् प्रतिष्ठितम् ॥ १२० ॥

पिप्पलान्तरसञ्चारं रम्यं वर्षाष्टकं तथा।

पुत्राष्टकाय भरतः साभिषेकं प्रयच्छति ॥ १२१ ॥

गान्धर्वो वारुणः सौम्यो रागश्चापि गभस्तिमान्।

ताम्रवर्णकसरोबिन्दुर्देशा ह्येषां हिमागमाः ॥ १२२ ॥

कुमुदोन्नतकल्हाराः वरुणा भूभृतस्त्रयः।

कोलाहलिः कपिर्नीलो गन्धर्वोऽपि तथैव हि ॥ १२३ ॥

शम्यः शालाचलो नागो नागाद्रिः श्रंथनो निलः ।

गभस्तिमतिविख्याताः पञ्च तुङ्गा महीधराः ॥ १२४ ॥

विद्रुमः शेवलश्चन्द्रो द्विरेफोऽरुणसानुमान्।

ताम्रवर्णो समाग्रस्तु ताम्रपादः शिलाचलः ॥ १२५ ॥

कशेरुक ः कशेरौ तु गिरिभद्राकरः परः।

शिखरित्रयस्तथा चैन्द्रभूभृतावमरालयौ ॥ १२६ ॥

नानाश्वापदसंकीर्णाः सारसेन्द्रसमाकुलाः ।

चित्रयोनिनगोद्यानसुमनोधूलिधूसराः ॥ १२७ ॥

इन्द्रद्वीपस्य संलग्नः परितोयः कबन्धवृत् ।

अम्बुगाधमतिक्रम्य तस्यान्तः शतयोजनम् ॥ १२८ ॥

मालालीलांगतं देवि द्वीपषट्काधसंस्थितम्

अङ्गो यवोऽथ मलयः शंखश्च कुमुदाकरः ॥ १२९ ॥

सवराहो गणा ह्येष व ह्यष द्वीपानां परिकीर्त्तितः ।

कन्यावारुणयोरन्तर्योऽगाधो मलसञ्चयः ॥ १३० ॥

तन्मध्ये मलयो नाम सानुमांस्त्रि विभागगः ।

दक्षिणेन त्रिकूटस्य सुवेलाख्यश्च वामतः ॥ १३१ ॥

तत्र पूर्वं सुवर्णेन या सा जम्बू सुदर्शना ।

तद् वितीर्णा मत्ता लंकाक्षिप्तात्रोद्यत्करालिनी ॥ १३२ ॥

दीर्घोदर्करसानन्तप्लवङ्गप्लुतिभूमिगः ।

मलय ः सर्वसौवर्णो बभौ तत्कालगः प्रिये ॥ १३३ ॥

दक्षिणाङ्गे त्रिकूटाख्ये तस्य लंका व्यवस्थिता ।

पिशिताशिगणाकीर्णा निर्मिता जम्बूमालिना ॥ १३४ ॥

संक्रन्दनेन तद्वत्सादपहृत्याय जन्मने ।

प्रदत्ता तं विनिर्जित्य जग्राह दशकन्धरः ॥ १३५ ॥

विभीषणस्ततो राजर्णभ स्तस्मिन्नसुप्रिये ।

कन्याख्ये यत् कृतं कर्म जन्तुभिस्तु सितासितम् ॥ १३६ ॥

स्वर्नरकापवर्गेषु तद्बीजं फलभोगजम्।
अत्रावताराः भूयांसो मम तुभ्यं च पार्वति ॥ १३७ ॥
पवित्राम्भःप्रतिष्ठानां गणरुद्रनिषेविताः ।
कालिन्दी सुरदीर्घिका शतभवा गोदावरी नर्मदा ।
भद्रा कृष्णवती च भीमरथिका तापी पयोष्णी बला ॥ १३८ ॥
सिन्धुश्चापि सरस्वती सरयुका ऐरावती गण्डकी ।
शोणा गोमतिका च चन्द्रविभवा नद्यः पवित्रात्र तु ॥ १३९ ॥
योगिन्यः सकलार्थ वेदविभवा वीरारवा योगिनः।
वामाचार कृतास्य दामलद्दशस्तन्त्रो कुमार्गाश्रिताः ॥ १४० ॥
शीघ्रं ये षुभिलाषिणः फलभुजो जायन्ति नान्यत्र तु
वक्ष्ये भैरव मातृभूतविभवात्युग्रग्रहाणि स्फुटम्॥ १४१ ॥
प्रयागचित्रा करवीरहेतुकामेकाम्रका भैरवमट्टहासकम्।
प्रहर्षशूले सकला मालिनं महाव्रतं गन्धवती च चारणम्॥ १४२ ॥
विरजा महोदया वालालंपा चेति दशाष्टकम् ।
श्मशानं समाख्यातं निष्पाद्यं तत्र योगिभिः॥ १४३ ॥
उत्साहबलसंपन्ना लब्धा समरसादरात् ।
योगिनीभ्योऽथ मातृभ्यो गुरोरंघ्रिप्रतिष्ठिताः ॥ १४४ ॥
एवमेतानि वर्षाणि जम्बूद्वीपे स्थितानि तु।
कुलशैलान् प्रवक्ष्यामि नाख्याता येषु सुव्रत ॥ १४५ ॥

Sampath_eBooks

विशालः कम्बलः कृष्णो जयन्तो हरिपर्वतः ।
अशोको वर्द्धमानश्च केतुमालो नगोत्तमाः ॥ १४६ ॥
शङ्खशैवलतापिच्च स्वर्णमायूरकन्धराः ।
पाटलाः पद्मरागांताः क्रमशोऽमी महीभृतः ॥ १४७ ॥
शैवालपर्णो हरितो गालो गोरोचनप्रभः ।
अभ्रकारश्च कौरञ्जः श्वेतो मारलसन्निभः ॥ १४८ ॥
कृष्णवर्णः स्मृतो नीलः पञ्चामी भद्रसंज्ञिते ।
दर्दुरो दामनखरी सप्तशृङ्गचतुष्टयम् ॥ १४९ ॥
कपाततव भ्रुमाञ्जिष्ठकांस्यलीनक्रमेण तु ।
कुलाद्रिवृन्दगान्धर्वे हरौ युग्मं प्रतिष्ठितम् ॥ १५० ॥
शतशृङ्ऽगोग्निसारश्च सुरसिद्धनिषेवितः ।
दिव्यौषधिसमाकीर्णाः सर्वरत्नालयाः शुभाः ॥ १५१ ॥
चित्रद्रुमलताकीर्णाः सिद्धद्रव्यसमाकुलाः ।
नानाण्डजकलालापाः कोलाहल निनादिताः ॥ १५२ ॥
लवणाम्भोमहामालापरिक्षिप्तमिदं प्रिये ।
जम्बुवर्षं समन्ताच्च लक्षयोजनमानकम् ॥ १५३ ॥
लवणाम्भोत्तरस्थानं दुरातङ्कनिवारकम् ।
यक्षोत्पत्तिविषादाद्या प्रविष्टा ये च पर्वताः ॥ १५४ ॥
नानाधातु महारत्त्रोघः स्थगितकन्धराः ।

टङ्करत्नशिलीभीषुहासोल्लासितदिङ्मुखाः ॥ १५५ ॥

मरुर्मत्यन्तिके चाशु चिज्जन्मनि त्रयस्त्रयः ।

ऋषभो दुन्दुभिर्धूम्रः मूकमेतन्मरुत्पतिः ॥ १५६ ॥

बलाहकस्तथा चक्रो मैनाकः प्राणिहन्तरिः ।

चक्रमैनाकद्योरन्तः सदाटोपी सवाडवः ॥ १५७ ॥

प्रतीच्यान्नारदः सोमो वरोरश्च त्रयोरगाः ।

चन्द्रद्रोणस्तथा कङ्कस्त्रयोऽमी जन्मजन्मनि ॥ १५८ ॥

गौविर्ये तु न मतुलं परिक्रम्याद्रिमध्यतः ।

चन्द्रद्वीपं तु तत्रैव सहस्त्रपरिविस्तरम् ॥ १५९ ॥

द्राक्षाफलरसाहारा लोकास्तत्रायुतायुषः ।

स्वच्चमुक्ताफलप्रख्या दर्पकानन्दलालसाः ॥ १६० ॥

मृगपत्रैः सहस्राणि चत्वारो जलमध्यतः ।

दिव्यभद्राकरं द्वीपं योजनानां सहस्त्रकम् ॥ १६१ ॥

समायुतायुधो जीवाः प्राचीनफलभोजनाः ।

भारता रूपसंपन्नाः नीरुजः स्थिरयौवनाः ॥ १६२ ॥

अब्दिक् सहस्त्रदशकं प्रविश्य लवणार्णवम् ।

सहस्त्रयोजनायामं वर्षं कुमुदसंज्ञकम् ॥ १६३ ॥

तत् प्रद्योतप्रभालोकाः सर्वे तेऽयुतजीविनः ।

कराट्दफलाहाराः शूर्पकादिविलासिनः ॥ १६४ ॥

Sampath_eBooks

योजनानां सहस्राणि चत्वार्यापो विलङ्घ्य तु ।
क्रूरकर्तेरिकङ्काख्यमयुतां युवतिप्रभाम् ॥ १६५ ॥
सैन्दोदोलर्कफलभुक् प्रद्युम्नललनारसम् ।
अयुतं रविसादृश्यमयुतात् स्वप्रतिष्ठितम् ॥ १६६ ॥
दूती भर्तेरिसंघाख्य निःसारफलभोजनाः ।
दरदाः भाजनस्तत्र वर्षाणां युतजीविनः ॥ १६७ ॥
चारोदकफलाहारभोजनाः कम्बुवर्षगाः ।
स्फुरत् कर्माद्दवर्णाभाः लावण्यजितमन्मथां ॥ १६८ ॥
आपोयुतं व्यतिक्रम्य तद्दशांश प्रतिष्ठितम् ।
चित्रभानोरिदं चित्तं सचित्रजीवसमाकुलम् ॥ १६९ ॥
वारेरेकसहस्रन्तु व्यतिक्रम्य नराधिपः ।
जम्बूद्वीपं सुनाशीरो नवसाहस्रविस्तरम् ॥ १७० ॥
हरिचन्द्रनिभा लोकास्तत्राप्ययुतजीविनः ।
श्रितमालफलाहाराः सर्वैश्वर्यसमन्विताः ॥ १७१ ॥
सहस्रत्रयविस्तीर्णहंसद्वीपंकमन्दिरे ।
जलायुते व्यतीते तु स्वच्चमुक्ताफलप्रभाः ॥ १७२ ॥
रुद्राक्षफलभोक्तारः प्रजास्तत्रायुतायुषः ।
उपद्वीपाष्टकमिदं लवणोदव्यवस्थितम् ॥ १७३ ॥
नृपकुलशैलयुक्तमिदमुक्तमनन्तगुणम् ।

Sampath_eBooks

लवणजले शतालुगता वर्षकलासहितम् ॥ १७४ ॥

विविधजनानुरूपफलभोगिविलासधरम् -।

सरिदमलाम्बुधौतविषयाश्रयजाम्बुनिधिम् ॥ १७५ ॥

स्थविराण्डकटाहेन सुमेरूर्बुध्नमध्यतः।

पञ्चाशत्तीर्थकोटीनांसमन्तात् पृथिवीतलम् ॥ १७६ ॥

स्वर्गङ्गावारिवेलाकवलितशिखरालंवितोद्दीपमान ।

न प्रक्रीडावनोदादमरकरिविषन्तोपसञ्चन्नसानौ ॥ १७७ ॥

लोके सव्रातपत्त्रोद्धृतखुरशिखरोत्खातगर्तै विचित्त्रे।

श्रूयन्ते नीलकण्ठामलचमरचिताः दिव्यवासाः सुमेरौ ॥ १७८ ॥

वज्रनिर्मलमणीन्द्रशिलाभिर्वर्षकोटि कटिगूढनिविष्टाः ।

आत्मभोरयुततूर्यसहस्त्रा विस्तरोच्चयसमानसभाश्च ॥ १७९ ॥

जातरूपविभवोन्नतसानौ ----------

मध्यमूर्ध्वविगतातुलशोभाः ॥ १८० ॥

सा मनोवतिरिति प्रकटाख्या भाति देवगणपीठसुपूर्णाः ।

तस्याः ककुप्स्वष्टसु सौधधाम्नाम् ॥ १८१ ॥

शाला विशाला वलयान्तरूपा ।

ऋक्सामगीतध्वनिमन्त्ररम्या ः विधौत चित्राः शशिकान्तवार्भिः ख -

वाग्भिः ॥ १८२ ॥

तपोवनं वेदशिरोऽतिरम्यं ।

Sampath_eBooks

दृशोर्वितानं शतयोजनं तत् ॥ १८३ ॥

दक्षाश्रमो हेम विशालशालो नभः स्वभिभ्राजति सुप्रपूर्णः ।

वसिष्ठवेदध्वनिलब्धनिद्रः स्थितोऽलकापुण्यजनाश्रमोऽन्यः ॥ १८४ ॥

या रव यां शिन्यविभ्रान्तपवित्रतोयं मित्रस्य विश्वा पदमस्य धामः ।

तपोवनं - संयुगवल्लभस्य निशाधिनेतुर्दिशि धर्मपूर्णे ॥ १८५ ॥

विशुद्धचामीकरकुण्डिताचले स्थिताचचक्षे स्थितिपा मदश्रीः ।

तत्कापिलं कापिलवृत्तिविप्रैः समाकुलं धामतनूरुपस्थम् ॥ १८६ ॥

यत्रास्ति सूत्रश्रुतिघोषपुष्टम् तपोवनं देवपितुश्च रम्यम् ।

सुरापगाक्षालनपुण्यभूमिम् सुरद्रुमः सुस्त्रवकाङ्क्षिताङ्कनः ॥ १८७ ॥

सदाफला सामकृतालया : लताः सदाश्रमा भान्त्यतिरम्यया श्रिया ।

तपन्ति तेषु मुनीन्द्रभास्कराः सुधाम्धसो ज्ञानविशुद्धबुद्धय :॥ १८८ ॥

स्तपोधनानन्दपरिच्चदानघा स्वचित्तवित्तोद्भवयोगजन्मनः ।

चतुराननककुभिः प्रतिष्ठित सकलमणिशिलानिलयम् ॥ १८९ ॥

शतधामकरामलचापपुञ्ज मुञ्जविलासम् ।

दशशतयोजनविपुलं तदुच्च्रयं सुप्रभावितानधरम् ॥ १९० ॥

ज्योतिष्कशिखरसंज्ञं धाम मृगाङ्काङ्कितजटस्य

स्वच्चच्चविमुक्ताफलविमलहिममुक्तमालशेखरिभिः ॥ १९१ ॥

विषमविलोचनहुतभुग्भाण्डमण्डलवेष्टितमुखाब्जैः ।

सौदामिनीलतान्तककरशिखरमहाशूलपाणिभिरमेयैः ॥ १९२ ॥

Sampath_eBooks

जन्तुजास्थिरचितभूषणविचित्राङ्गैर्नरकपालकरैः ।

दलितेन्द्र नीलशकलानुकारिवरात्ममौलिफणिपदकैः ॥ १९३ ॥

शिवमण्डलैस्समन्तात् समाकुलं रौद्रभोगधरैः ।

शिवकामिनीकपोलेंदुचन्द्रिकापूरितो हरिनिवासः ॥ १९४ ॥

क्षीरोदायनिसुरतरुशशिलक्ष्मीरत्नसंपूर्णः ।

अदृढरावहासोऽमलांशुर्मालाकारः स्थितो भाति ॥ १९५ ॥

मुक्ताहारसरोद्दामसुलम्बकसनाथ सुलम्वक इव ।

प्रथम व प्रमथ गणकलकलस्वनमहास्वनानेकघण्टिकामुखरः ॥ १९६ ॥

हड्डुवृषोत्थैः शब्दैः पयोधिमथनध्वनिविशालस्तत्र स्वचित्तजन्मनि

महासदोधिष्ठितं मदनकेतोः ।

सुरसिद्धकिन्नरोरगपिशिताशनयक्षरुद्रभृतम् ॥ १९७ ॥

अजिनेन्द्रशताति ख शतानि निर्मलचामराटोपमालितांघ्रियुगः सेव्यति

वृषोत्थ लक्ष्म्या स प्रेयान् सेवकैस्तस्याः ।

तस्यैवाम्बुजयो शिःदूल भुजि कलधौतसच्चिला ॥ १९८ ॥

शशिमण्युपास्त्रुत सलिलनिर्झरं भास्वरं सानु ।

तत्र विमलमणिरचितधरातलोपेन्द्रदर्शना वसति ॥ १९९ ॥

तारोदयेति नाम्ना सुपर्णखरनखरनखरवत् तरसा ।

पञ्चशतयोजनोच्चं शैवं तन्मण्डलं भाति ॥ २०० ॥

गगनाङ्गणतटघटित` प्रतिमेव हि श्रुतिं पूर्णाः ।

Sampath_eBooks

तासामधोर्ध्वभागे चरयुग्मसहस्रयोजने धाम्नि ॥ २०१ ॥

तन्मानविस्तरोच्छ्रयविलासिनी चक्रवातघटा ।

विविधपुरमदमत्तगनलीला परिघटनसङ्कटारम्यासिसंघादप्य भया

सुरयोधसंस्थिता भाति ॥ २०२ ॥

गगना भाजकरटकोटरमदाम्बुना प्रशंसितरजस्काः ।

अमरावतीपुरस्य प्राक् ककुभि मेंन्दिरो हृद्यः ॥ २०३ ॥

तस्यां शतधारकरः सुरवनिताहृदयनन्दनो वसति ।

मन्दारकुसुममदलुव्ध भृङ्गझाङ्कारललिता या ॥ २०४ ॥

तनु दिग्विचित्रभोगा रत्नावती विविधरत्नतटविकटा ।

वसुनिलया जनरम्या वसुभिः प्रतिपालिता वसति ॥ २०५ ॥

तस्याप्यनङ्गमदमुदितकामिनीकामुकाकुला विपुला ।

चन्द्रमसि चन्द्रधवला चित्त्रासौ कामिका नगरी ॥ २०६ ॥

अर्यमभुजदण्डार्गलरुद्धतृप्तारिधारणावेशा ।

तस्यापीन्दोः कान्ता नाम्ना सुरपुरी रम्या ॥ २०७ ॥

शशिशकलमौलि घनकिरणमञ्जरी जालपटलहृततिमिरा ।

शूलभृतो विश्वभर्तुरियं यशोवती नाम पुरी दिव्या ॥ २०८ ॥

प्रत्यगीशस्य पुरी परिनिर्मित धूर्तमण्डला पूर्णा ।

परिनिर्मितेति निर्मिते नाम्ना पुष्पेषुविलासलीलाढ्या ॥ २०९ ॥

समसमविलोचनवनितामुखशशधरकिरणमञ्जरी जटिला ।

Sampath_eBooks

तत्पश्चिमेपि नाम्ना सुकामदा वृषभकेतूनाम् ॥ २१० ॥

निधिनिचयपूर्णगर्भा तत्पश्चिमतोऽलकाकुला यक्षैः ।

यक्षवधूगणभूषणमणिकिरणालिङ्गितदिगन्ता ॥ २११ ॥

निर्मलदृक्करत्नप्रणालिनिर्धार्णधौतगृहचित्रा ।

शशिविमलमण्डलाभा सोमस्य महोदया नगरी ॥ २१२ ॥

सुमनापि किन्नराणां वीणारवमुखरदिगङ्गनाभोगा ।

तदनु येदेर्श ख्र येदर्श कंदर्प्पदर्पितानेकजनविपुला ॥ २१३ ॥

षड्जातिस्वरकलतारमन्द्रझङ्कारमूर्च्छनासुखदा ।

नाम्ना महोत्सवेति च गन्धर्वपुरी तु तत्पश्चात् ॥ २१४ ॥

हरितमणिदृशदमेयप्रकटतटाघात्मन्दिराभोगाः मन्दिरा ।

तन्निकटे वरनगरी कुमुदेति च कुमुददेवानाम् ॥ २१५ ॥

वृषदंशलोचनोपमरत्नशिलाघटितमन्दिराटोपा ।

गन्धवती गन्धमुचो गन्धवती सुगन्धिनी दिव्या ॥ २१६ ॥

मेघचितामलमणिकिरणमञ्जरी जालशालिता भाति ।

मरुता तद्दक्षिणतो मेघवती मेघगम्भीरा ॥ २१७ ॥

वृन्दारकसुरसुन्दरीलालसमदनगमनमदसरोजसः ।

वृन्दारकं नामधनं नगरं तु ततः परं भाति ॥ २१८ ॥

मदननिकेतनगुणचितचलसंपत्तनं श्रियोपचितम् ।

नाम्ना सुकान्तकान्तं ततः पिड्याधराणां स्यात् ॥ २१९ ॥

स्वच्चमुक्ताफलोन्नतविटङ्कगृहमालिकाः।

शशाङ्कधराः भाति वरुणस्य वरुणे शुद्धवती गगनभित्तिरिव ॥ २२० ॥

मित्रावरुणभुजार्गलपालितलक्ष्मी मनोभवाघ्राता।

भक्ता विशोकलोकैर्नाम विशोकापुरी रम्या ॥ २२१ ॥

अजितवधूजनविशनी नयनांबुजविकचमण्डला भाति।

सद्दीर्घिकेव रम्या तदुपार्जितसंज्ञका नगरी ॥ २२२ ॥

गुह्यकनिलयाभ्युन्नतपयोधरालोकदीपितानङ्गा ।

प्रावृडिव पुरी राजति तत्तत्कोलाहला विपुला ॥ २२३ ॥

पारदशिलातलोचितहर्म्यप्राकारतोरणाटोपा।

कृष्णवती क्रूरतमेन्द्रपालिता बलभुजि विशाला ॥ २२४ ॥

पितृतरुणपुरन्ध्रीमुखेन्दुचन्द्रिकाविहितनिबिडतिमिरपटा ।

घनवर्णमहिषखरपुटशिखरोत्खातधूलिपटपिहिता ॥ २२५ ॥

तस्याः प्रागभ्यासे सुकालिका वसति जनबहुला।

शुभ्रा प्रमर्दनां वनिताजनमुषितलावण्या ॥ २२६ ॥

नाम्ना प्रमर्दना नाम मर्दितारिभटसङ्कुला।

तत्प्राक्प्रत्यग्रविकासितानलसङ्कासोच्चुष्मतोयसम्पन्ना ः॥ २२७ ॥

विविधपिशाचवधूगणविराजिता पिङ्गलालि वैवस्वती विवस्वतो नगरी परिपालिता वसति।

विमलेन्द्रनीलमणिकिरणतन्तुपरिरचितमेव यदुपद्रुता ॥ २२८ ॥

लोहितविधुबुधधूवदनहेला विमलाञ्जना च ततः ।

हाटकशिला विटङ्कप्राकारा व्यूहमण्डलाभोगा ॥ २२९॥

नन्दा नगरीध्याता हारामरसेविता तत् प्राक न सत्यानन्त विलासिनी।

विलासा अमृताम्बुमदमुदिता नगरी शिवतीति कृष्णपिङ्गला भाति॥

२३०॥

शिश्विपश्चात ख -पश्चान्ते सुरबींद्धमृताहुतितृप्तवह्निगन्धाकुलानल

ललिता

तेजोवतीति सर्वा सेन्दुरपि गर्भिणी भाति॥ २३१॥

शिखिशिखरभासितुङ्गप्राकाराक्षिप्तमन्दिरारामा।

पूर्यंशुमालिनीह्यंशु मालिनस्तदुदगाद् भाति॥ २३२॥

विनयवतीति च विनतानन्दसुन्दरी पतितपत्त्रकविभूषा ।

पुष्पेषुरसासवमन्नजलपदा चापि तत् सौम्ये॥ २३३॥

विश्वामरातिलालसवनिता मुखकिरणविद्युदुल्लशनैः ।

विनिहतचलांधकारा तदुदग्विद्युत्प्रभा वसंति॥ २३४॥

इति विविधभोगसंपत् सुखान्वितोनेकजनसुराकीर्णाः।

पुर्योऽमरनगरोद्ध्र्वे प्रकाशिता लेशतो नृपतेः॥ २३७॥

पञ्चाशतिकास्तु सर्वे लोकेश्वरपालिता पुरोद्देशाः।

शतिकाप्य विशिष्टास्ते शेषसुरनिकायि कुलवासाः॥ २३८॥

कथितमिदमनन्तं भूतले भूति भोगम्

पुरजलधिसमेतं द्वीपयुक्तं समानम् ।

सुरगिरिकृतधाम्नां सम्पदो वर्णिताश्च

शृणु हिमगिरिसुनोर्नाकलोकेऽधुना त्वम् ॥ २३९ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्रे प्रथमषट्के कालसङ्कर्षण्याम् अष्टमः पटलः ॥ ८ ॥

नवमः पटलः

श्रीभैरव उवाच ।

धरातो योजनाल्लक्ष्यो भान्वन्तः स भुवः स्मृतः ।

पतयो विष्टपानान्तु तत्र वस्वादयो मताः ॥ १ ॥

धारो ध्रुवोऽथ सावित्रः सोमोऽन्यो ह्यनिलोऽनलः ।

प्रत्यूषश्च प्रमोदश्च वसवोऽष्टौ प्रकीर्तिताः ॥ २ ॥

अङ्गारकस्तथा सपिर्निहतः निरृतः सदसत्पतिः ।

अजश्चैवैकपादश्च धूमकेतुर्जरस्तथा ॥ ३ ॥

भुवनेशः कपालीशो मृत्युश्चैकादश स्मृतः ।

एकादशामी तनवो निर्गता वपुषो मम् ॥ ४ ॥

जरामरणनिर्मुक्ता मुण्डखट्वाङ्गधारिणः ।

कपालमालाभरणाः सभुजाङ्गाः स्वचक्षुषः ॥ ५ ॥

कल्माषकलकाः शुभ्रा विधुलेखाङ्कितोत्तमाः ।

विविच्येतोदः प्रोक्तो नाम्ना भास्वन्ति चाव तु ॥ ६ ॥

धातार्यमा भगो मित्रो वरुणेन्द्रौ जघन्यकः ।

विवस्वान्विष्णुपर्जन्यौ पूषापि च जगत्पतिः ॥ ७ ॥

कश्यपे नादितेर्जातास्तेनादित्याः प्रकीर्त्तिताः ।

तुलादौ संक्रमंत्येते राशौ राशौ पुनः पुनः ॥ ८ ॥

योजनायुत विस्तीर्णा अतो ह्यमरसम्भवाः ।

पंचारचक्रमेकन्तु सहस्रद्वयविस्तरम् ॥ ९ ॥

वाजिनः सप्त साहस्राः सप्त सामाङ्गसम्भवाः ।

यज्ञरूपसहस्राणि चत्वार्युरगयोत्क्रकम् ॥ १० ॥

ऋग्यजूंषि धुरे शक्रो वरुथिः परिकीर्तिताः ।

धर्मेन शतमोक्षस्तु कडुनी द्दक्स्रवा मता ॥ ११ ॥

अनुकम्प्यात्मनो रंहो वर्णयोनिर्गतिः स्मृता ।

यत् तद् धाम परं तस्मिन् नवसाहस्रविस्तरम् ॥ १२ ॥

सहस्राभीषु संपन्नममलं दीपवर्तिवत् ।

तदारूढं जगत्यस्मिन् प्रतताप ववर्ष च ॥ १३ ॥

सञ्जहारासृजच्चैव ववाप च सदैव हि ।

शक्रर्क्रीडाचलस्योद्ध्र्वे ह्यधोमानं तपत्यसौ ॥ १४ ॥

लोकालोकान्तरस्यापि विचित्रे विष्टपद्वये ।

पूज्यमानोऽधिपस्यांत स्थापिन्यां भूर्भुव सुवः ॥ १५ ॥

सर्वरूद्राभिधानाद्या मृत्युरिच्चानियोगतः ।

Sampath_eBooks

एषादित्यः समाख्यातः परापरविभागशः ॥ १६ ॥

तस्योपरिष्टाल्लक्षेण सम्पूर्णं चन्द्रमण्डलम् ।

भास्वतो द्विगुणं तद्धि तद्रथश्च तथैव हि ॥ १७ ॥

सोमो दशभुजः शुभ्रो रथोऽप्यस्य त्रिचक्रवान् ।

संतारकं स्मृतं चक्रमेकैकं मुनिनन्दन ॥ १८ ॥

सप्तमस्तुहिनाभस्तु तं विवर्षन्ति षोडश ।

नवस्यन्दनवाहाश्च शुकपिच्चत्त्विषो मताः ॥ १९ ॥

तदूर्ध्वमेकलक्षेण भाति भामण्डलामयी ।

तस्माल्लक्षद्वयेनैव ज्ञेयज्ञानिषु तु विराजते ॥ २० ॥

ततोर्ध्वं च द्विलक्षेण स्फूर्जिततेजसा गुरुं ॥ २१ ॥

लोहितो लक्षयुग्मेन तदूर्ध्वे च गुरुस्तथा ।

वैवस्वतो द्विलक्षेण तस्योपरि तपोधनः ॥ २२ ॥

संस्थिता लक्षमात्रेण सप्त तान् नामभिः शृणु ।

विश्वामित्रो वसिष्ठश्च भरद्वाजोऽत्रिवत्सरौ ॥ २३ ॥

गौतमो जमदग्निश्च प्रोक्ता ह्येते तपोधनाः ।

लक्षैकेन ध्रुवस्तस्मान् मेषीभूतो व्यवस्थितः ॥ २४ ॥

तस्या चोत्तानपादस्तु भगवानुतरो हनुः ।

यज्ञश्चैवाधनो धर्मो मूर्द्धानः परिकीर्तिताः ॥ २५ ॥

हृदि नारायणस्तस्य मित्रः पाणौ व्यवस्थितः ।

प्राक् वरुणो वह्निः सव्ये पश्चिमे चार्यमा सुधीः ॥ २६ ॥

मारीचिः कश्यपाग्नीन्ध्रौ स्वच्छः संवत्सरो ध्वजः ।

ध्रुवोंका व ख ध्रुवोका स्मृतो ह्येष स चतुर्दशतारकः ॥ २७ ॥

स्वर्लोकः कीर्तितो ह्येष भवः स्वप्रतिपालितः ।

अत्र ते वायवः सन्ति स्वं स्वं प्रति समाश्रिताः ॥ २८ ॥

धराधरोऽन्तरालस्थः प्रथमस्त्वावहो मरुत् ।

स्वर्भानोरद्वितीयस्तु प्रवदाख्यः प्रभञ्जनः ॥ २९ ॥

उद्वाहाख्यो निलस्कन्धः सोमो दर्घ्ये व ख दर्घ्य व्यवस्थितः ।

चतुर्थः संवहो भान्तो वायुस्कन्धः प्रतिष्ठितः ॥ ३० ॥

सौमि सौम्यांतरंगस्थो निवहो मारुताश्रयः ।

मुनिमण्डलरुद्धस्तु स्कन्धश्चैव परावहः ॥ ३१ ॥

ध्रुवान्तः सप्तमः स्कन्धः स्थितः परिवहः शुभः ।

स्युर्विष्टपगता ये च निकाया देवतात्मकाः ॥ ३२ ॥

दुश्चवनादिकाश्चित्रास्त्रिदशाश्चाग्निष्टान्तकाः ।

निन्दितो वशवर्ती च परिनिर्मिस्तथा खगः ॥ ३३ ॥

सर्वे संकल्पसिद्धास्तु शतायुः कामभोगिनः ।

उडुराजाभदेहास्तु वृन्दाराष्टगणैर्युताः ॥ ३४ ॥

प्रवराभिरप्सरोभिः परिवारकृतास्पदाः ।

उर्वीतः कीर्तितं ह्येतत् त्रैलोक्यं जन्तुसङ्कुलम् ॥ ३५ ॥

Sampath_eBooks

तस्य मध्ये विमानानामष्टाविंशतिकोटयः।

वसन्ति स्वभुजा दीप्ता निबद्धा वारिरज्जुना ॥ ३६ ॥

यज्ञकर्मरताभ्यस्तु प्रजाभ्यः पुण्यकर्मणाम्।

प्रीणन्ति ते पुनर्लोके भोगदाः संभवन्ति हि ॥ ३७ ॥

तद्देर्ध्वे सुमहल्लोको योजनानां द्विकोटिगः।

प्राजापत्याः स्थिता यत्र ते देवाः पञ्चमण्डलाः ॥ ३८ ॥

महाभूतानां चरास्तु कुमुदारिभवास्तथा।

प्रमदान्तास्तथा जातां परीतानां चरेऽपि च ॥ ३९ ॥

ध्यानाहारा महाकल्पसहस्त्रायुष एव ते।

तत्र भीमोऽधिपः ख्यातः क्वचित्तन्त्रे प्रजापतिः ॥ ४० ॥

तस्मात् कोषस्तु विपुलो जनलोकप्रतिष्ठितः ।

चतुर्देवनिकायस्तु ब्रह्मा वसति यत्र तु ॥ ४१ ॥

ब्रह्मा पुरोहितो नाम नान्ये ब्रह्मकायिकाः।

महाकायिकाः परान्ये भूताक्षावासिनः सदा ॥ ४२ ॥

महादेवा विपोह्यात्र भृग्वाद्या मुनयोऽपि तु।

कोटिर्द्वादशकं चोर्ध्वे तपः संपरिकीर्तितम् ॥ ४३ ॥

अत्रापि संस्थिता देवा आभास्वरमहास्वराः।

महास्वराः सप्त चापि भूताक्षाः प्रकृतिंजयाः ॥ ४४ ॥

ध्यानाहारास्तु ते सर्वे द्विगुणायुषः ऊर्ध्वं प्रतिहत ज्ञानानो

धृताधरभूमिषु ॥

सनकाद्यास्तु पितरश्चोग्रस्तत्राधिपो मतः ।

सत्यलोके परे ब्राह्मे चतुर्देवनिकायकः ॥ ४५ ॥

वितर्कध्यानसुखिनो देवास्तत्र व्युपागताः ।

शुद्धभावविचारस्थाः सत्याभानन्दमात्रतः ॥ ४६ ॥

असंज्ञासंज्ञनामानो यस्मिन्नाध्यानमात्रतः

नो कृता भुवनन्यासा ह्युपर्युपरि संस्थिताः ॥ ४७ ॥

स्वर्गायुषः स्वप्रतिष्ठाप्रदानाधस्ततः सदा ।

सनकाद्याश्च ऋषयो भुवनान्तर्निवासिनः ॥ ४८ ॥

प्रतिष्ठितास्तु लोकाग्रे ब्रह्मात्राधिपतिः स्मृतः ।

सब्रह्मकाः सदैवेत्याः सप्त लोकाः प्रकीर्तिताः ॥ ४९ ॥

अनिवृत्ताधिकारास्तु लोकत्रयनिवासिनः ।

सङ्क्रन्दनादिकस्तेषां महल्लोकोदयः स्मृताः ॥ ५० ॥

महीयंते च सह्येते ये ज्येष्ठनधिकारिणः ।

सत्योर्ध्वे द्विजसंवासो व्योमषट्कयुगेंदुगः ॥ ५१ ॥

सत्यश्चापि समुत्सेधास्त्वन्मुखो गुणरूपतः ।

तस्याधिकारसंस्थानं प्रसन्नं लोकवन्दितम् ॥ ५२ ॥

योगेन कुरुते सृष्टिं तत्रस्थोऽसन्निवारितः ।

ततोऽच्युतस्तमोवासः सुरसिद्धनिषेवितः ॥ ५३ ॥

Sampath_eBooks

भूतवद्धि वशो वेदैः सुधर्मैः संप्रतिष्ठितः।
स तस्मिन् संस्थितश्चक्री पालयेद् विश्वमादरात्॥ ५४॥
संख्यादियोगिनां सिद्धयोगः सम्यच्छ्रियावहः।
एतद्धामसमाख्यातो मनोपमगुहावहः ॥ ५५॥
चतुष्कोटिस्तदूर्ध्वे तु सन्निवासोऽतिलालसः।
शिवधर्मरतानान्तु भोगस्थानाय कल्पितः॥ ५६॥
अण्डस्यान्तर्गता भोगाः शतांशेनापि योऽप्युणुः ।
समानभाजो विविधास्तस्य किं वर्ण्यते नृप॥ ५७॥
अथातोण्डबहिर्देवाः सन्ति खण्डेन्दुमौलयः।
कापालिका विरूपालिका विरूपाक्षा जटिला दश॥ ५८॥
बहवो दिक्प्रमाणाश्च ते दिग्भिः प्रेतारुढा मलाविलाः।
बालभास्करभाभासः शूलिनः कृत्तिवाससः ॥ ५९॥
तेजोनिधिवलाग्रास्तु सुप्रतिष्ठानयोगिनः।
जगत्यस्मिञ्जगद्योने मधुना परिपालिते॥ ६०॥
तेषां नामानि वक्ष्यामि सन्देहविनिवृत्तये।
कापिलको ह्यजो बुद्धो वज्रकायः प्रमर्दनः॥ ६१॥
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः।
प्राच्यामेते महावीराः सुराशीरर्चिताः पराः॥ ६२॥
अग्निरुद्रो हुताशी च पिङ्गलः स्वादको हरः।

ज्वलनो दहनो वभ्रुर्भस्मान्तकः क्षयान्तकः ॥ ६३ ॥

तेजस्येते सुतेजस्कास्तेजसाराधितांघ्रयः ।

स्वाभियोगं प्रकुर्वन्ति सर्वत्र प्रभविष्णवः ॥ ६४ ॥

याम्यो मृत्युहरो धाता विधाता कर्तृऽ मतः ।

कालरुद्रो धर्मपतिरधर्मपतिरेव च ॥ ६५

संयोक्ता च वियोक्ता च दक्षिणस्यां दिशि स्थिताः ।

विचरन्ति भवा ह्येते पूजिताः कृष्णलक्षणाः ॥ ६६ ॥

नैर्ऋतो मारणो हर्ता क्रूरदृष्टिर्भयानकः ।

ऊर्ध्वशेषो विरूपाक्षो नीललोहितदंष्ट्रवान् ॥ ६७ ॥

ते मोदन्ते महादेवास्ते भोजनयवीयसः ।

स्वाभियोगं प्रकुर्वन्ति पूज्यमानाः स्वगोचरे ॥ ६८ ॥

बलश्चातिबलश्चैव पाशहस्तो महाबलः ।

श्वेतोर्ध्वजयभद्राख्या दीर्घबाहुर्जलान्तकः ॥ ६९ ॥

तनुवास्यो भीषणश्च यस्यासौ महेश्वरः ।

मणिधात्र्योज्यमानास्तु पालयन्त्यण्डमुत्कटम् ॥ ७० ॥

मरुतार्चिस्नापतोऽन्ये संस्थिता मरूदीश्वराः ।

शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्ष्यान्तकाः ॥ ७१ ॥

पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः ।

जटामुकुटधारी च चित्रमाणिक्यधृक् परः ॥ ७२ ॥

निधीशो रूपवान् धन्यः सौम्यदेहः प्रकाशावान् ।

प्रवाहो लक्ष्मिधामान्यः कामरूपी दिगुत्तरे ॥ ७३ ॥

द्रविणः सशिरोमौलिरभिज्ञानाङ्किताङ्घ्रयः ।

रमन्त्येते महावीरा ः निधिलक्ष्म्याव गूहिताः ॥ ७४ ॥

विद्याधिपो ज्ञानधरः सर्वज्ञो वेदपारगः ।

माता पिता पिङ्गलाक्षो भूतयोबलिभिः प्रियः ॥ ७५ ॥

सर्वविद्याविधाता च सुखदुःखकरः परः ।

सितकण्ठःसितग्रीवः शितिकण्ठप्रपूजितः ॥ ७६ ॥

रुद्रविथौ विचेष्टन्ति स्वप्रभा ख सप्रभाः परिवेष्टिताः ।

शंभुर्विभुर्गणाध्यक्षस्त्र्यक्षस्त्रिदशवन्दितः ॥ ७७ ॥

संवाहको विवाहश्च नभोलिप्सुर्विचक्षणः ।

मेधसा पूजिता ह्येते तिष्ठन्त्युपरियोगिनः ॥ ७८

प्रभुवीर्यसमाख्याताः स्वाधिकारकृता पराः ।

अनन्तः पालको वीरः पातालाधिपतिस्तथा ॥ ७९ ॥

नृपो वृषधरो धैर्यो ग्रसनः सर्वतोमुखः ।

सुशुभ्रश्चाप्य नाम्नामीदश रुद्राः प्रकीर्तिताः ॥ ८० ॥

शारङ्गवपुषो मूर्द्धमणीन्द्रकिणितांघ्रयः ।

भयोर्मिहन्यमानस्य ब्रह्मणोऽण्डस्य सुव्रत ॥ ८१ ॥

फलं न नौमि गरूढा रक्षन्त्येते महेश्वराः ।

तत्रप्रोक्तमनन्ताख्यमिदं तत्र- चित्रमिदंत्वितम् ॥ ८२ ॥

दशधास्य बहिर्वृन्दमवासं शिवसङ्कुलम्।

निधने समनोभाभिर्वीरास्ते तत्र संस्थिताः ॥ ८३ ॥

स्वनियोगकृता देवाः स्वाकाण्डादित्यविग्रहा।

अमरेशं प्रभासञ्च नमिषं पुस्करं शडिम् ॥ ८४ ॥

दिण्डिं च भारभूतिञ्च लकुलीशं तु चाष्टमम्।

प्रत्यात्मिकाष्टकमिदमतो गुह्यातिगुह्यकम् ॥ ८५ ॥

तत्तेजसि स्थितं वत्सबीभत्सं बलशालि च।

हरिश्चन्द्रश्च श्रीभूभृन्महाकालस्तृतीयकः ॥ ८६ ॥

आम्रातकेशजल्पेशमध्यकेदारभैरवाः ।

गया चैव कुरुक्षेत्रं नखलं कनखलं परम् ॥ ८७ ॥

विमरेश्वराट्टहासं माहेन्द्रं भीममष्टमम् ।

गुह्याष्टकमिदं मेरुसूक्ष्माक्रान्तं ह्यधोगतिम् ॥ ८८ ॥

करालाण्डं दुराण्डञ्च माकोटं मण्डलेश्वरम्।

कालिञ्जरं दारुवनं शङ्कुकर्णं कुलेश्वरम् ॥ ८९ ॥

व्योम्नीदञ्च पवित्राख्यं स्थानमन्यदहङ्कृतिम्।

वस्त्रापदं रुद्रकोटिमविमुक्तं महालयम् ॥ ९० ॥

गोकर्णं भद्रकर्णञ्च स्वर्णाक्षं स्थाणुमष्टमम् ।

चत्वारिंशदमी वीरास्तत्त्वपञ्चकवासिनः ॥ ९१ ॥

ग्रन्थ्युत्थकापरणै सूक्ष्मभूतवपुर्भुजः ।
अतो महातिदेवानां योनयोऽष्टौ वसन्ति हि ॥ ९२ ॥
पैशाचं राक्षसं याक्षं गान्धर्वं त्वैन्द्रमेव च ।
प्राजापत्यञ्च चान्द्रञ्च मेधाष्टकसमुदाहृतम् ॥ ९३ ॥
आशां तन्मात्रजेभ्यस्तु भूतेभ्यस्तत्र भोगगः ।
सम्बन्धः संभवत्येष विग्रहेशवशाङ्कितः ॥ ९४ ॥
तपान्वादितिवासीनां पिशाचादिदिवौकसाम् ।
ब्रह्मणोद्भूतभोगेभ्यः पिण्डभूता भवन्ति हि ॥ ९५ ॥
यथास्थानं महीयन्ते विकारवशानुगाः ।
सप्तस्वेव महाभागाः पदवीषु तथाङ्किताः ॥ ९६ ॥
शिरोव्रताभिषिक्तास्तु वेदान्तविदुषो जनाः ।
ब्रह्मलोकं महाप्राप्ता ब्रह्मभोगेषु भोगिनः ॥ ९७ ॥
कारणं शक्तिक्षुभितोस्त्वेकदेशो गुणात्मनः ।
अव्यक्तत्वाच्च्युतो व्यक्तं प्राप्तो भावमखण्डितम् ॥ ९८ ॥
उत्पत्त्यभिमुखीभूतो वस्तूनां यः समाश्रयः ।
सोऽण्डं प्रगीयते लोके सूरिभिर्जातिरूपजः ॥ ९९ ॥
तदन्तर्जन्तुजातस्य कार्याणि करणानि च ।
गौणानि तानि प्रोच्यन्ते बुद्धिशेषं वद प्रिये ॥ १०० ॥
गन्धरूपरसस्पर्शशब्दश्च विषया मताः ।

एतेषामप्युपादानं पृथिव्यापोऽनलवायुखम् ॥ १०१ ॥

भूतान्येतानि येषां हि निर्विशेषाणि योनयः।

तन्मात्राणि तथैतानि गुणैकैकोत्तराणि च ॥ १०२ ॥

शब्दतन्मात्रतः शब्दगुणयुक्तं भवेत् ततः।

कारणैर्विविधैरस्य कार्यं दृष्टं यतः प्रिये ॥ १०३ ॥

स्पर्शतन्मात्रतः स्पर्शगुणयुक्तो मरुद्भवेत् ।

रूपतन्मात्रतो रूपं गुणयुक्तः स चोष्णगः ॥ १०४ ॥

रसलक्षणयुक्तोऽयं रसतन्मात्रतो भवेत्।

गन्धतन्मात्रतो गन्धगुणयुक्ता वसुन्धरा ॥ १०५ ॥

एकैकगुणोत्तरत्वं पुनरेषां प्रतिष्ठितम् ।

स्थूलसूक्ष्मसमावेशात् तत्त्वानि क्रमशः प्रिये ॥ १०६ ॥

सूक्ष्ममेकगुणं व्योम तस्मात् स्थूलोऽनिलः मतः।

सूक्ष्मेण व्योम्नादिपृष्ठो वासिष्ठो द्विगुणश्चलः ॥ १०७ ॥

शब्दं स्पर्शं च भजते सहजं गन्तृसंस्थया ।

सांयोगिकः शब्दः स्पर्शोऽस्य सहजो मतः ॥ १०८ ॥

सूक्ष्माभ्यां व्योमवायुभ्यामाविष्टः स्थलगः शिखी।

शब्दः स्पर्शश्च रूपोऽधस्त्रिगुणः स्मृतः ॥ १०९ ॥

चतुर्गुणा भवन्त्यापः सूक्ष्मव्योमानलानिले।

अविष्टे शब्दसंस्पर्शरूपास्वादगुणातिमिका गुणातिमिकाः ॥ ११० ॥

Sampath_eBooks

सूक्ष्मैरवादिभिर्युक्ता रवः पञ्चगुणो भवेत्।
शब्दं स्पर्शञ्च रूपञ्च रसो गन्धो गुणा मताः॥ १११॥
गन्धादीनामपूर्वञ्च स्थूलं सूक्ष्मं तथा परम्।
भूतपञ्चचतुस्त्रीणि द्विरेकगुणसंस्थितम्॥ ११२॥
उपादानानि वै तेषां भूतादेः सर्वभागतः।
वैकारिकात् तेजसानां योगाज्जानाति हेलया॥ ११३॥
पञ्चतन्मात्रसंज्ञानि तावन्मात्रस्वरूपतः ।
शब्दतन्मात्रकं स्पर्शं तन्मात्रं रूपसंज्ञकम्॥ ११४॥
तन्मात्रं रसतन्मात्रं गन्धतन्मात्र एव च।
एतद् दशविधं कार्यं शृणु देवोद्भवं त्वतः॥ ११५॥
वैकारिकादहङ्कारभागाद् भूतादिनेत्वरम् ।
तैजसेन युताक्षाणि आसां वैकारिकाणि तु॥ ११६॥
एकादशैव श्रोत्रं त्वक्चक्षुर्जिह्वा च नासिका।
बुद्धीन्द्रियाणि जल्पन्ति पंचैतानि मनीषिणः॥ ११७॥
वाक्पाणिपादपायुञ्च सोपस्थानगुदेव हि।
पञ्चकर्मेन्द्रियाण्याहुश्चित्तं चैवोभयात्मकम्॥ ११८॥
तन्मात्राणामिन्द्रियाणां योनिस्त्रेधाप्यहंकृतिः।
वैकारिका तैजसी च भूताद्याख्या तु तामसी॥ ११९॥
अतः परंत्वष्टरूपमहंतत्त्वमहं कृतः।

जनकं गुणकार्यञ्च त्रिदशाङ्कमिदं प्रिये ॥ १२० ॥

कारणं यद् विभागाय बुभुक्षुर्योजयेत् पशुः ।

मनीषाष्टविधं रूपं विविक्तमिव धारयेत् ॥ १२१ ॥

विद्यावैराग्यश्रेयांसि ऐश्वर्याणि पदूनि च ।

सात्विकानि तु रूपाणि प्राकृतानि भवन्ति हि ॥ १२२ ॥

वैकृतानि गतान्यत्र स्वचित्तकपिलादिषु ।

सनन्दनमनुक्रान्तं सनकं तेषु चेतसः ॥ १२३ ॥

ऊहादिसाधनोपायनिरपेक्ष्याणि यानि तु ।

प्राकृतानि तु तान्याहुः प्रकृत्त्यानुग्रहेण तु ॥ १२४ ॥

जातानि वैकृतान्यानि तानि चोक्तविपर्ययात् ।

अज्ञानाधर्ममैश्वर्य त्रिकमेतत् तु तामसम् ॥ १२५ ॥

प्राकृतं वैकृतं प्रोक्तं राजसं च विरागता ।

सापि वै प्राकृता प्रोक्ता वैकृता च मनीषिभिः ॥ १२६ ॥

सर्वाण्येतानि प्रोच्यन्ते वैकृतानि क्रमाच्छृणु ।

ज्ञानमष्टविधं ज्ञेयमूहादेस्साधनांशतः ॥ १२७ ॥

तत्तारञ्च सुतारञ्च तारयंतं प्रमोदकम् ।

प्रमुदितं मोदमानं रम्यं सदा प्रमोदितम् ॥ १२८ ॥

तारकमन्तःकरणे चक्षुः श्रवणे सुतारयन्तञ्च ।

तारयन्तमथाभ्यासादरतायाश्चोपलभ्यते ॥ १२९ ॥

द्विधोपलब्धिविज्ञानं प्रमुदितं मुदा च यत् ।
भूरिशास्त्रार्थजलधिरत्नवत्कृष्य पण्डितैः ॥ १३० ॥
प्रकाशितं विशेषस्थं सामान्यात् तत् प्रगीयते ।
स्वप्नो ध्यानं प्रबुद्धस्य सम्यक्पातं प्रतिष्ठितम् ॥ १३१ ॥
मोदमानं हि तज्ज्ञानं सविस्मृतिः सदैव हि ।
तस्यैवार्थप्रबोद्धृत्वं सम्यङ्मुक्तिविचारकम् ॥ १३२ ॥
रम्यकं तत् समाख्यातं ज्ञानानुभववेदिभिः ।
सांख्यं ज्ञानविदां स्वाप्नं विचारितमनिन्दितम् ॥ १३३ ॥
सोपदेशं प्रदत्तं यत् सदा प्रमुदितं हि धृक् ।
निमित्तमेतत्मुक्तिर्या त्रिविधा सा निमित्तिका ॥ १३४ ॥
ज्ञानोदयाद् रागशमात् सर्वेषां संशयाद् भवेत् ।
दृष्टे श्रुते च विषये वैराग्यं च वितृष्णता ॥ १३५ ॥
नैमित्तिकभेदे सदैतन्नवधा भवेत् ।
नवप्रकारता चैषां भवेद् विषयभेदतः ॥ १३६ ॥
अम्भावसलिला घोरा वृष्टिश्चाध्यात्मिकी मता ।
सुतारा च सुपारा च सुनेत्रा सु मरीचिका ः ॥ १३७ ॥
उत्तमाम्भसिका चेति पञ्चधा यास्तु तुष्टयः ।
अर्जने रक्षणे ख चक्षणे नाशे सङ्गे हिंसासु चैव हि ॥ १३८ ॥
पञ्चानां वैपरीत्येन ह्येतास्त्वाविर्भवन्ति हि ।

Sampath_eBooks

तत्सहकारि वैराग्यं निमित्तमभिजायते ॥ १३९ ॥

नैमित्तिकाः प्रकृतिषु लयश्च विकृतिस्तथा ।

आध्यात्मिकाष्टकानां तु चतुर्णां हि यथाक्रमम् ॥ १४० ॥

प्रधानशेमुषी कालभाग्याख्या मुनयो मतः ।

अष्टास्वपि प्रकृतिषु पञ्चानां बाह्यतुष्टितः ॥ १४१

अर्जनादिमहद्दोषदर्शनोचितयोनिषु ।

विकृतिष्वथ भूतेषु लयमिच्छन्ति सूरयः ॥ १४२ ॥

कपिलादीनां प्राकृतव्यक्ताव्यक्तविषयगम् ।

एकरूपं हि वैराग्यं संज्ञानं मोक्षहेतुकम् ॥ १४३ ॥

एवं धर्मोऽपि नियमैर्यमैश्च दश सादरैः ।

विज्ञेयश्चित्रदेहेषु देहिनां सुखदायकः ॥ १४४ ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्कता ।

यमाः पञ्च समाख्याता नियमांच्छृण्वतोर्ध्वतः ॥ १४५ ॥

अक्रोधो गुरुशुश्रूषा च शौचः सन्तोषमार्जवम्

निमित्तमेतदूर्ध्वं यद्गमनं तन्निमित्तिकम् ॥ १४६ ॥

ब्रह्मादीनामहिंसादिसाधनं दशधा च तत् ।

ऐश्वर्यमप्यष्टविधं ज्ञेयं तन्त्रार्थवेदिभिः ॥ १४७ ॥

अणुत्वं महिमानञ्च लघुत्वं त्रिविधं च यत् ।

पिण्डैश्वर्यं वदन्त्यार्या अर्थविदो जनाः ॥ १४८ ॥

Sampath_eBooks

प्राप्तिः प्राकाम्यमीशित्वं वशित्वं सर्वकामतः।

अवसायित्वमेवोक्तं पञ्चमं धृतकं नृणाम्॥ १४९॥

कारणैश्वर्यमाख्यातमस्याद्वापि निमित्ततः।

नैमित्तिकप्रतीघातो योगिनां भवति प्रिये॥ १५०॥

कपिलब्रह्मसनकमनुक्रान्तादिको गणः।

वैवर्त्तकाभिष्पन्दश्च ऐश्वर्यं प्राकृतं स्थितम्॥ १५१॥

अष्ठधा ज्ञानमप्युक्तं धाममूहादिसाधनम्।

अमूहादिसाधान्तमतारमसुतारकम्॥ १५२॥

अतारयन्ताप्रमोदं मुदं प्रमुदितसंज्ञकम्।

तथा प्रमोदमानञ्च अरम्यमसदामुदम्॥ १५३॥

एतन्निमित्तं त्रिविधो बन्धाश्चापि निमित्तकः।

प्राधानिको विकाराख्यो दक्षिणाख्यस्तृतीयकः॥ १५४॥

बिम्बभिष्वङ्गवैराग्यं वामं वैराग्यसाधनैः।

अषेष्टिकानां स्थितं तल्लोकादीनां महामते॥ १५५॥

अतुष्टिर्नवधा सावलोका वैदिकयोगिनाम्।

अनंभा सलिला मोघा तथा धृष्ट्या सुतारका ः॥। १५६॥

असुरासुरनेत्री चासुरा मारिचिका परा।

अनुत्तमाम्भसिका सा तु तुष्टिश्च नवमी मता॥ १५७॥

आसां रागनिमित्तों हि नवो नैमित्तिको मतः।

दशधा चाप्यधर्मोक्तिः श्रेयःसाधनसामगः ॥ १५८ ॥

हिंसासत्यं तथाष्टेयं कल्कता भ्रह्मचारिता ।

एते पञ्चायमा प्रोक्ताः क्रोधोऽगुरुसुश्रूषणम् ॥ १५९ ॥

अशौचं चाप्यसन्तोषो नार्जवमित्यनियमाः ।

एतन्निमित्तमुद्दिष्टं नैमित्तिकमधोगतिः ॥ १६० ॥

ऐश्वर्यविपरीतं यदनैश्वर्यं तदष्टधा ।

अणिमा महिमा चैव तृतीया लघिमा च या ॥ १६१ ॥

त्रिविधं कार्यमैश्वर्यं करणाख्यं च पञ्चधा ।

अशौचमपि माख्यातमसंतोषमनार्जवम् ॥ १६२ ॥

एवं सवैपरीत्येन क्रियाकारणयोगतः ।

प्रवक्तव्या यतोऽप्यत्र निमित्तादवसीयते ॥ १६३ ॥

ज्ञानस्याप्रतिमं रूपं प्रतिपत्ययमर्थकम् ।

प्राक्प्रणीतमतो वाच्यं प्रतिकूलानुलालनम् ॥ १६४ ॥

मत्तहेतोरतोऽनन्तराकृतत्वादधिष्ठितम् ।

प्रख्याव्याघातहेतुत्वात् प्रच्युतत्वात् स्वरूपतः ॥ १६५ ॥

न केवलं यावदन्यत्रेन्द्रियेऽप्यथ वस्तुनि ।

पटुत्वप्रतिघातं यत्तदतारमिति श्रुतिः ॥ १६६ ॥

असुतारमतो वच्मि शृणु पन्निलनन्दन ।

आवक्रत्रयमंन्तर्पद्दृक्रिया व्यक्तिहेतुगम् ॥ १६७ ॥

Sampath_eBooks

पुंसां प्रख्यानिमित्तादिध्यानविध्वंसनक्षमम्।
निर्विशेषतया पूर्वं सविशेषतया परम्॥ १६८॥
निर्विशेषविशेषाभ्यां रूपं यत् प्रागुदीरितम्।
नेह भूयः प्रकल्पेत प्रकृतं शृणु साम्प्रतम्॥ १६९॥
तस्मिंश्चक्रत्रये पूर्वमविशेषक्रियातिगम्।
विशेषपूर्वमपरं प्रख्यागुणविवेकतः ॥ १७०॥
स्थितं यदसुताराख्यम् आत्मनः प्रति बन्धनम्।
दिक्क्रियाप्रसरं मुख्ये तस्मात् तदिदमुच्यते॥ १७१॥
अतारयन्तमनु यत् प्रख्याप्रच्चादलक्षणम्।
व्यक्तिव्यङ्ग्य क्रमाक्रामी व्यञ्जकोत्साहको हि सः॥ १७२॥
तपोव्यक्तिगरीयस्त्वात् स्वयमुच्चलितोल्वणः।
प्रक्रियाप्रसरौदार्यविदारणपटुर्दहेत्॥ १७३॥
आम्नायप्रोक्तसंसृष्टानुमानाच्च सदा नृप।
व्यस्तततामेति मनसो मोहोद्यत् पातयत्यधः॥ १७४॥
अतारयंतमाख्यातमनीषावृत्तिलक्षणम्।
ऊहापोह स्वप्रतिभां भिनत्त्येव हि साम्प्रतम्॥ १७५॥
अप्रमोदात्मकं वच्मि ज्ञानं वाक्पतिसम्भवम् ।
चीत्कारकरसंश्लेषादाकारकनिगूहनात् ॥ १७६॥
आचक्रत्रयविश्लेषाद् वैपरीत्यं ततः शृणु।

अनित्यनित्यमानित्वाद् अशुभे शुभवेदना ॥ १७७ ॥

प्रख्याख्या मुदितामोदतिरस्काराविकारिणम् ।

वैकृते करणव्राते लयत्वाद् बाह्यवस्तुषु ॥ १७८ ॥

प्रविजृम्भित एवासौ निप्रच्छादविक्लवा ।

मलमायात्मकाद् धर्माद् यदैवोच्चरितासमम् ॥ १७९ ॥

शेमुषीक्लृप्तसंक्लृप्तैः सदाज्ञानमयीं दृशम् ।

तथा प्रमुदितन्नाम यत्प्रोक्तमनिवारितम् ॥ १८० ॥

ज्ञानैकदेशमसकृत्तदपीह विचार्यते ।

प्रकृत्यैव हि ये भावाः स्वप्नरूपा विवेकिनः ॥ १८१ ॥

स्थिताः प्रच्छादकत्वेन शृणु तानि समासतः ।

मित्रामित्रौ लाभालाभौ प्रियद्वेष्यावरिन्दम ॥ १८२ ॥

दासा धन सुता दाराः परं व्यामोहकारिणः ।

शीतातपा दंशकीटविषशस्त्र प्रकारजाः ॥ १८३ ॥

वातपित्तकफोद्भूतदस्युराजभयादिकाः ।

इष्टानां च वियोगाश्च देहयात्रादिचिन्तनम् ॥ १८४ ॥

एवमन्येऽपि ये नोक्ताः प्रियाप्रियविभेदतः ।

प्रियाणां विप्रयोगं यदप्रियैः सह सङ्गमम् ॥ १८५ ॥

प्रियप्रसाधनायैव चिन्तनं वा सुंदुःसहम् ।

वित्तान्वेषणमेवान्यदरिनिग्रहचिन्तनम् ॥ १८६ ॥

दैवोपघातजातानां प्रतीकारप्रवेदना

भूतोत्थानामपि तृप्तप्रविचाराविचारिता ॥ १८७ ॥

तथाध्यात्मिकजातानां रुजानां भेषजादिकाम् ।

तत्त्सङ्ग्रहविचारेण पुत्रदुःखसुखादिकैः ॥ १८८ ॥

सुशीलत्वमशीलत्वं चिन्तया दारचिन्तनम् ।

दासानां परतन्त्रत्वाद् वधबन्धादिचिन्तनम् ॥ १८९ ॥

लाभप्राप्त्या पुनः प्राप्तिरधिकारे कथं मम ।

अलाभाद् भौतिकं दुःखं पर्यायैर्बहुभिर्वद ॥ १९० ॥

शुद्धवीर्याधिवासोऽपि विद्याभ्यासादिचिन्तनैः ।

शुष्कतर्कप्रनष्टत्वाच्चास्त्राणां वरचर्वणात् ॥ १९१ ॥

एवमत्रेदमत्रेदं नेदमत्रेदमत्र नो ।

एवमालोचनज्ञानादनुष्ठान भवात्मकम् ॥ १९२ ॥

दुःखमास्ते स्वरूपादेरनभिज्ञत्वहेतुकम् ।

प्रख्याप्रवृत्ति रुद्धत्वात् कृपादृक् पादकैव हि ॥ १९३ ॥

एतत् प्रमुदितोज्ञानः सदा सत्प्रकटीकृतम् ।

अमोदमानमनयं तच्छृणु त्वं विभागतः ॥ १९४ ॥

व्याहताः कर्मणः सम्यक् क्षोभा मायात्मकास्त्रयः ।

तदौकघनवृत्तित्वादाकारप्रतिपत्तितः ॥ १९५ ॥

व्यङ्ग्यव्यञ्जकयोर्भेदा व्यक्तव्यक्तात्मकादपि ।

व्यक्ततामेति पूर्वैर्यो भावैर्वृत्तिविडम्वितः ॥ १९६ ॥

कला करणकर्त्रादिप्रभेदैर्धातुरूपतः प्रमे- ।

अथ वेगेन चैत्यत्वव्यापारप्रविचारणात् ॥ १९७ ॥

अमोदमानमाख्यातमेतत्ते पन्निलात्मज ।

अतोऽहमधुमारूपास्येऽज्ञानौघमविवेकजम् ॥ १९८ ॥

मायोत्सर्गानुवेधेन व्यक्तस्यातस्तदेव हि ।

ज्ञानव्यवत्या ख -व्यक्तव्या प्रमन्तव्य- प्रसरोद्गतम् ॥ १९९ ॥

अभिस्वङ्गभिघातोस्थ प्रख्यात ं सहेतुतः ।

भाववृत्त्यनुरोधेन तद्विकारविचारणात् ॥ २०० ॥

प्रादुरासीद्दुरावापवेगः सर्वत्र संस्थितः ।

साध्यसाधनसुव्यक्त्या भाववृत्तिगतौ हि तौ ॥ २०१ ॥

यावन्मतान्तरेषु वैरमभ्यन्तरस्थितम् ।

प्रमर्थवेत्तृतायेषां सङ्गतत्वात् परार्थतः ॥ २०२ ॥

प्रधानव्यतिरिक्तोवो व ख -र्वो व्यङ्ग्यव्यञ्जक हेतुतः ।

केवलत्वमतस्तेषां पुंमात्रार्थप्रसाधनात् ॥ २०३ ॥

पुमर्थं नैव जानन्ति ख जा न्ति पाशत्रयसमन्वितम् ।

मलकर्म महामायायोगि तत्प्रलयाकलम् ॥ २०४ ॥

मायेयगहनाख्येन कलाकार्येण साम्प्रतम् ।

गुणकाम्यस्वरूपेण प्रधानेन मलीयसा ॥ २०५ ॥

दृष्टदोषेण यदि ते विविक्ता पन्निलात्मज ।

पुमर्थमात्रसंसिद्धिस्तेषां सम्यग् व्यवस्थिता ॥ २०६ ॥

ज्ञानसन्तानमात्रं यज्जगदेतच्चराचरम् ।

शुद्धाशुद्धस्वरूपेण बाह्यविज्ञानभेदतः ॥ २०७ ॥

महालयविचारस्थाः शून्यभावैकतत्पराः ।

मन्यन्ते येन विज्ञाता क्षणिकज्ञानसन्ततिः ॥ २०८ ॥

विज्ञानाकाशवृत्तिस्थास्तेन मुक्ता इति स्थितम् ।

अतीतस्मरयैताः प्रकृतस्पर्शनादपि ॥ २०९ ॥

मलमयाविचारत्वात् कर्मणामप्यनिश्चयात् ।

आत्मज्ञानविमूढत्वाच्चिद्रूपस्यार्थवर्जनात् ॥ २१० ॥

तच्चक्तिव्यक्त्यविज्ञानादरम्यं तेषु तत् स्मृतम् ।

घोरवद्भयत्वात् तत्रत्यानवभासनात् ॥ २११ ॥

तत्रैवान्तमपश्यन्तो न मुक्तास्ते तदा नृप ।

कीरो मार्गे त्र देहस्थः पञ्जरान्तर्नियामितः ॥ २१२ ॥

महता सप्रयत्नेन पञ्जरान्ताद् विनिर्गतः ।

नासौ सार्गलवेश्माद् वा तद्वद् भुवि मनस्विता ॥ २१३ ॥

एवं त्वरम्यकं तेषां ज्ञानं शास्त्रेष्ववस्थितम् ।

ये तु कालान्तरवशाच्चुक्रादेः परिणामतः ॥ २१४ ॥

अङ्कुरादिसमुत्थानं ततः पश्यन् बुधादिकम् ।

Sampath_eBooks

रक्तस्नाय्वस्थिसंयोगो भूतसंघातहेतुतः ॥ २१५ ॥

परिणामवशादात्मा मदशक्तिवदास्थितः ।

तद्विलापान्न किञ्चिच्च तेन तत्वविदो जनात् ॥ २१६ ॥

महामोहसमाविष्टा ह्यविद्याकृष्टबुद्धयः ।

मायासूतिरविद्या सौ तमोह्विवशीकृताः ॥ २१७ ॥

अतस्तेषु मतज्ञानमनस्यमनुकीर्तनम् ।

तत्रापि शतशाखस्थमज्ञानं पन्निलात्मज ॥ २१८ ॥

ये तु ब्रह्मणि निष्ठत्वान् मन्यन्ते ब्रह्म चैककम् ।

परमात्मेति सर्वत्र व्यवहारविराजितम् ॥ २१९ ॥

तस्य द्वे प्रकृती ज्ञेया शुद्धाशुद्धे जगत्पते ।

एकस्यैवास्य सङ्कल्पविकल्पप्रभवं जगत् ॥ २२० ॥

यद्वदेकस्य तु ज्ञानं स्वदेहे सम्प्रजायते ।

अङ्गप्रत्यङ्गपीडादौ तद्वद् ब्रह्मणि संस्थितः ॥ २२१ ॥

एवं तन्मतविज्ञानमतोऽस्य समुदाहृतम् ।

आणवस्य मलस्यैतत् तद्व्यक्त्या सर्वजृम्भितम् ॥ २२२ ॥

प्रभवे च मतज्ञानदर्पचित्तविचेतसाम् ।

स्वस्वरूपविचाराणामज्ञत्वात् पशुदृष्टयः ॥ २२३ ॥

शिवाद्वयमजानन्तो ब्रूहि तज्ज्ञानसंश्रयात् ।

अरम्यकमतं तेषां ज्ञानमुक्तमतस्थितम् ॥ २२४ ॥

Sampath_eBooks

शब्दार्थशतसंदेहे वाग्वृत्त्यायत् तु भावितम् ।
ये स्थितास्तेन मुक्ता स्युररम्यं ज्ञानमेव तत् ॥ २२५ ॥
शरीरव्योममरुतां प्रभवः शब्द एव यः ।
अधिगम्य सवाग्वृत्त्या मध्यवैखरिसंज्ञया ॥ २२६ ॥
एवं सङ्कल्पमात्रेशः शब्दार्थावपि संस्थितौ ।
तन्मयं जगदेतच्च प्रत्यावृत्त्या विमुक्तवान् ॥ २२७ ॥
मन्यन्ते नविमुक्तास्ते परं पश्यंत्यलाभताम् ।
तदौत्सुक्यमजानन्तः सङ्केतत्वमर्थेषु यत् ॥ २२८ ॥
तत्स्पन्देनेन्दुनिष्यन्दनिसर्गज्ञानवर्जिताः ।
अमुक्ता एव ते तस्माच्चब्दज्ञानार्णवे स्थिताः ॥ २२९ ॥
अथोहारम्यकं व ख अतो- तेषां ज्ञानमाज्ञानसंभवम् ।
प्रमाणषट्कविच्चित्त्या प्रतिपन्ना निरीश्वरम् ॥ २३० ॥
व्यक्ताव्यक्तविरुद्धत्वाद् वेदकर्मफलोदयात् ।
क्रियातिशयवत्वाच्च अविशुद्धस्वरूपतः ॥ २३१ ॥
तवाप्यरम्यकं तस्माज्ज्ञानमज्ञानसम्भवम् ।
चित्तवृत्तिनिरोधेन यथायोगादिसम्भवम् ॥ २३२ ॥
तन्निरोधात् सुषुम्णातो व सुषुप्तातो जडः पाषाण वत् स्मृतः ।
प्रलयाकलसंज्ञोऽसौ न मुक्त इति निश्चयः ॥ २३३ ॥
तत्राप्यरम्यकं तद्धि ज्ञानं ज्ञेयं विजानतः ।

ततस्तन्मत्त विज्ञानं तदेव प्रविजृम्भते ॥ २३४ ॥

शक्तिवीर्यबलज्ञानतेजो यद् गुणसम्भवम् ।

विचार्यन्ते मतैर्मुग्धैः षाड्गुण्य महिमायुतैः ॥ २३५ ॥

पाञ्चरात्रोपनिषदैः प्रमाणार्थविचारणात् ।

युक्तिरेवावगम्येत न तत्तत्त्वविदोजनाः ॥ २३६ ॥

यस्मादात्मस्वरूपस्य शक्तिव्यक्त हितै स्फुटम् ।

विचार्य व्यक्तिमानीय तदैक्यान्मुक्तिशालिनः ॥ २३७ ॥

एवं ते पापवृत्तीश्च न ज्ञायन्ते स्फुटं स्थितम् ।

आणवं कार्मं व ख काम मायेयं भवेयं त्रिप्रकारजम् ॥ २३८ ॥

तत्राणवः परिज्ञातोन तैरधिगतं स्थितम् ।

तत्प्रक्रमात् सुबद्धास्ते न मुक्ता निश्चितं स्थिराः ॥ २३९ ॥

तस्मादरम्यकें तेषु ज्ञानमज्ञानजं स्मृतम् ।

एवं प्रतिमतं ज्ञेयमज्ञानं तदरम्यकम् ॥ २४० ॥

सदा यदप्रमोदाख्यमधुना शृणु साम्प्रतम् ।

प्रकृतेर्यद्विकारोत्थमसमं जनरूपिणम् ॥ २४१ ॥

विवेकपदमात्रज्ञैर्दुःखैकघनता हि या ः ।

नित्यमाहङ्कृतोत्थैस्तु विकारैर्विलुलीकृतम् ॥ २४२ ॥

यत् स्वयं ततमिच्चन्ति नित्यं चैवमुदोदितम् ।

एतच्चैव हि विच्चन्दप्रतिचन्दकमागतम् ॥ २४३ ॥

अतो निष्पन्दकं नाम प्रकृतेर्विपरीतजम्।
वैवर्त्तिकमतोद्दामशुद्धतालातभीषणम्॥ २४४॥
अतुष्टिरिति नाम्नैव नवधा यद्द विचारितम्।
तदविस्पन्दप्रच्छन्दैर्विवेकातीतगौरवात् ॥ २४५॥
प्रतिपत्या समुत्सृज्य प्रख्या प्रत्यव योगतः।
ज्ञेयं तन्नवधा भेदात् प्रत्येकमपि सर्वदा॥ २४६॥
ऐश्वर्यादिगमाभावादप्राप्त्यालोचितक्रियाः ।
अविद्यान्ता घनत्वेन वित्तशाख्यप्रयोजनात् ॥ २४७॥
अनैश्वर्य स्थितं वत्स स्वस्वरूपस्य लाघवात्।
प्रतिच्चन्दकसद्वृत्त्या बौद्धं गुणमतन्द्रितम्॥ २४८॥
एवमत्र प्रघाता ये सम्यक् ते प्रविचारिताः।
निग्रहाष्टकरूपस्य प्रमेये यत् प्रकीर्तितम्॥ २४९॥
वैवेत्त्येन समस्तं तत् सम्यगेव प्रकीर्तितम्।
गुरुशिष्यादिकगणैर्यास्ता भुवनपङ्क्तयः॥ २५०॥
प्रागुक्ताः कीर्त्यमानाश्च विद्याष्टकमिदं शृणु।
शक्तिः शान्तिकरी गौरी इडा मालाघमालिनी ॥ २५१॥
शान्तिः स्वाहा स्वधा ख्यातिरष्टाभिस्ते समावृताः।
कार्यकारणरूपस्य सुखदुःखात्मकस्य हि॥ २५२॥
देहभावात्मकस्यास्य उपरिष्टात् प्रकीर्तिताः।

विकाराः षोडशैवात्र परत्वेन व्यवस्थिताः ॥ २५३ ॥

कीर्त्तिताः कीर्त्यमानाश्च प्रविभागविचारतः ।

तन्मात्रापञ्चकं तत्र बोद्धव्यं निर्विशेषकम् ॥ २५४ ॥

अक्षाणां पञ्चकं यच्च ज्ञानव्यक्त्यर्थमुच्यते ।

चिदात्मापि च तद् ज्ञेयः दृग्युक्त्या चापि कल्पनात् ॥ २५५ ॥

प्रतिच्छन्दकरूपेण तदप्येष्वविचारतः ।

न तत्क्रियाव्यक्तिहेतौ पुंसां प्रत्यवमर्शनात् ॥ २५६ ॥

कर्मेन्द्रियनिवासोसौ तदप्यत्र विचारितम् ।

विषणागुणसंदर्भो यदप्यत्र विचारितः ॥ २५७ ॥

तदभिष्यन्दिविस्तारिप्रकीर्णं बहुधा स्थितम् ।

त्रिरुपमपि तत्रस्थमतिसर्गविचारणात् ॥ २५८ ॥

वैपरीत्येन तत्रापि पदार्थप्रविचारणम् ।

तत्प्रवृत्तिरहङ्कारस्तस्य यद्वस्तु तच्छृणु ॥ २५९ ॥

प्रतिच्छन्दकवैवित्त्या प्रख्याव्यापारभेदतः ।

वैकारिकस्तैजसश्च भूतादिश्च तृतीयकः ॥ २६० ॥

गुणत्रयानुरोधेन त्रिप्रकारस्स एव हि ।

कारणात्माथ कार्यश्च विषयाणां प्रकीर्तितम् ॥ २६१ ॥

षोडशात्मविकारेण त्वमागात् पुनः पुनः ।

आवृत्तिगुणताज्ञानं तामिस्रं चान्धपूर्वकम् ॥ २६२ ॥

तमोरूपं त्वतो ज्ञेयं महिमा तस्य लक्षणम् ।
पतिस्तदचलत्वादि रजसो लक्षणं स्मृतम् ॥ २६३ ॥
द्वयोरप्यनयोर्वेधाच्चूणुमिश्रकरूपताम् ।
कामः क्रोधो लोभमोहौ दर्पः पिशुनता तथा ॥ २६४ ॥
जन्ममृत्यु जराव्याधिरागात् क्षुत्तृण्मृषा मता ।
अज्ञानञ्च मदो हर्षो रागः शोकस्तथा परः ॥ २६५ ॥
द्रौह्यं चैवानृशस्यं च वैचित्यमनृतं तथा ।
अलीककुपितत्वं यन्मायामात्सर्यमेव हि ॥ २६६ ॥
अधर्मश्चास्वतंत्रत्वं मिश्रमागन्तुकं स्मृतम् ।
गणपाशा ह्यतस्तत्र साम्येन्द्रियवशाः स्थिताः ॥ २६७ ॥
उमानन्दिमहाकालगणेशवृषभृङ्गिनः ।
चण्डीश्वरः कार्त्तिकेयो गणेशाः परिकीर्तिताः ॥ २६८ ॥
तेषां भुवनविन्यासः प्रागुक्तोऽपि प्रकीर्तितः ।
अतोऽन्तरालेज्ञातव्यमेषां यद्भुवनादिकम् ॥ २६९ ॥
सूक्ष्मो ह्यनन्तस्त्रितनुः श्रीकण्ठश्चैकनेत्रकः ।
शिवोत्तमः शिखण्डी च एकरुद्रोऽपि दान्तकः ॥ २७० ॥
विद्येश्वरकृताः पाशा बोद्धव्याश्च समासतः ।
अभिशान्तिविकाराणां प्राक्केवलनियोगतः ॥ २७१ ॥
गुणानुवेधान् महतः प्रतिज्ञेया विकारजाः ।

अभिष्यन्दिस्वरूपेण मुख्या नियमहेतुतः ॥ २७२

पृथक् पृथक् च बोद्धव्यमन्योन्याभिभवादथ ।

सात्विकं चात्र तद्वस्तु लघुकृच्च प्रकाशकृत् ॥ २७३ ॥

पटूक्षत्करणव्राते यदा चाद्वन्द्वतां गताः ।

धर्मादित्रितयं पूर्वं यदत्र प्रविचारितम् ॥ २७४ ॥

तदेव प्रभवत्यत्र विविक्ते च गुहागते ।

यदा द्वन्द्वसमायोगस्तस्य ध्वान्तेन भूयसा ॥ २७५ ॥

तदा सत्त्वानुवेधेन यमीयं लक्षणं पुरा ।

तदेव व्यक्तिमायाति विचारगुणभेदतः ॥ २७६ ॥

यदानुवेधो रजसा भूयात् सात्विकतो ह्यसौ ।

तदादि गहनं किञ्चिज्ज्ञानमस्य प्रकाशते ॥ २७७ ॥

कोषषट्कं नाडिचारं हृत्य प्रप्रविचारणम् ।

मानमुन्मानचारं यत् सर्व मत्रविचारणम् ॥ २७८ ॥

वायुर्देहगतस्योस्य यावती गतिरेव हि ।

सर्वावयवभेदेन प्रतिपत्त्या स योगतः ॥ २७९ ॥

अत्र प्रागुक्तनियमात् प्रमाणार्थविचारतः ।

प्रवृत्तिः क्रिया प्रयत्नश्च तत्त्वविद्भिर्विभाविताः ॥ २८० ॥

प्राणापानसमानानामुदानव्यानसंज्ञिनाम् ।

पञ्चानां कोशमरुतां भेदानां पञ्चधा स्थितिः ॥ २८१ ॥

Sampath_eBooks

प्रेरकत्वेन वपुषः स्थित्यर्थं पञ्चधा प्रिये।

वायुनामाप्त लाभेन निमित्तं भवते ह्यतः॥ २८२॥

निमित्त पञ्चकं प्रोक्तं कर्मात्मा विदुषोऽणुभिः।

अतः परं तु प्रत्यक्षमनुमानाप्तलक्षणम्॥ २८३॥

प्रमाणं त्रिविधं दृष्टं प्रमेयस्य हि साधनम्।

तदध्यात्मं न भूतानाम् आदिदेवेन कल्पितम्॥ २८४॥

स्वयमाध्यात्मिकं ज्ञेयं करणं त्रिदशात्मकम्।

बोद्धव्याचैव विषयाश्चैविभूतं प्रगीयते॥ २८५॥

ब्रह्मेन्द्रशशिवह्नीन्द्रा विष्णुमित्रः प्रजापतिः

दिशोऽनिलसवित्र्यापो भूमिश्चैवाधिदैवतम्॥ २८६॥

आध्यात्मिकं तु प्रत्यक्षं अधिभूतानुमानगम्।

अधिदैवमाप्तवर्गं स्वप्रमेयप्रसाधकम्॥ २८७॥

व्यापीदं कार्यकरणं स्थावराद्यासु योनिषु।

निरपातश्चाभ्रविश्वे पुरुषं पुरुषं प्रति॥ २८८॥

पृथक् पृथक् स्वरूपेण साधारणतया स्थितम्।

द्रष्टव्यं तूर्यसर्गस्य निश्चितार्थप्रवेत्तृभिः॥ २८९॥

अतः परमनीषाया बीजं करणगानि तु।

त्रीणि सन्ति गुणान्यत्र रजःसत्वतमांस्यथ॥ २९०॥

प्रख्याव्यापारनियमप्रवृत्तीनां फलानि तु।

चतुर्दशविधं सत्त्वं स्वर्भुजामेकधा तमः ॥ २९१ ॥

रजोऽर्कसप्तसंख्यातं पुंसां प्रख्याख्यमष्टधा ।

दलितं षोढसंख्यातं रजः पुरुतमानुगम् ॥ २९२ ॥

सत्वमेकांशकस्थायि रजस्तिर्यक्तु सप्तधा ।

तमोमरुत्मनामंशस्थायि दृष्टं तु सूरिभिः ॥ २९३ ॥

एवमन्योन्यद्वन्द्वस्थैर्गुणैः सर्वत्र पाणयः ।

विचित्रवपुषः सन्ति चासिताः स्वेन कर्मणाः ॥ २९४ ॥

भुवनाञ्चरमेतेषु शृणु पन्निलनन्दन ।

क्रोधाष्टकं स्थितं तस्मिंस्तेजसा रजसीकृतम् ॥ २९५ ॥

योगिनामष्टकं सत्वे योगभूतिवरावहम् ।

संवर्त्तकैकवीरौ च ह्यनन्ता ज्ञानराशयः ॥ २९६ ॥

मृत्युहन्ता च रक्ताक्षो महाक्रोधश्च दुर्जयः ।

क्रोधाष्टकमिदं ज्ञेयं क्रोधोत्कटमरिन्दम ॥ २९७ ॥

तेजोष्टकमतोध्र्वे तु शृङ्गाटकगृहस्थितम् ।

बलाध्यक्षो महाध्यक्षस्त्रिदशस्त्रिपुरान्तकः ॥ २९८ ॥

सर्वरूपस्तथा शान्तो निमेषोन्मेष एव च ।

ऊर्ध्वतो योगिनः सन्ति सत्त्वा हृदि निवासिनः ॥ २९९ ॥

अकृतः कृतो वैभवस्तु सूरज्येष्ठः स्वभूर्गुरुः ।

गौतमो निधनेशश्च ह्यष्टावेते प्रकीर्तिता ॥ ३०० ॥

Sampath_eBooks

स्ववेश्म कार्यकरणभोगास्वादनतत्पराः ।

गुणैश्च प्राक्समुत्पन्ना गुणयोनेरतः प्रिये ॥ ३०१ ॥

अतः परं प्रधानस्य प्रागुत्पन्नास्त्रिरूपिणः ।

ऊर्ध्वभागभवाः सन्धि प्रधानार्धनिवासिनः ॥ ३०२ ॥

मायीयः कार्यकरणैः पितृभागावगाहनैः ।

संयुक्ताः संप्रबुद्धाश्च नित्यं त्रैवर्तविद्यया ॥ ३०३ ॥

स्थानाधिपान्तिके ह्येते स्थानिनस्ते प्रकीर्तिताः ।

सुशिवाश्चापि गीयन्ते चतुर्दशभवा नवाः ॥ ३०४ ॥

अपरिभूतनिगूढास्ततो गूढनिगूढकाः ।

एकशिवो वामदेवः भीमोग्रभवसर्वगाः ॥ ३०५ ॥

विद्याधिकस्त्वेकवीरः प्रचण्डेशो ह्युमापतिः ।

अजेशानन्तश्रीकण्ठस्थाणवो भूतसर्वगाः ॥ ३०६ ॥

मीमांसकाहृता ह्येते वीरा वेदविदां वराः ।

सामीप्यैः सह सायुज्यैः सालोक्यैः स्थायिभि प्रिये ॥ ३०७ ॥

मुण्डोद्भवैर्महाघोरैरित्येके विविधास्त्वमी ।

एतच्चैकशिवाद्यन्तु स्तोकमुद्दिष्टलक्षणम् ॥ ३०८ ॥

लोकवैदिकसंन्यासयोगिभिर्ज्ञानदृष्टिभिः ।

अतो भगवतीं सम्यगुमां विश्वोद्भवां विदुः ॥ ३०९ ॥

स्वयं व्यक्ता जगन्माता उपेया जगतां गतिः ख पतिः ।

प्रोद्यद्बालार्कसद्भासा प्रतप्तकिरणच्छविः ॥ ३१० ॥

मृगेशाष्टकसच्चित्रमणिमत्पीठसंस्थिताः ।

नानापुष्पस्त्रगुद्दामसत्कान्ति ः प्रविराजते ॥ ३११ ॥

शतयोजनविस्तारे स्वासने प्रविजृम्भते ।

तप्तचामीकराकारशरीरां सिंहसंस्थिताम् ॥ ३१२ ॥

महामणिकृतापीडशेखरोद्भासितध्वजाम् ।

दिव्यकुण्डलिनीं दिव्यमणिभूषितविग्रहाम् ॥ ३१३ ॥

विचित्राहाररशनां कूजन्नूपुरमण्डिताम् ।

जया च विजया नन्दा सुनन्दा चपरा ततः ॥ ३१४ ॥

बहुभूतिभरोद्दामविभवा मोदितोल्वणाः - ।

विचित्रांबरधारिण्यश्चित्रस्त्रग्दामभूषिताः ॥ ३१५ ॥

कूर्मिकाङ्गदकेयूरहारोद्भासितवक्षसः ।

प्रतीहार्यो विराजन्ते ज्वलन्त्यः स्वेन तेजसा ॥ ३१६ ॥

प्रत्येकं संस्थिता ह्येतास्तृप्तं प्रोद्दामराजिताः ।

अतोऽनुमानगा सा देव्यः पर्युपास्यन्ति ताः पुमान् ॥ ३१७ ॥

त्रिंशत्कोटिसहस्राणि त्रिंशत्कोटिशतानि च ।

मानमेतत् समुद्दिष्टं देवतास्वतिविस्तृतम् ॥ ३१८ ॥

महाविभवविस्तारमहाभोगभरावहाः ।

कोटयो वहुसंख्याता विमानानां सहस्त्रशः ॥ ३१९ ॥

तेषां रुद्राः समाख्याता ह्यौमान्ये चामराः ख वामनाः परे ।

विचित्रभोगबहुलाः सर्वैश्वर्यसमन्विताः ॥ ३२० ॥

त्रिनेत्राः शूलचक्रासिधारिणो वृषभध्वजाः ।

विचित्रशक्तयः सर्वे विचित्राश्चर्यकारकाः ॥ ३२१ ॥

स्वसुतास्वेव नियतं पर्युपास्यति ताः पुमान् ।

विश्वलक्ष्मी विश्ववपुर्विश्वकृद् विश्वमालिनी ॥ ३२२ ॥

यथा सा जगतां सम्यगनुग्रहवशेन हि ।

अभेत्पण्डं तथा सर्वमाकर्णय जयद्रथ ॥ ३२३ ॥

मया सहागता पूर्वं कान्ता सर्वेश्वरी शिवा ।

कल्पे पूर्वं न सत्ता स्याज्जगन्मातेति कीर्तिता ॥ ३२४ ॥

तस्मिन् विभवसङ्घाते व –तै पूर्य सर्वजनावलिम् ।

ब्रह्माण्डोदरमध्यस्थां पुनः स्वपुरमध्यगाम् ॥ ३२५ ॥

कल्पे द्वितीयेऽप्यनु च मया साकं समासवम् ।

सावतीर्णा ब्रह्मणोऽण्डं जगद्योनिरिति स्मृता ॥ ३२६ ॥

पुनः प्रयाता तत्स्थानं कृत्वा विश्वस्थितिं ह्यतः ।

पुनस्तृतीयके कल्पे मया सार्धं यशस्विनी ॥ ३२७ ॥

जगत्स्थितिनिमित्तार्थमागता ब्रह्मणोऽण्डकम् ।

शाम्भवीति च नाम्नैषा विख्याता परमाव्यया ॥ ३२८ ॥

जगद्व्यवस्थामास्थाप्य पुनरेव निकेतनम् ।

स्वमगाद् देवदेवेशी पुनरेव महामते ॥ ३२९ ॥

चतुर्थेऽथ महाकल्पे प्राप्ता सा ब्रह्मणोऽण्डकम् ।

भुवनस्थितिसंरक्षाकरणाय गणाम्बिका ॥ ३३० ॥

नाम्ना सा विश्वरूपेति विश्वमालयते सदा ।

पुनः प्रस्थानमात्मीयमालयं पन्निलात्मज ॥ ३३१ ॥

पञ्चमे तु महाकल्पे पुनर्ब्रह्माण्डमण्डपम् ।

स्थित्यर्थमवतीर्णा सा भुवनेशी मया सह ॥ ३३२ ॥

नन्दयन्ती च जगतां नन्दनी नाम तेन सा ।

जगदानन्दयित्वा सा पुनरेत्य स्वकं पदम् ॥ ३३३ ॥

षष्ठेऽथ कल्पे भूयश्चास्मत्सार्धं नृपनन्दन ।

आजगाम च ब्रह्माण्डं स्थित्यर्थं पुनरेव सा ॥ ३३४ ॥

गणाम्बिका विधानेन विख्याता सा तदानघ ।

तामसी च तदा तेन नाम्ना ज्ञेया सदैव हि ॥ ३३५ ॥

विधायैव भयाद् भूयः स्वं पदं नृपसत्तम ।

सार्द्धं मया सप्तमे सा कल्पे वैरिञ्चिमण्डकम् ॥ ३३६ ॥

अभ्याजगाम सुभगा लोकस्थितिविधायिनी ।

विभूतेरभिधानेन श्रुता साक्षाद् विभूतिदा ॥ ३३७ ॥

तया योज्यं जगत्सर्वागमात् सा अनिकेतनम् ।

अथागता चाष्टमेऽसौ सार्द्धं कल्पे मयानघ ॥ ३३८ ॥

Sampath_eBooks

सर्गसंस्थितिरक्षायै भूतिनाम्नी महेश्वरी ।
समुद्धृत्य जगत्सर्वमगाल्लोकं स्वकं पुनः ॥ ३३९ ॥
पुनः स्थापयितुं सर्वजगतां संस्थितिं स्थिता ।
आनीता वै ब्रह्मणोऽण्डमानन्दी नवमे सुतः ॥ ३४० ॥
कल्पे सर्वजगद्योनिमया सार्धमरिन्दम ।
स्थापयित्वा जगद्रक्षां वितत्य सुबहुं ततः ॥ ३४१ ॥
प्रत्यागमत् स्वं भुवनं पुनरेवागता ह्यसौ ।
दर्शमेथ ख दशमेथ मया सार्द्धं ब्रह्माण्डोदरमञ्जसा ॥ ३४२ ॥
कल्पे सा स्थितिरक्षार्थं नाम्नासौ वामलोचना ।
विजृम्भा ख विजृम्भ्य सुचिरं कालं पुनः प्राप्ता स्वमन्दिरम् ॥ ३४३ ॥
अथैका दशमे कल्पे ब्रह्मणोऽण्डं मया सह ।
जगद्रक्षार्थमभ्यागाद् वरारोहेति नामतः ॥ ३४४ ॥
स्वकार्यमाचरित्वैवं गता स्वं विष्टपं पुनः ।
कल्पे द्वादशमे भूयो रमता रमया सह ॥ ३४५ ॥
जगतामनुकम्पार्थं नाम्ना ज्ञेया सुमङ्गला ।
जगदानन्दयित्वा सा पुनः प्राप्ता स्वविष्टपम् ॥ ३४६ ॥
त्रयोदशेऽथ सा कल्पे पुनरेव मया सह ।
आजगाम ब्रह्मणोऽण्डमनुकम्पाकरी शिवा ॥ ३४७ ॥
महातनुरितिख्याता जगदाप्यायनोद्यता ।

कृत्वा स्वकार्यमतुलं स्वविष्टपमगात् पुनः ॥ ३४८ ॥

कल्पे चतुर्दशे देवी ब्रह्माण्डं च मया सह ।

पुनरेव गतानन्ता नामतः सा प्रकीर्तिता ॥ ३४९ ॥

स्वाधिकारमसौ कृत्वा पुनः स्वर्लोकमागमम् ।

अथ पञ्चदशे कल्पे पुनरेव मया सह ॥ ३५० ॥

ब्रह्माण्डमागता देवी दृष्टादृष्टफलप्रदा ।

मातेव सर्वभूतानां भूतमाता ततः स्मृता ॥ ३५१ ॥

सा स्वाधिकारं निर्वर्त्य स्वावकाशमगात् पुनः ।

कल्पेऽथ षोडशे भूयो मया सार्द्धं विरिञ्चज ॥ ३५२ ॥

अण्डमभ्यागमद् देवी हितार्थं जगतां नृप ।

उत्तमेनाभिधानेन ज्ञेया सावुत्तमेति च ॥ ३५३ ॥

निवर्तयित्वा स्वंकार्यमगाद् भूयो निवेशनम् ।

कल्पे सप्तदशे भूयो ब्रह्माण्डं सा मया सह ॥ ३५४ ॥

प्राप्ता सहस्रधारेति नाम यस्याः प्रकीर्तितम् ।

जगदानन्दयित्वा सा पुनः प्राप्ता स्वविष्टपम् ॥ ३५५ ॥

कल्पेऽष्टादशमे वत्स ब्रह्मणोऽण्डं पुनर्मया ।

सहागता सुरेशानी सती नाम्नेति या स्मृता ॥ ३५६ ॥

चाक्षुषस्यान्तरे वत्स दक्षः प्राचेतसो ह्यभूत् ।

तस्यापमानतो देहमजहात् परमेश्वरी ॥ ३५७ ॥

सुधासूतिः कलाद्या या तामाश्रित्याश्रितासु च ।

ततः पूर्वतराद्दुचैरासाद्य पितरं पुनः ॥ ३५८ ॥

मां भर्तारं तपोयोगादवाप्य गिरिजाभवन् ।

दक्षस्य मखविध्वंमोदकानंशा ह्युमा स्मृता ॥ ३५९ ॥

भद्रकालीति चान्यासौ नाम प्राप्ता तनुद्वया ।

अस्मिंश्चतुर्युगे कृष्णसहिता कृष्णपिङ्गला ॥ ३६० ॥

अवधीर्महिषं तेन दुर्गासौ विन्ध्यवासिनी ।

भक्तानामनुकम्पार्थमवतीर्य सुमध्यमा ॥ ३६१ ॥

या त्वामाराध्य तपसा मामद्राक्षीर्जयद्रथ ः ।

रहस्यभाक्तं संजातोऽस्यतिक्रूराशयोऽभवम् ॥ ३६२ ॥

एवमस्याः समाख्यातं भुवनं पन्निलात्मज ।

अथोपरिष्टाद् भुवनमुमाकान्तस्य शोभनम् ॥ ३६३ ॥

सहस्रार्ककरव्रातभासुरं सर्वसुन्दरम् ।

सर्वेषामपि तादृक्षमस्तीह भुवनं न हि ॥ ३६४ ॥

सर्वस्माद् भुवनत्राता चारुत्वं विद्यतेऽस्य हि ।

सुचारु नित्यमेतस्मात् सहस्रादित्यसन्निभम् ॥ ३६५ ॥

हिमवत्पर्वताकारं शुद्धस्फटिकनिर्मलम् ।

सर्वशोभासमायुक्तमत्याश्चर्यशताकुलम् ॥ ३६६ ॥

महाविमानसङ्घातं कोटचर्बुदसमन्वितम् ।

चक्रवर्त्तिसुरेन्द्रौघविमानशतसङ्कुलम् ॥ ३६७ ॥

प्रधाने भुवने तस्मिन् सूर्यार्बुदसमप्रभे ।

शिरःसहस्रदोर्दण्डसहस्रचरणेक्षणम् ॥ ३६८ ॥

सर्वानुग्रहकृच्चा सावुमाकान्तः परापरः ।

तस्योद्यानमतो वामे बहुभोगभरावहम् ॥ ३६९ ॥

शतयोजनसाहस्रमनेकमणिराजितम् ।

बहुपर्यङ्कसोद्दाममास्कन्धशतसङ्कुलम् ॥ ३७० ॥

सहस्रसूर्यप्रतिममनेकगुणमण्डितम् ।

गोपत्यष्टकसंरुद्धमासनं मणिचित्रितम् ॥ ३७१ ॥

रत्नपद्माकरापीडमनेकाद्भुतसङ्कुलम् ।

तत्रोपरिमहान्तस्वतेजोराजितविग्रहम् ॥ ३७२ ॥

केयूराङ्गदसन्मौलिमहाहारविभूषितम् ।

हेमचित्राम्बरं हेममालालङ्कृतिवर्णकम् ॥ ३७३ ॥

विराजते कुण्डलाभ्यां रम्याभ्याः रत्नराजिभिः ।

ते सूर्यपरिवेशाभे सप्तकाञ्चनचित्रिते ॥ ३७४ ॥

पर्वतोत्तुङ्गसंकाशैः पाशरत्नैर्विराजितम् ।

मौलिर्मणिशतच्छायाविडम्बितबिडौजसा ॥ ३७५ ॥

प्रलम्बमुक्तास्रग्दामविराजितसुवक्षसम् ।

स्वर्धुनीवाहमतुलमिव वर्षा विराजते ॥ ३७६ ॥

Sampath_eBooks

शेखरेन्द्रप्रभापीडप्रकाशितदिगन्तरम्।

स्वर्धुनीधूर्जटोत्तुङ्गकपालशतमालितम् ॥ ३७७ ॥

प्रमथैरावृतं घोरैः सर्वैश्वर्यप्रवर्तकैः।

शूलिभिर्जटिभिस्त्र्यक्षैः सर्वाभरणभूषितैः॥ ३७८ ॥

गुदोदरैः कुक्षिमुखैः पञ्चचूडैर्महोदरैः।

वल्लीग्रीवैः स्कन्दमुखैर्गृध्रवक्त्रैर्भयानकैः॥ ३७९ ॥

चिपिटैश्चिपिटास्यैश्च वामजैर्जटिलैर्वृताम्।

तालुजङ्घैर्ज्वलज्जिह्वैः कुक्षिवक्त्रैः स्तननानैः॥ ३८० ॥

पृष्ठलिङ्गैर्गूढलिङ्गैर्घण्टाकर्णैः सवाटुकैः।

दरीमुखैः कङ्कवक्त्रैःमत्तोन्मत्तप्रमत्तकैः॥ ३८१ ॥

उमाकान्तमवृतं तैस्त्रिंशत्कोटिसहस्रकैः ।

त्रिंशत्कोटिशतैश्चान्यैः समन्तात् परिवारितम्॥ ३८२ ॥

एवंविधैस्तथा रुद्रैर्नानाभूतगणैश्चितम्।

मदोन्मत्तमहानारीविमानशतमालितम्॥ ३८३ ॥

महाभोगभराक्षी च प्रमदाजनसेवितम्।

सर्वतः परिवार्योच्चैर्मातरस्तं व्यवस्थिताः॥ ३८४ ॥

प्रभापीडैर्यथा भानुः सर्वतः प्रविराजते।

वह्निकाष्ठागता ब्राह्मी पद्मपत्रप्रभेदगा ॥ ३८५॥

दिव्याभरणचित्राङ्गी श्रीरिवोत्तमरूपिणी।

ब्रह्ममाता जगद्योनिर्जगज्ज्येष्ठा सनातनी ॥ ३८६ ॥

शुभ्राभ्रभूरिहारेन्दुस्फुरत्स्फटिकसन्निभा ।

माहेश्वरी महारत्नप्रभोद्भासितदिङ्मुखा ॥ ३८७ ॥

माहेश्वरीदिशं श्रित्य संस्थिता मारतोत्तमा ।

उत्तरस्यां दिशि गता कौमारी शुभ्रभूषणा ॥ ३८८ ॥

सर्वासुरासुरव्रातपादपद्मविभूषिता ।

शक्त्युद्धतकराटोपसर्वाभरणभूषिता ॥ ३८९ ॥

पद्मगर्भप्रभाकारा हाराङ्गदविराजिता ।

दिश्याश्रिता दक्षिणस्यां नीलोत्पलदलप्रभा ॥ ३९० ॥

वैष्णवी विष्णुजननी हारकेयूरभूषणा ।

महाविभवसंयुक्ता परमेशमुपासते ॥ ३९१ ॥

क्रोडानना घोरदंष्ट्रा घोरनीरदनिःस्वना ।

स्त्रवद्गगनजीमूत यमुनातोयसन्निभा ॥ ३९२ ॥

केयूराङ्गदचित्राङ्गी लम्वहारविराजिता ।

वारुणीं दिशमाश्रित्य महेशं पर्युपासते ॥ ३९३ ॥

हंसकुन्दसुधाशङ्खचन्द्राम्बुदसमन्विता ।

काश्चीनूपुररत्नौघ चित्राम्बरविराजिता ॥ ३९४ ॥

शाक्री वज्रकरव्यग्रा गजस्कन्धनिवासिनी ।

पूर्वां दिशं समाश्रित्य सहस्त्रनयनोज्ज्वला ॥ ३९५ ॥

पर्युपासति विश्वेशं वहुभागभरालसा ।

नैर्ऋतीं दिशमाश्रित्य चामुण्डा मुण्डमालिनी ॥ ३९६ ॥

चर्ममुण्डकरव्यग्रा शवाभरण चित्रिता ।

करालवदना तीक्ष्णदंष्ट्रिणी घोरदर्शना ॥ ३९७ ॥

चण्डोग्रा चर्ममुण्डा सा देवमेवमुपासते ।

समीरकाष्ठामाश्रित्य योगेशीं पर्युपासते ॥ ३९८ ॥

सुशुष्की कोटराक्षी सा घोरनीरदनिःस्वना ।

महाकटकनद्धाङ्गी शवाभरणभूषिता ॥ ३९९ ॥

ऊर्ध्वकेशी सर्पनद्धा दंष्ट्राली प्रेत संस्थिता ।

एतास्ता देवदेवेश मातरो लोकविश्रुताः ॥ ४०० ॥

उमेशमखिलैर्भोगैः पर्युपास्यन्ति मातरम् ।

ब्रह्माद्यमरसन्दोहैः खेट्यमानेव भूरिशः ॥ ४०१ ॥

सहस्रांशेन तपसा भूर्लोकमवतारित ।

न कदाचित् स्वकात् स्थानाच्चलन्त्येताः सदैव हि ॥ ४०२ ॥

आगत्यासुरसङ्घातक्षयकार्ये महोद्धता ।

प्रपूजयेदिमा ब्रह्मा तथान्ये लोकरक्षिणः ॥ ४०३ ॥

परापरेण वपुषा त्रिस्कन्धं व्यापकं स्थिताः ।

एवमेषा भोगवती नाम रूपविपर्ययैः ॥ ४०४ ॥

न मे चाष्टविधा वत्स परिवार्य व्यवस्थिताः ।

न भिन्ना परमार्थेन क्रीडेयमिति संस्थिताः ॥ ४०५ ॥

स्थितस्त्वेवं जगन्नाथो भुवने सर्वदारुणः ।

एवं प्रद्योतनं सर्वं जगतां पतिरादरात् ॥ ४०६ ॥

आस्ते परमया लक्ष्म्या वृतः परपुरञ्जयः ।

अस्यैवाष्टौ समाख्याता स्तरवोपारिताः शृणु ॥ ४०७ ॥

येन विश्वमिदं व्याप्तमचरं चरमेव च ।

शृणुष्व नरशार्दूल विभागाद् गदतो मम ॥ ४०८ ॥

शर्वो भवश्च भगवान् रुद्रः पशुपतिस्तथा ।

ईशानो भीमसंज्ञश्च महादेवोग्र एव च ॥ ४०९ ॥

अष्टावेताः समाख्याता मूर्तयः परमेशितुः ।

एताभिरेव भगवान् भवः परमकारणः ॥ ४१० ॥

विदधाति जगत्सृष्टिमतुलां पन्निलात्मज ।

कौम्भेऽनलमरुद्व्योमसूर्यात्मोदधिधूर्मही ॥ ४११ ॥

सृष्टिरेषा जगत्यस्मिन्नंशांशाज्जगतां गताः ।

जगत्स्रष्टा वंशमात्रेणावतीर्णा जयद्रथ ॥ ४१२ ॥

एवमत्र ब्रह्मलोके मेरौ त्रितयमाश्रितः ।

आस्तेऽत्र भोगदो देव वरुमाकान्तः परादिना ॥ ४१३ ॥

योगाष्टकमग्रयं पन्निलनन्दन ।

श्रीकण्ठेत्यभिधानोऽयं स कैलासगिरावपि ॥ ४१४ ॥

स चाष्टतनुभिर्व्याप्य जगद्दुद्धरणे विभुः।
तमोरजःसत्त्वभेदैः सर्वज्ञानगुणैरपि ॥ ४१५ ॥
महेश्वरं योगिवरमुपासन्ते हि ये नराः।
श्रद्धाभक्तिपुरस्कारैर्नियमैश्च यमैरपि ॥ ४१६ ॥
दृष्टमण्डलिनो ये च देहे सर्वमयं शिवम्।
पश्यन्ति ते प्रयान्त्यत्र तत्कराघ्रातमूर्त्तयः ॥ ४१७ ॥
अशिवाद् द्वादशैवात्र उपरिष्टाद् व्यवस्थिताः।
सूर्यकोटिप्रभाः सर्वे कुङ्कुमाकारविग्रहाः ॥ ४१८ ॥
भौवनं भोगमेषां यत्तत् कथाकृतिमुत्तमम् ।
अत्रान्तराले विज्ञेयो मण्डलाधिपतिः प्रभुः ॥ ४१९ ॥
वीरभद्र इति ख्यातो महादेवाष्टकाद् युतः।
अङ्गुष्ठमात्रपूर्वास्ते मायाञ्जनविवर्जिताः ॥ ४२० ॥
शेमुषीभुवनाभोगमेतत् ते परिकीर्तितम्।
अतो गौणं समाख्यास्येऽध्यासरूपं जयद्रथ ॥ ४२१ ॥
गुणातुर भमात्रादि गुरुपङ्क्तित्रयं महत्।
ध्वान्तोपरिऽटात् प्रथमं नामान्येषां यथा शृणु ॥ ४२२ ॥
शिवश्चण्डः प्रभुर्वामो ब्रह्मादो भीम उत्तमः।
दिनकृत् पिङ्गलः कालो माहेन्द्रश्चन्द्रमोदकः ॥ ४२३ ॥
कटं कटः कटिवर अम्बुहार्ध नरेश्वरः।

ऋग्यजुःसामथर्वश्च शिवगण्डोदरश्च हा यमे ॥ ४२४ ॥

यमः माली गहनेशः पीडनश्चेति ते स्मृताः ।

एते द्वात्रिंशदाख्याता उपरिष्टात्ततः शृणु ॥ ४२५ ॥

शुक्लाः सुदामदामानो लोकदिक्सूत्र एव च ।

गृध्रो होता कपालश्च शिवेशो गौतमस्तथा ॥ ४२६ ॥

ऋषभो दधिदोर्योगी गुहेशो गाग्रतिः परः ।

जटी माली गृहेशानः शिखंड्युग्रो भृगुः शिखी ॥ ४२७ ॥

शूली सुमाली सुगतिर्हृष्टहासो पदारुकः ।

लाङ्गली चित्रदण्डी च लकुलेशश्च भावनः ॥ ४२८ ॥

एतत् पूर्वधरं प्रोक्तमानुपूर्व्या व्यवस्थितम् ।

प्रणेतारमदृष्टस्य वादस्योक्तं तु सुन्दरि ॥ ४२९ ॥

किं त्वस्य च विशेषोऽयं योनिजे साध्यसाधने ।

दृष्टादृष्टार्थवादस्य प्रणेतारोऽधुना प्रिये ॥ ४३० ॥

रुद्रो भूतिर्विगूढाख्यः कथ्यन्ते शिशुभिः सह ।

हरो झण्टीशनामा च दारुकोऽर्थान्तरेश्वरः ॥ ४३१ ॥

ईशानरुद्रसंज्ञन्यो एष्टानरुद्रसज्ञोन्यो कृष्णपिङ्गेश्वरः परः ।

वृषः शिखेन्द्रनियमाः साक्रूराबलशालिनः ॥ ४३२ ॥

त्रिवेगधार्युमाभर्तृभूतेश्वरकपर्दकाः ।

शङ्करः स्थाणुसंज्ञश्च ह्यर्धनारीश्वरः परः ॥ ४३३ ॥

श्वेतपिङ्गेश्वरो देवो महाकालैकवीरकौ ।

संवर्तरुद्रोमाकान्तौ मण्डलेशश्च वीर्यवान् ॥ ४३४ ॥

भारभूत्यन्तिका ह्येते पञ्चविंशतिसंख्यया ।

अमीषां वच्मि शिष्याणां नामानि शृणु सैन्धव ॥ ४३५ ॥

मस्करिः पूरणश्चैव कृष्णकौशलकावुभौ ।

सनत्कुमारः कपिलो गौतमः सवसिष्ठकः ॥ ४३६ ॥

अष्टांशको नाशकेतुः कश्यपो गालवस्तथा ।

भौतिकश्च सशाकल्यो वल्मीकिः क्रोधतापसः ॥ ४३७ ॥

गुरुः पराशर लवो पिप्पलादश्च योगभृत् ।

संवर्तश्चायुतश्चैव दम्भपुष्पश्च दम्भकः ॥ ४३८ ॥

प्रणेतारो ह्यदृष्टस्य वादस्यामी वुधा नवः व ख णवः ।

त्रयोविंशतिराख्याता शिष्यानेषां प्रिये शृणु ॥ ४३९ ॥

जघ्नुम् ख जह्नुः सुनीतस्तृणबिन्दुरिक्षुश्चैवाथ विश्रवाः ।

दीर्घहारो भगराख्यो विप्रो वसुतराधिपः ॥ ४४० ॥

अगस्त्युपाध्यायशुकौ भृगुवश्चैवाङ्गिरास्तथा ।

योगिराड् जमदग्निश्च ऊर्ध्वगः स्थूलमौलिकः ॥ ४४१ ॥

वालखिल्योमुनिश्चैव वज्रस्तेयस्तपोधनः ।

वाक्शुद्धः शिवस्सुचारुस्त्रयोविंशतिरप्यमी ॥ ४४२ ॥

शिवादिपीडनान्तास्ते रुद्रा द्वात्रिंशतिः प्रिये ।

गुरवः प्रथमोलिस्था शृणु क्षेत्रज्ञसंयुताः ॥ ४४३ ॥

शिवोऽनन्तः प्रचण्डश्च एकवीरो महेश्वरः ।

प्रदापनः प्रधानश्च भीमो भौतिक एव च ॥ ४४४ ॥

यज्ञः करालः कपिलो महेन्द्रो दिनकृत् परः ।

दक्षः प्रतोदनामा चरुरेव कटं कटः ॥ ४४५ ॥

अम्बुहर्ता च ऋग्वेदो नादोऽन्यः संज्ञसंज्ञकः ।

अथर्वाचार्यनामान्यो विरूपाक्षस्तथा परः ॥ ४४६ ॥

ज्येष्ठो नारायणो विप्रो गुढोदरगुहेश्वरौ ।

यमपालो गुण्डनश्च क्षेत्रज्ञान् वच्मि विस्तरात् ॥ ४४७ ॥

स्वचितोऽनङ्गसङ्गीत सङ्क्रंदनविलोमकौ ।

वैवर्त्तो दुन्दुभिदिशो हेलालीलाप्रकम्पनः ॥ ४४८ ॥

माधवो मन्मथो नीलः सावित्रो विभवो नलः ।

शिवादीनाममी शिष्या दश पञ्च प्रकीर्तिताः ॥ ४४९ ॥

कथिता भूतनिर्गुढा विश्वरूपा ः मया तव ।

अधुना गूढनिर्गूढां पङ्क्तिं युग्मवतां शृणु ॥ ४५० ॥

श्वेतादिवषट्कारान्तान् तां भवान् षट्षष्टिमानगान् ।

श्वेतश्चैव सुतारश्च सुवामो गौतमस्तथा ॥ ४५१ ॥

लोकाक्षश्च सुहोता च तथा वैशिरसः परः ।

एकपादो जिगीषुश्च वृषभो दशवाहनः ॥ ४५२ ॥

Sampath_eBooks

श्रीकर्णश्च गुहावासी शिखण्डी जटिमानुषः ।

भृगुश्चैव शिखी शूली वालिश्चैवाट्टहासकः ॥ ४५३ ॥

दारुको लाङ्गलिश्चैव त्रिदण्डिरषढिः परः ।

सोमेशो लकुलीशश्च ह्यष्टाविंशत्यमी शिवाः ॥ ४५४ ॥

व्याख्यानानुग्रहकराः प्रमाणज्ञानभेदतः ।

प्रासङ्गिकी त्वसौ तेषां सद्योनुग्रहकारिता ॥ ४५५ ॥

तृतीया गुरुपङ्क्तिर्या वरेशाद्यष्टत्रिंशिका ।

सद्योनुग्रहकर्तृत्वे तस्या देव्यधिकारिता ॥ ४५६ ॥

वरेश्वरश्च देवश्च भूतिर्दीर्घभुजो रविः ।

सद्योजातस्तथा स्थाणुर्झण्टीशः षण्मुखः परः ॥ ४५७ ॥

चतुराननः परः क्रूरो भुजङ्गोदम एव च ।

चक्रपाण्यर्द्धनारीशौ मेघसंवर्तकः प्रियः ॥ ४५८ ॥

भस्मीशः कामनाशश्च कपाली भूर्भुवस्तथा ।

विशालाम्बुधनीलोर्णवीरशान्तोग्रमाठना ः ॥ ४५९ ॥

केतुकान्तकुमारार्याः ककुभीशानलक्षणा ।

वौषट्कारो वषट्कारः कथितास्तु गुरूत्तमाः ॥ ४६० ॥

भैरवाप्तप्रवक्तारः स्वाधिष्ठानगतायुशः ।

चतुर्वक्त्राश्चतुर्दंष्ट्रा ये द्विपर्वप्रकाशिताः ॥ ४६१ ॥

रुद्रास्ते द्विभुजैकास्याः क्षेत्रज्ञाः शिष्यकोटिगाः ।

Sampath_eBooks

एवमेतत्समाख्याता अव्यक्तव्यक्तलक्षणम् ॥ ४६२ ॥

तत्त्वभावसभूताख्यं रुद्रसर्गसमन्वितम् ।

गुणादीनि तु तत्त्वानि विशेषान्तानि सुन्दरि ॥ ४६३ ॥

सिद्धयादयः स्मृता भावा महत्तत्वसमाश्रिताः ।

प्रत्यायकाश्च ये तत्र ते सवर्णाः प्रकीर्तिताः ॥ ४६४ ॥

ज्ञानाज्ञानविभेदे तु क्रमशः संस्थिताः सुराः ।

विपर्ययस्वरूपस्तु बिन्दूनां पञ्चचङ्क्रमात् ॥ ४६५ ॥

वैराग्यञ्च अवैराग्यं कादितादिषु संस्थिताम् ।

शेषेषु शक्तिसंस्था वै विज्ञेयानुक्रमेण तु ॥ ४६६ ॥

भूतान्येकशिवादीनि रुद्रा गूढा निगूढका ।

तथा भूरिनिगूढा च ह्येतत् सर्गचतुष्टयम् ॥ ४६७ ॥

सन्ति मण्डलिनो मूर्ध्निर्न प्रधानस्य महामते ।

विग्रहेशबलाघ्राता विशुद्धज्ञानविग्रहाः ॥ ४६८ ॥

नायकाः सर्व जगतो मूलप्रकृतिवासिनः ।

वीरभद्रो महादेवो वामदेवो भवोद्भवः ॥ ४६९ ॥

एकपिङ्गेक्षणेशानौ भुवनेशस्तथा परः ।

अङ्गुष्ठमात्रदेवश्च कथितोऽत्राष्टमो मया ॥ ४७० ॥

शतकोटिप्रविस्तीर्णा मायानन्ता प्रकीर्तिता ः ।

तस्या ऊर्ध्वमधोदीनि प्रधानान्तानि सुव्रत ॥ ४७१ ॥

Sampath_eBooks

दशदशोत्तराण्याहुस्तत्राध्वान्तविचारकाः ।

शतान्तराण्यजादीनि वीजान्तान्यनुपूर्वशः ॥ ४७२ ॥

निवृत्तेरधिकारोऽयमशुद्धाध्वनि गीयते ।

सहस्रधा प्रतिष्ठाख्यं सन्तानमीश्वरान्तिकम् ॥ ४७३ ॥

विद्येशान्तं विद्यया च लक्षधा तदपीक्षिताम् ।

शान्तिरष्टगुणा माया कोटिधा सा प्रतिष्ठिता ॥ ४७४ ॥

ततो मेयमनन्ताख्यमाख्यातं शान्त्यतीतगम् ।

व्याप्तिरेषा समाख्याता तत्त्वमात्रासु सुन्दरि ॥ ४७५ ॥

गुणसाम्यप्रमाणस्य प्रसङ्गं तदनादिनः ।

यत् स्थितं तत् प्रवक्ष्यामि शृणु त्वं चावधारय ॥ ४७६ ॥

षट्पूर्वं पाशजालन्तु तथा विग्रहिणो हराः ।

सिद्ध्यादयस्तथा भावास्तत्वान्मूर्धादिकानि तु ॥ ४७७ ॥

रागाद्यञ्जनजालञ्च सफलं सम्प्रतिष्ठितम् ।

सा मया भूतभैरोधा देहात् तत्त्वार्थकर्मजा ॥ ४७८ ॥

सामयाः समयध्वंसा निरोधाश्चाप्यकारणात् ।

भौताः पुर्यष्टकं तत्वा रागाद्याश्चाप्यपश्चिमाः ॥ ४७९ ॥

दैहाः प्राधानिकाः कार्मा नरके यातनात्मकाः ।

एते पाशाः समाख्याताः कथ्यते निग्रहाष्टकम् ॥ ४८० ॥

विग्रहो विग्रहाधारो रुमण्वांश्चोदकाक्षकृत् ।

मलयोत्कृवीजयोत्कृकर्मयोत्कृस्तमोमयः ॥ ४८१ ॥

भावास्तत्त्वानि रागाद्यं सफलं प्राक् प्राकीर्तितम् ।

अस्मद्रागगृहावस्थां चित्रभोगबुभुक्षवः ॥ ४८२ ॥

सपत्नीका विचेष्टन्ते सुखनीला नियोगिनः ।

अजानः प्रथमस्तेषां तथा भवभवोद्भवौ ॥ ४८३ ॥

एकपिङ्गक्षणेशश्च भुवनेशश्च वीर्यवान् ।

गहनेशस्ततः श्रेष्ठोऽङ्गुष्ठमात्रप्रजानुकः ॥ ४८४ ॥

हरः शङ्करनामा च रञ्जको जञ्जिकेश्वरः ।

भोगसंसाधनान्येषां कार्याणि करणानि च ॥ ४८५ ॥

बीजोत्थानि तु तद्योग्यं तत् स्वगोचरसंस्थितम् ।

अध्वन्यविमलो ह्येव ये स्थिता वेश्मभूमिषु ॥ ४८६ ॥

तेषामेषा व तेषां मेथा क्रिया देवि साधारणगतिं गता व ख गताः ।

संस्थात्र बाह्यतो देवाः सन्ति खण्डेन्दुमौलयः ॥ ४८७ ॥

त्रिशूलिनः प्रिया मिश्रा ः स्वस्थभोगा निराकुलाः ।

कपालीशोर्द्धनारीशावेकाक्षो विश्वसंज्ञकः ॥ ४८८ ॥

विरूपाक्षः पिनाकी च सर्वज्ञः पाकशासनः ।

नियोक्ता भीतिबाहुश्च यथायोग्यनियामकः ॥ ४८९ ॥

धूरेयो धूमकेतुश्च धन्वी चानिलवाहनः ।

कौशिकः षोडशेशानाः कथिताःशृण्वतः परम् ॥ ४९० ॥

विद्यानियोगिनो वीराः वीरभोगैकलालसाः।

जायामिश्राः समदृशो जटिलोग्रकपालिनः॥ ४९१॥

विचरन्ति महाभोग्यभोगिनां भुवनेश्वर ः।

उमाकान्तः प्रचण्डाख्यभीमवामैकवीरकाः ॥ ४९२॥

सर्वेश्वरोग्रानन्ताख्यौ भवैकशिवसंज्ञकौ।

कोटिसंस्थाप्यजे शोऽत्र स च द्वादशगो मतः॥ ४९३॥

कलावस्थापितो विष्णु रुद्रवृन्दस्ततो भवेत्।

नागोपवीतिनं भीमं चन्द्रोष्णीशं कपर्दिनम्॥ ४९४॥

नारीनिरुद्धदेहार्द्धमवितृष्णं स्वगोचरे।

वामो ज्येष्ठश्च रुद्रश्च कालश्च कलविकरणः॥ ४९५॥

चलविकरणोदेवो बलः प्रमथनस्तथा।

दमनः सर्वभूतानां मनश्चैव मनोन्मनः॥ ४९६॥

अधिकारप्रदस्तेषां देवो विग्रहभैरवः।

स्थानमेतत्चाधिकारं ततो भोगोज्ज्वलं महत्॥ ४९७॥

वागेशी विष्टपं देवि भोगस्थानं प्रकीर्तितम्।

लयो मनोमनीषाभ्यां जायते कारणेच्चया॥ ४९८॥

गारुडे भूततन्त्रे तु शिशुशास्त्रे च भैरवि

ये प्राप्ता मानुवीं सिद्धिं भैरवः क्रियया नराः॥ ४९९॥

तेषां स्थानत्रये प्रोक्ते त्रिस्वरूपागतिः स्मृता।

Sampath_eBooks

ततो विकृतसंस्थानसंस्थिताश्चन्द्रमौलयः ॥ ५०० ॥

लीलावतीमुखाम्भोजप्रचुम्बन षडङ्घ्रयः ।

नवेन्दुलेखाचिह्नोद्ध्र्वे जटामण्डलमण्डिताः ॥ ५०१ ॥

व्यालकल्माषजव्याघ्रचर्मवासो युगाङ्किताः ।

शावपुष्पधरा देवा नीलग्रीवाः कपालिनः ॥ ५०२ ॥

कालरूपी पटद्रुश्च कालाख्यो घोरनामकः ।

मातङ्गश्चण्डगर्भोग्रदीर्घरेखौ वराहकः ॥ ५०३ ॥

उच्चुष्मः शाबरो गन्धो यामयोऽफल फलोऽपरः ।

क्रोधनोन्मत्तचण्डश्च शूलाध्वौ ह्यधशूलकः ॥ ५०४ ॥

एवमन्ये च वीरेशा घोरतन्त्रा वतारकाः ।

कालतत्वे विजृम्भन्ते कालसङ्कर्षणीप्रियाः ॥ ५०५ ॥

भैरवानुप्रसक्ताश्च तन्त्राचारविलोपकाः ।

विद्यया तपसा कर्म निश्चयेनाथवा प्रिये ॥ ५०६ ॥

पिण्डयोग्यतया वाथ तत्वसिद्धिगताश्च ये ।

ततो भोगां विभुज्याशु क्रमशो यान्ति निर्वृतिम् ॥ ५०७ ॥

अधोविषचरी घोरानन्तस्रोतोविमालिनी ।

कर्कन्धुरिव प्रेंखद्भिः फलाण्डैर्भाति मण्डिता ॥ ५०८ ॥

महाकक्षपुटाकारः षट्पदा दीपमालिनी ।

रुद्रक्षेत्रजसंकीर्णा मानहीना लयाकुला ॥ ५०९ ॥

मण्डलान्तेषु वक्ष्यामि वासिनो भैरवाणवः ।

अथो विरुद्धदेहार्धाः सर्वे भस्माङ्गरागिणः ॥ ५१० ॥

विधुमण्डलरश्म्यौघाःशिखण्डोल्लसिताः ।

कल्माषकन्धरात्युग्रत्र्यक्षामुद्भासितानराम् ॥ ५११ ॥

शर्वाध्वस्थो ह्यसाध्यस्तु गहने गहनेश्वरः ।

हरिणो मेषकेतुश्च दीर्घपाणि रजोधिपः ॥ ५१२ ॥

कुमारोऽथ देवो देवेशानस्तथा परः ।

व्यस्तशीर्षोर्ध्वगेशश्च ऊर्ध्वचेता फणीश्वरः ॥ ५१३ ॥

भगीशो ह्लादनश्चैव तथा हरिहरः प्रभुः ।

हरिस्तनो हरिश्चैव कुन्दरः कुञ्जरोनघः ॥ ५१४ ॥

वैद्युतो ह्युद्भवः कामी महाकामी विचेतनः ।

भागीश्वरो मदोन्मत्तो ह्यष्टाविंशत्यमीश्वराः॥ ५१५ ॥

अधः पुटे विजृभन्ते पशुपत्यर्थबोधकाः ।

एषामूर्ध्वे दशेशास्तु गोपनिर्ग्रन्थिमाश्रिताः ॥ ५१६ ॥

महामायी विमायी च मायावी मदनस्तथा ।

मोहनो मन्मथश्चैव ब्रह्मणोधिपतिस्तथा॥ ५१७ ॥

प्राक्स्रवन्तु समाश्रित्य स्थिता भुवनपालकाः ।

वरीयांस्त्रिकलो ह्येषां मध्यावस्थानमाश्रिताः ॥ ५१८ ॥

आगस्त्यज्ञानसंतापक्रियाप्रान्ता मनीषिणः ।

स्वगोचरपतिज्ञानबोधकः साधकः शिशुः ॥ ५१९ ॥

क्षोभणोन्मादनश्चैव दुन्दुभिस्तथा ।

शिखेशः स्वशिवश्चैव क्षेमेशो दक्षिणे पुरे ॥ ५२० ॥

ज्ञानधृक् प्रवरोह्येष मध्यमस्थानमाश्रितः ।

गूढज्ञानक्रियाप्राप्ता गूढज्ञानविचारकाः ॥ ५२१ ॥

गूढज्ञानार्थशिष्येभ्यो गूढज्ञानप्रयच्चकाः ।

विकृतोऽविकृतः पिङ्गो दुर्धरो दुर्मतिस्तथा ॥ ५२२ ॥

विद्येशानोऽधिकारी च सप्तैते भुवनाधिपाः ।

जन्मजन्मन्यगुर्वेषामष्टौ स्थायिमहेश्वराः ॥ ५२३ ॥

ज्ञानोभयोग्रमार्गस्था ज्ञानोभयविचारकाः ।

ज्ञानोभयप्रसिद्धास्तु ज्ञानद्वयविमर्शकाः ॥ ५२४ ॥

ज्ञानोभयार्थशिष्येभ्यो वारुण्यामधुना शृणु ।

दीर्घबाहुः कलेशश्च कालीशः क्षेमकस्तथा ॥ ५२५ ॥

धृतिः प्रीतिकरश्चैव धृतिप्रीतिकरः परः ।

सर्वोन्नत स्थितिस्थापिमुख्यपक्षप्रतिष्ठितः ॥ ५२६ ॥

प्रपञ्चालोचनायुक्तज्ञानद्वयविमर्शकः ।

तत् समासगुणं प्राप्य श्रेयः सौन्दर्यनिर्मिताः ॥ ५२७ ॥

नानाभोगरसास्वादमदिरामत्तचेतसः ।

भवो भावस्तथा भीमः श्रीवत्सश्चतुरञ्जकः ॥ ५२८ ॥

Sampath_eBooks

वीराधीशशिवो यश्च सममध्यप्रतिष्ठिताः ।
भस्मान्तकप्रधानोऽत्र स्वपरिच्चदमध्यगः ॥ ५२९ ॥
एतैः संसाधितं स्थानं प्रपञ्चज्ञानविद्यया ।
एते यत्र सदा रेमुर्मायाभोगैकलालसाः ॥ ५३० ॥
मदमूर्च्छितगम्भीरो कारणेशो विभुस्तथा ।
अजस्रः स्रंसनोऽनन्तः शिवोऽविद्याविभावरी ॥ ५३१ ॥
भोगाध्यक्षो दशैकश्च सप्तपञ्चप्रमाणगम् ।
तेजोनिधिगुणोद्भासि ज्ञानमेतत् सुजाज्वलम् ॥ ५३२ ॥
तत्प्रभावाच्च मायाध्वपुटस्थाननिवासिनः ।
मिश्रशक्तिगुणावाप्तिर्वपुषोमी बुभुक्षवः ॥ ५३३ ॥
जुषन्ति विविधान् भोगांश्चिरजन्माश्रियावहा ।
एते वीराणवः सर्वे विग्रहेशनियोगिनः ॥ ५३४ ॥
असौ चक्रप्रभुः साक्षात् कर्तृत्वे संव्यवस्थितः ।
द्वारद्वारितयान्ये तु स्थिता ः विश्वेशि योगिनः ॥ ५३५ ॥
भैरवेच्चानियोगेन तदिच्चा संप्रवर्तते ।
तदिच्चाप्रेरिताः सन्तः प्रवर्तन्ते नियोगिनः ॥ ५३६ ॥
नियोगिनामभिप्रायाच्चक्राणि विविधानि तु ।
स्वर्गोचराधिकाराय प्रवर्तन्तेऽत्र एव हि ॥ ५३७ ॥
प्रकृतौ विग्रहेशस्य वक्ष्यंत्यतुलया फलम् ।

विश्वरूपधरः शम्भुर्लोहितो दीर्घजिह्वकः ॥ ५३८ ॥

महानासो हिरण्याक्षो महारुद्रश्च सुभ्रुवः ।

चपलो रतिश्च विरतिः अघोरः सर्वगः परः ॥ ५३९ ॥

त्रिदशामी समाख्याता नानामणिकृतालयाः ।

वागेशीज्ञानसंशुद्धास्तनुमासाः कृशोदराः ॥ ५४० ॥

सप्तनवतिमुख्यानि दुर्गेऽस्मिन् भुवनानि तु ।

कथितानि महाबाहो शेषसंख्या न विद्यते ॥ ५४१ ॥

शुद्धाशुद्धाध्वविष्कम्भस्थायि वागीश्वरी गृहम् ।

ततोऽनन्तशिवावासं स्वशिवञ्च विराजते ॥ ५४२ ॥

ओंकारपद्मविस्तीर्णं साध्योंकारस्य शोभनम् ।

धात्राधारमनीशस्य ध्याताधारस्य चैव हि ॥ ५४३ ॥

वीरस्य बन्धुमानस्य प्रपञ्चस्यामृतात्मनः ।

रेमुस्तत्रैव ते वीराः प्रमाणाशुविचारकाः ॥ ५४४ ॥

पञ्चार्थाङ्कुशहृद्धृद्या ऊहलक्षणकादयः ।

आदर्शाकर्षसंयुक्ताः सर्वंचिद्वेगपारगाः ॥ ५४५ ॥

विद्याधिपतिर्वीरेशतारोदयविरामगाः ।

चतुर्दश महादेवाः प्रबुद्धा निरहङ्कृताः ॥ ५४६ ॥

ऊहाज्ञानप्रवृत्तिस्था आद्यष्टौ ये प्रकीर्तिताः ।

महाविशारदाः षट्वना नागमक्रियाचितः ॥ ५४७ ॥

Sampath_eBooks

मायेयं पञ्चरूपं तु मया सम्यक् प्रकाशितम् ।

विष्टपाटोपसङ्घट्टघटितं शुद्धमार्गगम् ॥ ५४८ ॥

यत् तद् यथास्थितं देवि विद्याद्यं प्राक् प्रकीर्तितम् ।

देव्युवाच ।

या प्रागेकविधा प्रोक्ता माया पञ्चविधा पुनः ॥ ५४९ ॥

युक्तिमस्या ः वदेशान सन्देहविनिवृत्तये ।

श्रीभैरव उवाच ।

साधारणार्थं सा धार्या प्रभूताख्या शरीरिणी ॥ ५५० ॥

सन्ताख्या चेति विख्याता माया पञ्चविधा प्रिये ।

कलादिशाखाकलिलैः साधारणगतिं गताः ॥ ५५१ ॥

विश्वे तु जन्तुचक्रस्य सा धार्या देहदर्शनात् ।

साधारणाध्वनिर्देश्या सा धार्यास्तु शिवाणवः ॥ ५५२ ॥

माया साधनभोगस्था सा धार्या च तद्युक्तितः ।

ऊर्ध्वादितत्त्वदल्यां ये कण्टका भुवनात्मकाः ॥ ५५३ ॥

तद्भेदावस्थया सा तु प्रभूताख्या प्रगीयते ।

शिरोमुखगलोरस्कस्तनोदरकृकाटिका ॥ ५५४ ॥

गुह्योरुजानुजङ्घासु गुल्फपादविभागतः ।

सर्वावयवभेदेन ध्यानपिण्डप्रतिष्ठया ॥ ५५५ ॥

परमाणुस्वरूपेण लक्षणोद्येन वा प्रिये ।

Sampath_eBooks

शरीरिणा महामाया विज्ञातव्या शरीरिणी ॥ ५५६ ॥

विनष्टे तत्वसंस्थाने रुद्रक्षेत्रज्ञसंयुते ।

प्रलयेऽपि न योनित्वं या जहाति कदाचन ॥ ५५७ ॥

विश्लिष्टानां तु बीजानां ग्रसनाद्धूरिजात् पुनः ।

बीजानां सृजनायात्मा नात्मानञ्च नियामयेत् ॥ ५५८ ॥

सृष्ट्याहर्मुखकाले तु यस्मिन् यद्बीजमाश्रितम् ।

तस्याविर्भावहेतुत्वे भजते सन्निधानताम् ॥ ५५९ ॥

तत्र तत्रैव तेनासौ सन्ताख्या मोहनी मता ।

औपचारिकरूपाणि पञ्चैतानि मया तव ॥ ५६० ॥

कथितानि महादेवि वास्तवी वाक् प्रकाशिता ।

ज्ञात्वा ह्येतत् समस्तं सकलगुणगणा पूरितं विश्वमार्ग-

भावस्थानापहार प्रतिनिधिगणनासंयुतं संयुतं भ्रान्तिहीनम् ।

हेयोपादेयवस्तुस्थितिदिवसकृताक्षिप्त मोहान्धकारा ः ।

विश्लेषोद्दामधाम्नः परहरसमतां जन्तवो यान्ति रागम् ॥ ५६१ ॥

श्री भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां नवमः पटलः ॥ ९ ॥

दशमः पटलः ।

श्रीदेव्युवाच ।

कियती स्थितिसङ्ख्यास्य जगतः संक्षयस्तदा ।

कियन्त्यङ्गानि विकृते रजोगादीन् वदस्व मे ॥ १ ॥

श्रीभैरव उवाच ।

पञ्चपञ्चकवर्षस्थाणु ः प्राणो यो प्रयत्नगः ।

हृद्व्योम्नो निर्गतो व्योम्नो भूयो हृत्पद्ममाश्रितः ॥ २ ॥

प्राण एव समाख्यातः स्वस्थस्योध्व ख -र्द्धं प्रयाणिनः ।

यवषट्कं त्रियूकन्तु अणुकद्वयमेव च ॥ ३ ॥

तुटिरेषा समाख्याता तुटियुग्मं लवो भवेत् ।

लवपक्षौ निमेषस्तु निमेषश्च दशाष्टभिः ॥ ४ ॥

काष्ठाकलापिकाष्टाभिः त्रिंशद्भिः संप्रतिष्ठिताः ।

तावतीभिः कलाभिस्तु मुहूर्तः प्रोच्यते बुधैः ॥ ५ ॥

दशविंशमुहूर्तैस्तु नक्तंदिवमुदाहृतम् ।

तस्यापि त्रिविधं रित्थं दैवं पित्र्यं च मानवम् ॥ ६ ॥

दशपञ्चत्रियामाहैः पक्षमेकं वदन्ति हि ।

यवोर्ध्वे पक्षयुग्मन्तु मासयुग्ममृतुः स्मृतः ॥ ७ ॥

त्रिविक्रमक्रमान्तश्च ह्ययनं गीयते बुधैः ।

सम्पुटेनायने नैव समैका संप्रतिष्ठिता ॥ ८ ॥

मासं चार्तेन मानेन मया पैत्रमुदाहृतम् ।

सितासितक्रमात् पक्षावहोरात्रस्तु सूरिभिः ॥ ९ ॥

शब्दसागरिकं दिव्यमयनमुदग्दक्षिणम् ।

पक्षादि कल्पना प्राग्वद्द्वयोः स्वदिन पूर्वकाः ॥ १० ॥

संवत्सरः कलाभिस्तु त्रयस्याप्यैकसंख्यया ।

मानवोशनसा वेदा व्योमत्रयसमन्वितः ॥ ११ ॥

प्रोक्त स्त्रिंशद्धृते पैत्र्यः कलाःस्युर्दिव्यकाष्ठगाः ।

शतानि नवदेव्यास्तु पैत्रा द्वादशभिर्हृते ॥ १२ ॥

चतुर्विंशद्विभक्तेयं संख्या स्यात् प्राणमालिनी ।

वक्ष्यामि तेऽधुना सर्वं पितृकालं युगादिकम् ॥ १३ ॥

महाकल्पावसानन्तु कालं कालविदोदितम् ।

सन्ध्यासन्ध्यांशसंयुक्तं नाप्राकृतयुगं तु यत् ॥ १४ ॥

द्विर्नभोर्तुस्वराष्टाणां संस्था यावत् प्रतिष्ठितम् ।

तावन्नभोक्षिवह्न्याधिस्त्रेतादीनि विजानथ ॥ १५ ॥

द्विरन्ध्राष्टाष्टयुगलैर्द्वापरं परिकीर्तितम् ।

कलियुगः समाख्यातो द्वापरः सकलीकृतः ॥ १६ ॥

चतुर्युगमिदं पैत्रं पिण्डीभूतं सबिन्दुकम् ।

वेदाब्धीन्दुयुतं प्रोक्तं नगयन्त्रमिदं स्फुटम् ॥ १७ ॥

पित्र्यन्तरं समाख्यातमेकसप्ततिभाजितम् ।

व्योमत्रयाद् द्विपक्षाक्षिकाष्ठाभिस्तत् प्रतिष्ठितम् ॥ १८ ॥

षट्के षट्के सह प्रोक्ता प्रवेशो निर्गमेऽपि च ।

नियमस्तु भवेत् संध्यासन्ध्याशश्चापि सुन्दरि ॥ १९ ॥

ततस्तस्मिन् महादेवि दशतुर्येण भाजयेत्।
भाजते कल्पिका देया सन्ध्यासन्ध्यांशसंयुता :॥ २०॥
निर्गमे च प्रवेशे च सूर्या मानसहस्रगा।
एतद्युगसहस्रन्तु पैत्रमुक्तं तु सूरिभिः॥ २१॥
इन्द्राग्निव्योमषट्केन स्फुटमेतत् प्रकीर्तितम्।
कल्पोऽयं पैतृकःप्रोक्तो महाकल्पो द्विराहतः॥ २२॥
शब्दकृष्णं समिच्चन्ति सुरज्येष्ठस्य सूरयः।
कालेनानेन कर्तव्याः पक्षाद्याः कल्पनोदिताः॥ २३॥
पित्र्यन्तरं महादेवि व्योमवह्निसमाहतम्।
शतमन्त्रान्तरं प्राहुः पुंसां वर्षप्रमाणकम्॥ २४॥
एवं पैत्रो विकल्पस्तु प्रोक्तो भाजनभाजितः।
प्रयाति युगसाहस्रं वासरं पद्मजन्मनः॥ २५॥
कोटिशतानि चत्वारि कोटयो द्विजवर्षगाः।
द्विगुणोऽयं महाकल्पः शेषं पूर्वोदितं विदुः॥ २६॥
इन्द्रान्तरे च पितरः पतन्त्यग्निखमानगाः।
स्थविराननभोयुग्मवेदसंख्याविभागगाः॥ २७॥
रात्रावपि तथैवं हि वारे नक्तंदिने प्रिये।
विलीयन्ति शुनासीरा देवि मङ्गलयुग्मगाः॥ २८॥
निजवर्षसहस्रान्ते सुरज्येष्ठो विनश्यति।

तच्चेते पितृवर्षाणि दिक्खर्ताष्टाङ्कबिन्दुभिः ॥ २९ ॥

तच्चब्दस्थायि त्रैलोक्यं तन्मिषाभङ्गिमान् प्रिये ।

कालानलस्थं कुरुते सटाटोपविभासुरः ॥ ३० ॥

लीने वेधसि ब्रह्माण्डं लयं यान्ति स्वसंभवे ।

दशवारं प्रलीने तु ह्यस्मिन् तोयं विनश्यति ॥ ३१ ॥

एवं वह्न्यादितत्वानां संस्थितस्तु दशोत्तरः ।

प्रधानान्तो नराद्यन्तो यथा व्याप्तो तथा प्रिये ॥ ३२ ॥

स्थिता व पिशिनान्तस्तु विज्ञेयः प्राक् प्रचोदितः ।

यस्य यन्त्रोद्भवं विद्धि लयस्यैव च यत्र तु ॥ ३३ ॥

शतायुषः स्मृता जीवाः सर्वे संपूर्णकर्मिणः ।

निकृष्टकर्मणामायुर्न तु वक्तुं प्रपार्यते ॥ ३४ ॥

आधारविभवाः केचिल्लीयन्त्याम्रेडयन्ति च ।

शुद्धाशय बाशाः केचित् स्वोद्ध्र्वस्थानं व्रजन्ति हि ॥ ३५ ॥

अत्यन्तविमलत्वाच्च केचिद् भाजसिताध्वनः ।

जयद्रथ उवाच ।

विश्वक्सेनोग्रयोर्देव स्थितिनाशौ निवेदितौ ॥ ३६ ॥

तावाचक्ष्व विशालाक्ष सन्देहविनिवृत्तये ।

श्रीभैरव उवाच ।

सरोजजन्मवश्चाब्दैः सरःस्वाननसंस्थितैः ॥ ३७ ॥

नक्तंदिनं भवेदेकं पक्षिपत्रस्य सैन्धव ।

सप्तविन्दुरसैर्नन्दै स्थितं तत्र दिवाकरैः ॥ ३८ ॥

पित्रब्दैः संस्थितं तद्धि तैश्च पक्षादिकल्पना ।

मधुहर्त्तुः प्रकर्तव्या विप्रवच्चायुषो गतिः ॥ ३९ ॥

एवं शौर्यश्च मात्रेण अहोरात्रं तु वैमलम् ।

व्योमाष्टकं रसाष्टन्तु रसवेदयिता न तु ॥ ४० ॥

प्रयान्ति नृपशार्दूल पितृवर्षाणि तत्र तु ।

अस्यापि मुदिते ज्ञेयाः पक्षाद्या द्वादशान्तिकाः ॥ ४१ ॥

स्थिते तस्यावसाने तु भवेऽते ख भवते विशारावः ।

रूपन्तु स्वरूपन्तु रूपेषद्रुद्रविन्दकम् ॥ ४२ ॥

मया पुरोपदिष्टं हि सगुणस्य गुरूत्तमैः ।

दिग्व्योमरूपन्तन्तुसु रसवेदसमन्वितम् ॥ ४३ ॥

विष्टरश्रवसो मानं जीवितस्य प्रकाशितम् ।

मानवो भवते पैत्र्यः कालस्त्रिंशतिभाजितः ॥ ४४ ॥

पैत्र्योऽपि जायते दिव्यो द्वादशांशविभाजितः ।

प्रागुद्दिष्टमतिः कार्या शेषे पन्निलनन्दन ॥ ४५ ॥

परमार्थयुतः पिण्डो दृश्योऽणुः संप्रतिष्ठितः ।

दशभिस्तैः शिरोजन्म फलैका संप्रति ॥ ४६ ॥

युकाष्टकेन संप्रोक्ता सस्य राजमितिर्मता ः ।

सस्यराजाष्टकेनैव हृत्स्थोऽङ्गुष्ठप्रतिष्ठितः ॥ ४७ ॥

चतुर्विंशतिभिर्स्तैस्तु हस्तमानमुदाहृतम्।

पदं वै हस्तयुग्मेन चत्वारिंशत्पदो गुणः ॥ ४८ ॥

आयामविस्तरसमा तस्माज्ज्ञेयं निवर्तनम्।

अथ यामद्विरूपेण तदा तत् प्रविभाव्यते ॥ ४९ ॥

निवर्तनशतेनैव क्रोशः सिद्धोऽत्र शासने।

तैश्चतुर्भिः समिच्चन्ति योजनां गणितद्दशः ॥ ५० ॥

अनेन योजनेनोक्तं मानं भूमण्डलादिके।

विशदमिदंमशेषं कालमानन्ददेशो

विदितभुवनमालासंभवस्थानवासः ।

मतिकुटिलसन्नद्धं ख पति प्राप्य मन्त्रार्णमेकम्।

न जुषति न प्रसिद्धः कोऽत्र लोकेशसिद्धः ॥ ५१ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसंकर्षण्यां दशमः पटलः ॥ १० ॥

एकादशमः पटलः।

श्रीदेव्युवाच ।

देवदेव महादेव सर्वज्ञेश महाद्युते । ब्रूह्येकवीरं मन्त्रज्ञ पूर्वोक्तं

मन्त्रसिद्धये ॥ १ ॥

देव्योऽथ शम्बरा दूत्यो ह्यनुदूत्यश्च किङ्कराः।

गणाश्च लोकपालाश्च कार्यमन्त्रगणाश्च ये ॥ २ ॥

एकायां संप्रविष्टास्तु यथा सन्ति सुरेश्वर ।

तथा प्रकाशयेशान सर्वेशाननमस्कृतः ॥ ३ ॥

यया यत्नेन सिद्ध्यन्ति जपहोमेन साधकाः ।

निःशेषमन्त्रवर्गोयं यस्याः सम्यक् प्रतिष्ठितः ॥ ४ ॥

यया च विद्यया युक्ताः सदेवासुरमानुषाः ।

क्रियन्ते वशगा देवाः सर्वकालफलप्रदाः ॥ ५ ॥

पिहनाद् गोपितायाश्च च गूढा सर्वज्ञसिद्धिदा ।

प्रबोधकरणी विद्या कृत्यावेतालसाधनी ॥ ६ ॥

त्रैलोक्यराज्यप्रदया ययातुल्या न विद्यते ।

आश्चर्याणि महीयांसि प्रत्ययाश्च तथैव च ॥ ७ ॥

यया जायन्ति वीराणां विधानार्पितचेतसाम् ।

यया सर्वाणि कार्याणि एकया साधयेत् सदा ॥ ८ ॥

या न किलयितुं शक्या यदन्योग्रा न विद्यते ।

मन्त्रमुद्राथवा विद्या या त्वयाध्यासित सकृत् ॥ ९ ॥

कालरूपा महाविद्या जगत् कर्षयते यतः ।

कालसङ्कर्षणी तेन प्रोक्ता या प्राक् त्वया मम ॥ १० ॥

सा मुहुः कृपया नाथ सैन्धवस्य प्रकाश्यताम् ।

भैरव उवाच ।

यत्तदादौ महादेवि तत्ववित्त्वं प्रकाशितम् ॥ ११ ॥

अकलं तिमिरं शान्तं निर्द्वन्दं वस्तुरूपिणम् ।

तत् स्वभावात् तु संकृष्य कालरूपात्मनात्मनः ॥ १२ ॥

सूक्ष्मरूपमगाद् भावं सूक्ष्मशक्त्यात्मकं प्रिये ।

सा शक्तिर्देवदेवस्य कालसङ्कर्षणी मया ॥ १३ ॥

गोपिता सर्वशिष्याणां त्वामेकां वर्ज्य शैलजे ।

त्वदुक्त्या सांप्रतं ब्रूमि सैन्धवस्यापि निश्चितम् ॥ १४ ॥

जीवबन्धकरी घोरा महामायाचलेश्वरी ।

कालसङ्कर्षणी विद्या या मयाध्यासिता सकृत् ॥ १५ ॥

महागुह्यातिगुह्यैषा सर्वमस्यां प्रतिष्ठितम् ।

अनया जप्तया देवि सर्वमन्त्रगणो महान् ॥ १६ ॥

अथवा सप्तकोटयस्तु मन्त्राणामुग्ररूपिणाम् ।

जप्ता भवन्ति यष्टारो इष्टाश्च नात्र कार्या विचारणा ॥ १७ ॥

सकृत् संस्मरिता ह्येषा सिद्धिदा स्याद् विजन्मनि ।

विभक्ता जन्महीनैस्तु सिद्ध्यते ह्येकजन्मना ॥ १८ ॥

ब्रह्महत्यायुतं कृत्वा हत्वा स सचराचरम् ।

अमेध्याशी मातृगामी ह्यस्याचाराद् विशुध्यति ॥ १९ ॥

काव्येनैषा च यस्योक्तां दानवाधिपतिः पुरा ।

वाचस्पतेश्च गरुडो गरुडस्य सरस्वती ॥ २० ॥

निजगाद सरस्वत्यां भैरवः परमेश्वरः।

ज्ञानस्यास्यैकरूपस्य प्राक् स्कन्धः संप्रकाशितः॥ २१॥

द्वितीयोऽपि जगत्यन्धो मलस्त्वन्तो दशास्यतः।

प्ररूढः सैन्धवश्चैव शतशाखो भविष्यति॥ २२॥

कश्चिदन्यो न जानाति सत्यमेतन्नगात्मजे।

इति गुह्यातिगुह्येषा तेन गोप्या वरानने॥ २३॥

प्रकाशिता निहन्त्येषा नात्र कार्य विचारणा।

तेनैषा गूहिता देवि प्रज्ञायोगेन लभ्यते॥ २४॥

नान्यथा ज्ञायते ह्येषा विना गुरुनिषेवणा ।

कालसङ्कर्षणी ज्ञाता सदाशिवसमो गुरुः॥ २५॥

निबध्नाति सुरारातिकिन्नरोरगरक्षसाम्।

पिशाचयक्षगांधर्वसिद्धा योग्यं विकासि च॥ २६॥

भयाभयकरः श्रीमान् दर्शनात् स्पर्शवन्दनात्।

विश्लेषयति पापानि रुजासुभिषग्योगवत्॥ २७॥

प्राप्य ज्ञानमिदं तस्मात् तद्दूरं तत् फलद्वयम्।

तेनोद्धार्या महाविद्या प्रत्ययात् स्थाप्य भूतले॥ २८॥

गवां सकृदुपालिप्ते दर्पणोदरसन्निभे।

मृगनाभिपयःसिक्ते व मृगनाभिः शङ्खाङ्गमसृणीकृते ॥ २९॥

सिन्दूरकुङ्कुमक्षोदरजोरङ्गरञ्जितविस्तरे।

मेचकागरुकर्पूरवनौकः स सुकेशिभिः ॥ ३० ॥

धूपिते मधुनिष्यन्दिसुगन्धिकुसुमाकुले ।

चन्द्रचन्दनजम्बालरूषिताङ्गः प्रसन्नधीः ॥ ३१ ॥

महारजतसद्वासो दुगालम्बितविग्रहः ।

अथानुलेपनाभिख्यावासो देशावलम्बकः ॥ ३२ ॥

चित्रपुष्पविचित्रोऽर्द्धकोरटीशोभितोत्तमः ।

मालतीमल्लिकाकुन्दसिन्दूरतगरात्मवान् ॥ ३३ ॥

जयामिलातकादीनां सुमनःशेखराङ्कितः ।

हेमकुण्डलताटङ्कडिड्डिकारोपितश्रुतिः ॥ ३४ ॥

नानारत्नकरालातस्थापिग्रैवेयकन्धरः ।

मुक्ताफलगुणाटोपशोभितोरः स्थलाश्रयः ॥ ३५ ॥

विचित्राङ्गदकेयूरसमारोपितदोर्द्वयोः ।

सकलास्त्रसमुत्कीर्णकाटकलादिकः ॥ ३६ ॥

पुष्पायसमयं तच्च तारजं जातरूपकम्

पञ्चलोहमथाभ्यङ्गं कर्तव्यं रुचिरं दृढम् ॥ ३७ ॥

चित्ररत्नसन्नद्धमुद्रिता चित्रिताङ्गुलिः ।

शंयापिप्पलपत्राग्रप्रचुम्बितवरोरुकः ॥ ३८ ॥

कार्तस्वरसमालब्धतलिकाक्षुरिकाश्रयः ।

पट्टिकाग्रन्थिसंस्थानात् प्रशोभितकृकाटिकः ॥ ३९ ॥

मकराननमञ्जीरसमालङ्कृतपद्युगः ।

त्रिफलागर्भताम्बूलरञ्जिताधरपल्लवः ॥ ४० ॥

अञ्जिताक्षो मुदा लब्धो मन्त्रसन्नद्धविग्रहः ।

एतद्रूपधरो मन्त्री महाव्रतधरोऽपि वा ॥ ४१ ॥

प्रणवं योगपीठं तु हेरम्बं ज्ञानदं गुरुम् ।

पूजयित्वोपचारैस्तु तथोद्धार्य मनोभवा ॥ ४२ ॥

मूकारूहं समावर्त्तं प्रमोदारम्यलाञ्छितम् ।

प्रथमं बीजमेतद्धि सर्वाकृष्टिविधायकम् ॥ ४३ ॥

अन्धतामिस्त्रकस्तस्माद् भवप्रभवच्चन्दकः ।

सुतारालिङ्गितावर्तस्थितो यन्त्रप्रवाहकः ॥ ४४ ॥

अरम्याक्रान्तमूर्तिस्तु सुतारो लेख्य मंत्रवित् ।

अवेणिकामसलिला मन्वन्तं तत् प्रमोदितम् ॥ ४५ ॥

आधाराधिपतो लिख्य तस्मादोघं समुद्धरेत् ।

सुतारयन्त्रसंभिन्नां जडतां सौधमूर्ध्वगम् ॥ ४६ ॥

तारयन्तीं हतां देवि मूकतां च समुद्धर ।

आरम्भां केवलां लिख्य तथा चैव सुनेत्रिकाम् ॥ ४७ ॥

सुताराथ तथोद्धार्या यथा जीता वरानने ।

नोत्तमाम्भसिका तस्मादुत्तमांभसिकांतिका ॥ ४८ ॥

तारहीना समुद्धार्या किन्तु युक्तमिदं स्फुटम् ।

पञ्चधा लेखनीयन्तु विद्या सा नवधा प्रिये ॥ ४९ ॥
सिद्धि तुष्ट्याक्षरा वर्ष्मप्रतिष्ठेयं महाबला ।
कालसङ्कर्षणी विद्या कथिता कालकर्षणी ॥ ५० ॥
अथ दीप्ता महाघोरा दीपनादिविवर्जिता ।
भैरवाण्डगणाकीर्णप्रभा ह्यधिकपौरुषा ॥ ५१ ॥
न तद्धोरा जगत्यस्मिन् पीठं तुर्ये न विद्यते ।
येनैवासन्नभूतेन लघुतामुपनीयते ॥ ५२ ॥
हर ईमर विश्लेषा द्वादशाराधिकारिणी ।
अनुलोमेन देवता देवमण्डले ॥ ५३ ॥
असुतारान्तिकामूलाद् दूतीवृन्दविधायिनी ।
वाचका चानुदूतीनां जागर्युक्ता विलोमतः ॥ ५४ ॥
असुनेत्र्यानुचारा स्युः किन्नराश्चाप्यनन्तया ।
जडतान्तकागणां नामामादितो मूकतादितः ॥ ५५ ॥
आघर्ण दशमा देवि दशलोकेश्वरात्मिका ।
असुतारांतिकं यत्तु युग्मपञ्चकमीरितम् ॥ ५६ ॥
लोकेशायतजातस्य द्विगुणं तत् प्रशस्यते ।
अनम्भःसलिलामब्धोलिपितुर्येन यत् स्थितिम् ॥ ५७ ॥
तदनुक्रम यत्तपदं कर्ममनुद्भवेत् ।
समस्ता मूर्त्तिरूद्दिष्टा तथा बाह्या च सैन्धव ॥ ५८ ॥

अन्धतामिस्त्रकाद्यन्तु मातृकात् सावसानिकम्।

अनन्ताद्युपवेशस्य पदनिर्माणकृद् भवेत्॥ ५९॥

पुरोक्षरं गुहाज्ञेयं तस्मादस्ताक्षरं ।

असुतारा शिखा प्रोक्ता तनुत्राणमनम्भिका ॥ ६० ॥

असुनेत्रा दृगुद्दिष्ट शेषं चेद्येषु भेदकम्।

विद्या गात्रक्रमाल्लेख्या ं विद्या देहविधायिनी ॥ ६१ ॥

मूत्त्वाक्रान्तिमूर्त्तिन्तु पायुरुग्भवबीजकम् ।

मूकत्वाद्दीपितं तच्च प्रमोदालिङ्गितं प्रिये ॥ ६२ ॥

असदाप्रमुदितों नमः शिवशक्त्याक्षरं परम्।

विभिन्नं क्रमशो ह्येतच्चिवाङ्गानि तत्रशिवाङ्गानि भवन्ति हि ॥ ६३ ॥

असदास्त्रं प्रमोदा ं दृग्मूकता पिङ्गलं मतम्।

मूलिकां चान्धतामिस्त्रं शिरःपायुसुतिर्मता ॥ ६४ ॥

मन्दिरं मूकता चैव कोशोऽयमण्डसम्भवः।

प्रकाशितो महीपाल संसारः सर्पजंतुरः ॥ ६५ ॥

कालसङ्कर्षणीदेहो विपुलोदन्वतोमलः

निष्कान्तो भाति भास्यूह मणीनामिव विस्तरः ॥ ६६ ॥

कालसङ्कर्षणःह्येष जायते पीठतो नरः।

एतावच्च विशेषोऽत्र शक्तिशक्तिमतोर्मतः ॥ ६७ ॥

रुचिताराधनाद्देवौ फलद्वयविधायकौ।

किं स्वंतन्त्रगुणं ह्यस्मिन्नितरं शक्तिसेवनम् ॥ ६८ ॥

च्युतः परममीक्षयानि जवलैकमुल्लिलया ।

च्युतः सकलवन्धनं पतति मूलविच्चेदकः ॥ ६९ ॥

हिताहितविवेचको विततबोधसम्पत्प्रदः ।

स्फुटाखिलविनिर्णयः प्रकटिताद्धि विद्यात्मकः ॥ ७० ॥

अमृतसाधनमूलमिदं प्रिये स्फुटतरं च वदन्ति च ये नराः ।

स्वपरयोरपि तेऽमृतकारिणो न हि भवन्ति नते ष्विव मण्डकाः ॥ ७१ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसाहस्रे प्रथमषट्के श्रीकालसंकर्षण्यामेकादशः -दशमः पटलः ॥ ११ ॥

द्वादशमः पटलः ॥

श्रीदेव्युवाच ।

विद्यानुभवरूपा या तया मुच्यन्ति जन्तवः ।

ज्ञातमेतद्यथार्थन्तु यद्यन्यत् साधनं प्रभो ॥ १ ॥

विद्या ते युक्तये तद्धि चित्रयोनिवपुर्वद ।

श्रीभैरव उवाच ।

योगक्रियाथ चर्या च साधनानि बहुनि च ॥ २ ॥

व्यङ्ग्ययोर्व्यञ्जकान्यत्र पुंसां सन्ति क्रियोदिताः ।

स्थिराक्षी जगतश्चातो योगमार्गं शृणु प्रिये ॥ ३ ॥

Sampath_eBooks

पुंसां कैवल्यदातारमनायासमनात्मनाम् ।
अङ्गिनोऽङ्गानि योगस्य षट् प्रशंसन्ति सूरयः ॥ ४ ॥
प्राणायामो धारणा च प्रत्याहारो वितर्कता ।
ध्यानं समाधिस्तामाह इत्यङ्गानि स्फुटानि तु ॥ ५ ॥
व्यञ्जकात्मान्त रङ्गस्थव्यङ्ग्ययोगस्य सुन्दरि ।
बहिरन्तर्विशुद्धात्मा भावः स्वच्चोदकादिभिः ॥ ६ ॥
सुप्रसन्नमनो योगी धाम्नि शुद्धे सुगन्धिनि ।
मूत्रोत्सर्गसुखत्यागी स्निग्धप्रलघुभोजनः ॥ ७ ॥
निरुगनम्व्राहारो ख निरूगेनाम्वाहारो वा मृदुपीठप्रतिष्ठितः ।
विशुद्धदन्तवक्रोच्चस्ताम्वूलादिसुगन्धवान् ॥ ८ ॥
स्वेच्चास्वरूपधारी च सुगन्धामोदकायवान् ।
मलशुद्धःसुवक्रो वा मन्त्ररत्नांशुलाञ्चितः ॥ ९ ॥
हृषीकाधिपतिः कोटे ध्रुवं कृत्योच्चशीर्षकृत् ।
ततोऽभ्यन्तरमानीय जिघ्रेत् स्वान्तं नियम्य तु ॥ १० ॥
सिद्धार्थान्तरं संस्थाप्या धरोष्ठौ संविधार्य तु ।
निराधाररसातालुवदनान्योन्यस्पृष्टगः ॥ ११ ॥
मरुद्धारिप्रवरेण्यभृङ्गमालास्वरूपिणम् ।
द्वादशान्तान्तगं कृत्वा नाडीशूलेन योगवित् ॥ १२ ॥
पूषा प्रणालिकायाता व्योमामृतजलेन तु ।

मुहुरापूरयेत् कायं मयूरांकितमस्तकः ॥ १३ ॥

स्रोतांसि ह्यथ चित्तेन घटवत् पूर्णमण्डलः ।

स्थित्वा ग्लानिं मुहूर्तन्तु मन्दं मन्दं ततोऽनिलम् ॥ १४ ॥

रेचयेत् त्रिपथा व्योम्नि ज्योतिर्गणगणाकुलैः ।

तस्मिल्लीने तु मरुतः स्वस्थः स्वान्तो निराकुलः ॥ १५ ॥

लीनो व्योम्नि परेशान्ते प्राणोत्कलिकया चिता ।

प्रशान्तायामलीनात्मा प्रशान्तपदगो भवेत् ॥ १६ ॥

ऊद्ध्र्वं संप्रेरणं वायो ः रेचकः कायकृष्टिकृत् ।

पूरकः पूरणं तद्धि पुष्टिकृच्च प्रशंसितम् ॥ १७ ॥

न तूद्यत्स्मरकारी च निरोधः कुम्भको मतः ।

प्राणायामत्रयत्यक्तः शून्यलीनमनाःप्रिये ॥ १८ ॥

निराधारः प्रशान्तात्मा प्रशान्तस्तूच्यते बुधैः ।

एषा यामलताघातशासने मनसि प्रिये ॥ १९ ॥

धारणा योगिनाभ्यस्या धारणामथ कर्मणाम् ।

विश्रामो वा चलाकारा स्थितिः पञ्चविपर्ययात् ॥ २० ॥

महामोहसमायुक्तामकाराकृतिगां निधिम् ।

स्वस्तिकाटोपघटितां सटामण्डमालिनीम् ॥ २१ ॥

धूम्रशब्दप्रनाडीञ्च मन्दानिलसमीरिताम् ।

चित्तस्थैर्यगतो योगिसञ्चिन्त्यामन्यथा मतः ॥ २२ ॥

तया निर्दग्धदेहस्तु भस्मकूटप्रतिष्ठितः ।

सामीरीं तु शतमेषां षडनस्वरमण्डिताम् ॥ २३ ॥

चिन्तयेत्तूभयानन्तविक्षिप्तं भस्म भावयेत् ।

ततो बहला वपुषो वारिधाराकदम्बकैः ॥ २४ ॥

एकोदन्वत्प्रभापूर्णे धाम्नि धाम सुवर्तुलम् ।

वृषधृङ् मौलिमाणिक्यशिखाटोपोपमं प्रिये ॥ २५ ॥

अमृतश्चाब्धिवद् वस्तं बालमाभानु भास्वरम् ।

तच्चावयवशाखाढ्यं सन्निधीकृत्य योगवित् ॥ २६ ॥

ततः स्वरसितोग्रोग्रकण्टकाटोपमण्डितम् ।

समन्तात् तुर्यवर्णान्तजातरूपप्रभालयात् ॥ २७ ॥

चिन्तयेत् कठिनं योगी कठिनत्वप्रसाधकम् ।

स्फाटिकोपलशिखिनां मालारूपविलम्बितम् ॥ २८ ॥

स्वच्चच्चायं स्थिरं व्योम मुक्ताफलप्रभामयम् ।

चिच्चित् समरसीकृत्य योगी तन्मयतां गतः ॥ २९ ॥

अन्धतामिस्त्रबीजस्थः साधयेद् व्योमधारणाम् ।

विकोशं भोजमालाढ्यं कोदण्डाटोपशालि च ॥ ३० ॥

मोहालोक्यं निधिजलमानन्त्यतमसापि च ।

पुष्टिकं तामसं विद्धि मोहमाप्यायने हितम् ॥ ३१ ॥

सा कदा सादतेजसाश्च विवृद्धये ।

लाघवे श्लेष्मणो हानौ महामोहःप्रशस्यते ॥ ३२ ॥

संक्रामे व्यूहोत्प्लवने परं चिह्ने ह्यनास्पदे ।

स्थानान्तरा क्रान्त्यैर्लघुकृष्णे श्मणस्तनौ ॥ ३३ ॥

प्रशंसितं पटस्थत्वं तामिस्राभिविकल्पगम् ।

मूर्तीनां व्योमरूपाणां प्रवेशयति सर्वतः ॥ ३४ ॥

निर्गमायत तदाकाशमण्डलं मण्डमिष्यते ।

एवं योगात्मकें काये धारणायोगनिश्चये ॥ ३५ ॥

नाभ्यधो यत् स्थितं कन्दं तस्योर्ध्वे वालमुज्वलम् ।

कण्टकाटोपगहनं शिराजालसमाकुलम् ॥ ३६ ॥

तत्रुटासितश्रीवत्सतारं तारदलाकुलम् ।

सुरकोटीरकिञ्जल्कं बीजसप्तदशाङ्कितम् ॥ ३७ ॥

उदग्रकर्णिकाकारं भास्वन्तं स्वेन तेजसा ।

भास्वन्मयानि पत्राणि केसरा विविधा मताः ॥ ३८ ॥

चित्रभानुमयी चित्रा कर्णिकास्योदिता बुधैः ।

तस्या ह्यन्तर्गतं भाति मण्डलं धूमजन्मनः ॥ ३९ ॥

तदन्तर्भासिता शेषजगतो विश्वकर्मणः ।

तस्याप्यन्तर्गतं देवि तव वक्रस्वरूपिणः ॥ ४० ॥

मज्जटापञ्चकस्थानसुखिनः शशिन ःप्रिये ।

स्फुरद्रश्मिसहस्राढ्यममृतोतं सुमण्डलम् ॥ ४१ ॥

Sampath_eBooks

तन्मध्ये ह्यङ्कुरं पत्रं स्थितं मुक्ताशलाकवत्।

ऊर्ध्वसंवित् स्फुरन्त्यन्तममृताम्बुगणाकुला ः॥ ४२॥

तस्मिंश्चित्तं विनिक्षिप्य लोलीभूतस्तु योगवित्।

यदा तन्मयतां याति सर्वचित्वं तदा लभेत्॥ ४३॥

यस्माच्चित्तच्युतो योगी श्रुतदृष्टानुभूतजैः ।

विषयैः कर्षितो भूयस्ते उत्खाय्य चिताचितम्॥ ४४॥

ध्येयस्थाना च्चलत्वाय यत्प्रत्याहरणं मुहुः।

प्रत्याहारः स्मृतः सो हि ध्यानं ध्येयविवेचकम्॥ ४५॥

आलोचने तथालोच्ये युक्तिर्या प्रविमर्षिता ः।

तामुह्याखंज्ञा चितायोथे ध्येयः प्रवर्तते॥ ४६॥

सोऽहमिति योगगात्रं यो योगिनां योगसाधकम्

आलोचनं यदालोच्यं यदालोचयितापि च॥ ४७॥

समप्रज्ञाचलत्वेन निर्द्वन्द्वैकत्वमागतम्।

अभातस्तिमिताक्षोभ्यः समाधिः स तपस्यतः॥ ४८॥

अषचोक्ताङ्कुराग्रेण कालो भूतमनाः प्रिये।

स्थानात् स्थानान्तरास्वादी शक्त्याकाशे लयं व्रजेत्॥ ४९॥

योगी हृदम्बुजावस्थो द्वादशारकशालिनि।

कला द्वादशकोपेते शुभ्रांभोजे विवस्वतः॥ ५०॥

परितिर्यग्दलाटोपं कर्णिकाकेसरान्तरम्।

तस्यां सूर्यांशुसंमिश्रं सुप्रवृद्धं तदङ्कुरम् ॥ ५१ ॥

कदम्बसुमनोभासि यदा पश्यति योगवित् ।

दृग्दृशा क्षोभमापन्नस्तदा व्यक्तांतिकाश्रयः ॥ ५२ ॥

तस्य भोग्यत्वमायाति स्थित्यन्तं पद्मजन्मनः ।

तस्मादर्थोऽर्थसं सर्पी अङ्कुरः कन्दराश्रयः ॥ ५३ ॥

षोडशच्चदविस्तीर्णे कलाजालविशालिनि ।

पुष्करं नाभिमध्यस्थं हिममुग्ररश्मिमालिनः ॥ ५४ ॥

स्वच्चामृतकलालब्धः शुद्धमुक्ताफलाकृतिः ।

योगिनां चित्तसंवृत्तं समत्वान्महतः प्रियम् ॥ ५५ ॥

विष्वक्सेनात्मको योगः कलास्ताः साधयेच्छ्रियः ।

लब्धकाशेषपत्रान्तश्चित्रभानुशिखाकुलः ॥ ५६ ॥

जज्वालालम्बकाग्रे ते प्रमाणप्रोदितां कुलः ।

समाधौ योगिनां धत्ते मायान्तां भोगसंततिं ॥ ५७ ॥

भवस्थानीयमेतद्धि योगं यस्तु समभ्यसेत् ।

भवभावगतो योगी भवभाग् जायते न सः ॥ ५८ ॥

भ्रुवोरन्तर्गतं पद्मं कर्णिकारं चतुर्दलम् ।

तदालिङ्गनसम्पर्कात् क्षान्तिमात्रातिरेकगः ॥ ५९ ॥

प्रकाशमात्रसंलक्ष्य उपमानविवर्जितः ।

सोऽङ्कुरं प्रागुपन्यस्तो व्याप्त्यव्याप्तिप्रकाशकः ॥ ६० ॥

स्यात् समाधिवशाद् देवि योगिनामन्तरं गतः ।
व्यतिक्रम्याब्जमालान्तु द्वादशान्ताम्वुजाग्रतः ॥ ६१ ॥
यदासावङ्कुरः शुभ्रः सुलीनो ह्यस्वरूपगः ।
निराधारमहाव्योमसङ्कल्पैकक्रियावहः ॥ ६२ ॥
एष सादाशिवो ख साषा योगः सदाशिवपदप्रदः ।
नैर्वृत्तः स्थाविरो योगः प्रातिष्ठो मौञ्जिकेशिकः ॥ ६३ ॥
वैद्यो वैऽमलमार्गस्थः प्रशान्तोऽसौ हि शान्तिगः ।
सादाशिवो महायोगः शान्त्यतीतपदानुगः ॥ ६४ ॥
सदार्चावर्तको देहे योगिनां बहुभोगदः ।
अनुलोमविलोमेन मालेयं ज्योतिषां प्रिये ॥ ६५ ॥
अभ्यासान्निश्चलीभूतःसर्वकामान् प्रसाधयेत् ।
देहावर्तेषु सर्वेषु वक्रमध्ये तदा दृशि ॥ ६६ ॥
मनःस्थैर्यात् स्फुटं तेजो दृश्यते ह्यन्धकारगैः
अथ व्यक्तात्मको योगो योगिनां बलदो नृप ॥ ६७ ॥
असावुद्दिश्यमानस्तु समाधिः क्रियतां स्फुटः ।
यामासीर्णविनी प्रोक्ता गम्भीरावर्तसुन्दरी ॥ ६८ ॥
अव्युच्छिन्नो ध्वनिस्तस्यामव्यक्तोऽर्धार्धं सर्पिगः ।
नरों विग्रहविष्कम्भे प्रसक्तो ह्यप्रपन्नगः ॥ ६९ ॥
वहतस्तस्य हृद्गर्भात् संयोगाच्चगतत्स्वरः ।

चिञ्चिणीति समाकर्ण्या योगिनां हितचेतसा ॥ ७० ॥

कृत्वा हृत्पद्मगं चित्तं स्थिरं सर्वार्थवर्जितम् ।

यदा तं विषदं स्वस्थं योगी संशृणुते ध्वनिम् ॥ ७१ ॥

विरिञ्चिव्याप्तिमध्याप्य तदा स्वस्थाभिनन्दते ।

कण्ठाञ्जास्त्वलना देवं वीरवाक्याद्ध्यगात् स्वारात् ॥ ७२ ॥

मेधानियोगभोगाढ्यो निष्पन्नो योगविद् भवेत् ।

घण्टिकावर्त सङ्घट्टो घोषो घण्टाध्वनिस्फुटः ॥ ७३ ॥

तस्याप्यलब्धसंचित्तेर्भोगान् भुक्ते च सङ्गभाक् ।

नासिकान्तर्गतं स्पर्शं वहतस्तस्य योगवित् ॥ ७४ ॥

प्रत्यक्षं कुरुते यस्तु तस्याध्यक्षेश्वर स्थितिः ।

स्पर्शादतीतसंवित्तिमस्तित्वस्थितिलक्षितम् ॥ ७५ ॥

भास्वद्भावा वपुष्मन्तो माला निर्भ्रान्तरूपिणम् ।

ज्ञानात्मकं दृश्यत्यन्तं योगनित्कृत्यनिश्चिलम् ॥ ७६ ॥

श्रियं सादाशिवीं याति योगविद्गुणलाञ्छितम् ।

विज्ञानालयगं कृत्वा समाहृत्याचलं मनः ॥ ७७ ॥

शृणु याद्वर्णमाला वा तत्सूच्चारविदां वरम् ।

अक्षराक्षरसन्तानं स्फुटार्थं शृणुते यदा ॥ ७८ ॥

तदा वागीशतां याति योगी योगविनिर्मलः ।

स्वप्रवृत्तहृदग्रस्थो लोलीभूतः सुषुम्णया ॥ ७९ ॥

याति धूमध्वजज्वालामालालिङ्गनगोपितम् ।

आयाति च सुतेजःस्थो नातिवाह्यो नभोन्तरे ॥ ८० ॥

अधोऽर्ध गमनाद् देवमग्निश्चक्रे स्थिरोदयः ।

भवते तदाग्निसाध्यानां साधनत्वं प्रयाति हि ॥ ८१ ॥

बहित्वाधोर्ध्वगे व्योम्नि प्रलीनस्तिमितो यदा ।

तदा सुविसुवो योगो योगिनाममृतप्रदः ॥ ८२ ॥

एवमुत्तरचारोऽपि चन्द्रवक्रत्वमागतः

चन्द्रमाद्यानि कार्याणि प्रसाधयति लीलया ॥ ८३ ॥

यत् तद् भानुमतो दीप्तं चक्रं चैव स्वताश्रितम् ।

ज्योतिष्मतां श्रियं धत्ते तनिष्पन्नं स्वरूपतः ॥ ८४ ॥

मुक्ताफलशलाकेव हरिमूर्तिरिडा मता ।

मध्यन्दिननभोरत्नच्चाया ब्राह्मी च पिङ्गला ॥ ८५ ॥

रौद्री ततः सुषुम्णोक्ता व सुषुम्नोक्ता कालानलसमप्रभा ।

आसां सम्पर्कमापन्नो ध्वनिरासां स्वरूपधृक् ॥ ८६ ॥

वाहयेद् यन्त्र चक्राणि देहिनां कालयोगतः व योगः ।

कालोऽपि द्विविधः प्रोक्तो बाह्योऽध्यात्मस्तथा परः ॥ ८७ ॥

बाह्योऽसौ सौरमानेन स च तुभ्यं प्रकाशितः ।

स्वरानन्दादिरूपश्च वामे सावहितस्वरः ॥ ८८ ॥

ततः संक्रमतो मध्ये तत्राप्युक्ता स्थितिः स्थितः ।

विषुवं पात चारी च घ्राणान् वहतेति च ॥ ८९ ॥

मुहुर्धा संपरिक्रम्य वाहयेद् यंत्रसंहितम् ।

समधातुगते काये नातिपाकातिवृद्धिके ॥ ९० ॥

गतिरेषा समाख्याता प्राणस्याशेष जन्तुषु ।

तिस्रो वामायने चोक्ता संक्रान्त्यो वासरान्तरे ॥ ९१ ॥

तावत्यो दक्षिणे येन विषुवेति प्रतिष्ठिता ।

एवं सागरिकेऽप्यङ्गे सम्यग् वेद्या विपश्चिता ॥ ९२ ॥

अष्टादशैताः सङ्क्रान्त्यो योऽहोरात्रे विजानते ।

स योगी योगनिद्रालुर्योगनिद्रालुवद् भवेत् ॥ ९३ ॥

लम्बिनीताम्बरं स्पृष्ट्वा पुनस्पृशति लम्विनीम् ।

प्राण एष समाख्यातो दिनोऽयमुपरिक्रियः ॥ ९४ ॥

अधः क्रियोधिनी प्रोक्ता ह्येवं त्रिदशरूपिभिः ।

अहोरात्रैः स्मृतो मासस्तैस्त्रिंशत्प्राणकैः प्रिये ॥ ९५ ॥

संवत्सरः स्मृतः प्राणो व्योमन्तु गुणलक्षणैः ।

संवत्सरान् व्रजन्षष्टिसौरमन्तर्दिनान्तरे ॥ ९६ ॥

शतानि नव पक्षे च मासे च द्विगुणानि तु ।

यान्ति युग्माम्वरधराः शुक्राद्दीक्षा समांतरे ॥ ९७ ॥

सौराहोरात्रसंस्थानं प्राणैरेतैर्भवत्यपि ।

घटिकाध्यात्मवर्षेण यामः सप्तार्धवर्षिकः ॥ ९८ ॥

Sampath_eBooks

चतुर्याममहः प्रोक्तस्तत्समा यामिनी भवेत्।

अत्र संख्यां तन्त्रगतां शृणुपन्निलनन्दन॥ ९९॥

प्राणानामत्र नियतं सहस्राण्येकविंशतिं ः।

शतानि षट् च जानीयात् प्राणोदयविशारदैः॥ १००॥

ये प्रसक्ताः प्राणहंसे सदा तद्गतमानसाः ।

तेषां तद्गतमाख्यातमुदयं मन्त्रसंज्ञितम्॥ १०१॥

तद्योगभावनावेशाद् योगिनो मन्त्र योगिनः।

तदा भुक्तिर्मुक्तिरेव तेषां दूरस्थिता न हि॥ १०२॥

आगमादत्र संसिद्धिर्विज्ञेया सर्वलक्षणा।

सादाख्यं यावदेवात्र साधकानां सदैव हि॥ १०३॥

उर्ध्ववाहप्रयोगेन मुक्तिरत्र भवेद् ध्रुवम्।

प्राणप्रवाहमेवाषमच्छिन्नं प्रवहेत् सदा॥ १०४॥

सर्वजन्तुषु सामान्यमज्ञत्वान्न विभाव्यते।

योगिनां तत्समा संख्या तादात्म्य प्रतिपत्तितः॥ १०५॥

भुक्तिर्मुक्तिर्न सन्देहमिति सम्यग् भवन्ति हि।

द्वादशाब्दोदयं चात्र प्रविभागविचारतः॥ १०६॥

लेशानुलेशसंयोगात् प्राणभागविभाजनात्।

तथा षष्टिसमा संख्या विश्लेष्या पूर्ववत् सदा॥ १०७॥

एतत्प्राणविभागेन गणितेन विचारणात्।

Sampath_eBooks

विश्लिष्य योगिराजेन्द्र तत् संसर्पितमानसः ॥ १०८ ॥

यदातिसूक्ष्मदर्शी सौ ऐकात्म्यप्रतिपत्तितः ।

फलं जपसमायोगाद् वाह्यकालोक्तवद् भवेत् ॥ १०९ ॥

एकोच्चारेण सर्वं तत् शास्ति द्वादशभेदतः ।

एतत् प्रतिसमादिष्टमनन्ताचारचारिणाम् ॥ ११० ॥

ग्रहोपरागभेदेन फलमत्र च यत् स्थितम् ।

योगिनां पुण्यकलया तदपीह विचार्यते ॥ १११ ॥

प्राणगत्या ह्यहोरात्रमूर्द्धाधःक्रमभेदनः ।

सूक्ष्मासूक्ष्मतरो वाथ तत्रेदं प्रविचार्यते ॥ ११२ ॥

समागमेन तत्रापि मासमानं भवेत् सदा ।

पूर्वनुद्या च यत्रस्थमपरस्थं तथैव च ॥ ११३ ॥

तन्मुक्ता पञ्चदशमे अहस्तेन विचारणात् ।

तत्रापि पूर्वापरतावहोरात्रौ व्यवस्थितौ ॥ ११४ ॥

कासश्वासनियोगेन ऋणता धनतात्र हि ।

अत्रचारेण चात्रस्थः कृष्णपक्षः सुभावितः ॥ ११५ ॥

अभिचारु निरुंचारु कर्म सिध्यति साधके ।

त्रुटिप्रान्ते शक्तिरेव प्राणाख्ये विशते यदा ॥ ११६ ॥

अमावास्येति सा ज्ञेया कृष्णपक्षांतिभाग् भवेत् ।

तन्मधोर्ध्वविभागेन तुटयर्द्धं यद् व्यवस्थितम् ॥ ११७ ॥

Sampath_eBooks

अमावास्याथ प्रतिपत् स्पर्शिनी सन्धिरेव सा ।
तिथिच्चेदान्तरा तत्र सूर्यग्रहणमेव हि ॥ ११८ ॥
तस्मिन् माने तथा चन्द्रः सूर्यबिम्बान्तरे भवेत् ।
सुधा सूतेर्लुलम्यत्वाद्राहुरन्यत्र सर्वदा ॥ ११९ ॥
स्वर्भानुभानुचन्द्राणां यदा चैकत्र संस्थितिः ।
तदा ग्रहोपरागं तन्महदित्युपचर्यते ॥ १२० ॥
पुण्योदयमहोरात्रं योगिनामुपवर्णितम् ।
यत् सूक्ष्मदर्शिनः शूरास्तन्निष्ठा योगिनः सदा ॥ १२१ ॥
ते विन्दन्ति हितं कालं जपयोगप्रसिद्धिदम् ।
अत्राचिरेण कालेन सिद्धिमायाति सत्वरम् ॥ १२२ ॥
पूर्वार्द्धार्द्ध त्रुटेरेवं त्यक्ता शक्तिर्यदा विशेत् ।
स च शुक्लोदयः प्रोक्तः शक्त्यधोगामिनी यदा ॥ १२३ ॥
अत्र सर्वाः सिद्धयः स्युः साधके योगतत्परे ।
यदा पक्षद्वयत्यागी धर्माधर्मविवर्जितः ॥ १२४ ॥
मृतशोकविनिर्मुक्ता तदा मोक्षस्य योगदा ।
वाहावाहे क्षीणकालैर्काले ह्यकलतां गते ॥ १२५ ॥
तदा मुक्तो मोचयेच्च योगी नास्त्यत्र संशयः ।
ब्रह्मक्षत्रवधिवृत्ते योगखड्गधरो हि यः ॥ १२६ ॥
वलाते योगिराट् चोक्तः सर्वसिद्ध्यारुहे नृपः ।

जयद्रथ उवाच ।

जय योगीन्द्र नमित प्रधानवर पूरुष ॥ १२७

कामान्धक महाकाल दर्पविध्वंसनोद्यत ।

जय दैत्येन्द्रदर्पौघनिपातन महोग्रक ॥ १२८ ॥

त्रैलोक्य सा चण्डार्चिया पिम्बनद्धानल ख पेन्दनदवानल ।

जयाबद्ध जटाजूटसुधासूतिकलेवर ॥ १२९ ॥

फणीन्द्रहारकल्पान्तपावकारिमूर्त्तये ।

जयाखिलसुरारातिसुरघट्टनघोरदृक् ॥ १३० ॥

कालकूटस्तद्विलापिस्तद्धासाङ्कितकन्धरः ।

जय पूष्णोर्दन्तनाश जयेन्द्रभुजजृम्भन ॥ १३१ ॥

जय डविडदक्षघ्न बालरूप जयेश्वर ।

जय त्रैलोक्यनाथाय मौलिरञ्जितशेखर ॥ १३२ ॥

ब्रह्मक्षत्र वधे नाथ नोपायं विद्म साम्प्रतम् ।

येनोपायेन नासिद्ध्येत् प्रभवामि तथा वद ॥ १३३ ॥

भक्तस्यार्तस्य शुश्रूषोः श्रद्धालोः परमेश्वरः ।

इति निशम्य जयद्रथभाषितं सकरुणेन शिवेन विचारितम् ॥ १३४ ॥

शृणु नृपेश्वर वच्मि तदाखिलं प्रतिजगच्च सुरेश्वर एव हि ।

श्रीभैरव उवाच ।

उपायान् विविधानत्र वक्ष्यामि तव साम्प्रतम् ॥ १३५ ॥

Sampath_eBooks

योगावसर एवात्र संस्थितस्तं तथा शृणु ।

नाभेरधस्थात् तत्रस्थः कन्दः कन्दाभ एव च ॥ १३६ ॥

भासुरात् स च ईशोऽसौ गोपुरौ वाक्पुरस्सरः ।

तत्र नाडीसमूहोऽसौ निबद्धः संस्थितः सदा ॥ १३७ ॥

तिर्यगूर्ध्वमधस्ताभिर्जगद्व्याप्तं समन्ततः ।

तत्र स्थितं यथा पर्णे पालाशं सर्वतन्तुभिः ॥ १३८ ॥

तासामेका प्रधाना स्यात् सुषुम्णा नाम नामतः ।

तद्वद् द्वे पिङ्गले देव दश चानुभवन्ति हि ॥ १३९ ॥

चक्रवत्तासु संस्थानं कन्दे सर्वासु संस्थितम् ।

ताभ्यस्तत् पुनरेवान्या द्वासप्ततिसहस्त्रशः ॥ १४० ॥

पुनरेव विनिष्क्रान्तास्तिस्त्रः कोट्योऽर्धमिश्रिताः ।

आसु वायुः प्रवहति सप्राणमय एव हि ॥ १४१ ॥

भेदाद्भिन्नत्वमायाति बहुधा पन्निलात्मज ।

आसां प्रधानभूतानां नाडीनां वायुभिः सह ॥ १४२ ॥

शृणु संज्ञाप्रकरणं यथा च नृपसत्तम ।

सुषुम्णेडापिङ्गलाख्यास्तिस्त्रस्तासां निकेतनम् ॥ १४३ ॥

मध्ये वामे दक्षिणे च शुक्राधारेषु मर्मसु ।

पूर्वपश्चिमदिग्भागे चतुर्दन्ता पदे परे ॥ १४४ ॥

प्राणो जीवकलायुक्तः आसु नित्यं चरत्ययम् ।

गान्धारी गजजिह्वाख्या यशा पूषा ह्यलम्बुसा ॥ १४५ ॥

कुहू च शङ्खिनी नाम पूर्वयुक्ता दश स्मृताः ।

आसां ये वायवस्तेऽपि शृणु पन्निलनन्दन ॥ १४६ ॥

प्राणापानसमानाख्या उदानव्यानसंज्ञकाः ।

नागःकूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥ १४७ ॥

सामुदायिकमेतत्तद्रूपं नाडीषु वायुषु ।

परत्वे त्रितयं पूर्वं संस्थितं सर्वतः सदा ॥ १४८ ॥

हृन्मध्यगं सदा ख्यातं बिन्दुनादात्मकं प्रिये ।

अत्र चारविभागज्ञा योगिनो योगवित्तमाः ॥ १४९ ॥

ते प्राप्नुवन्ति नियतं वस्तत्क्षत्रवधान्तरम् ।

महाविनोदसंस्थानचक्रपीडनयोगतः ॥ १५० ॥

क्रमव्युत्क्रमसंयोगात् कन्दचक्रप्रवेशनम् ।

तत्प्रवेशावतिष्ठेत व्याप्तिरेकान्ततो द्विधा ॥ १५१ ॥

त्रिधा चतुर्धा दशधा नाडीवायुप्रभेदतः ।

द्वासप्ततिसहस्रान्तां यावलोमावशानुगम् ॥ १५२ ॥

महाव्याप्तिप्रकारोऽयं प्रभुशक्तिविवेकतः ।

तत्प्रवेशात् समेभ्येति परमानन्द लक्षणम् ॥ १५३ ॥

ब्रह्मक्षत्रवधो येन भवत्येवास्य योगिनः ।

मत्तगन्धं मन्दचक्रं शूलनादो निपीडयेत् ॥ १५४ ॥

भ्रमद्विभ्रमयोगेन घूर्म्मिरस्य तदा भवेत्।
ज्वलन्ती चापतत् परमा जम्भानादगतोऽत्र च ॥ १५५ ॥
पश्चाद्विकासमायाति ब्रह्मक्षत्रवधात्मकम्।
ब्रह्मक्षत्रवधे वृत्ते परमा जायते दशा ॥ १५६ ॥
यामाप्येव न शोचन्ति साधकाः सिद्धिकांक्षिणः।
पुरप्रवेशमात्रस्थःकुरुते साधकेश्वरः ॥ १५७ ॥
आवेशस्थो सरोमाञ्चो तत्रस्थः कुरुते सदा।
लीलया साधकेन्द्रोऽसौ वेधं षोढा करोति हि ॥ १५८ ॥
घट्टनं सर्वजगतां प्रकरोति यथेच्छया।
अतिदूराद् वेधमुग्रं मुद्रास्फोटं करोत्यसौ ॥ १५९ ॥
अनग्निज्वलनं वृक्षे स्याल्लम्भनमिवाद्भुतम्।
खलनिर्दशहस्तां तात्र्या यामात् सप्तमाभिधान् ॥ १६० ॥
पिण्डसिद्धिर्भवत्यस्य साधकस्य न संशयः।
चक्रदर्दुरकाण्डानां पारावतखगामिनाम् ॥ १६१ ॥
प्लुतीर्विचित्राः कुरुते महाहास्यं शिवारुतम्।
कालत्रयज्ञता सम्यक् त्रैलोक्यवशकारिता ॥ १६२ ॥
अणिमाद्यष्टकं सर्वं मन्त्रप्राप्तिर्भविष्यति ।
मन्त्रवीर्यविकासोऽत्र ध्वन्याकर्णनमद्भुतम् ॥ १६३ ॥
मन्त्रपाशान्तरज्ञोत्था भासश्चित्राः सदैव हि।

आलोकयति वीरेन्द्रः समन्तात् तद्गताशयः ॥ १६४ ॥

अनुक्तमपि यच्चान्यत् तदत्र प्रविचारितम् ।

गतानुगतयोगाद् वा सर्वनाडीगमस्फुटम् ॥ १६५ ॥

तद्गमादेव सर्वत्र महदानन्दवृत्तिमत् ।

समस्थायी समन्तेजः समन्तान्मतिभाग्भवेत् ॥ १६६ ॥

व्युत्थाने वीरराज्ञी यत् समाधिस्थो न संशयः ।

अस्यैवान्यत्समावायो नियोगक्ष पणात्मकः ॥ १६७ ॥

वातावर्त्तप्रयोगेन ब्रह्मघात्यविकल्पतः ।

तमाक्षिप्यात्र कर्मान्तः क्षत्रियस्य वधो भवेत् ॥ १६८ ॥

तद्वधादमलं सर्वमसकृत् प्रतिपद्यते ।

तस्मादमलसंयोगाद् व्यक्तिर्वैभवरूपिणा ॥ १६९ ॥

समुदेति रुगित्येव सर्वा वा युक्तिलक्षणा ।

सन्दर्शप्रविभागोक्त्या ह्यनुषङ्गफलोद्गमः ॥ १७० ॥

तदुद्गमात् सिद्धयोऽन्याः प्रभवन्ति बहिर्नृप ।

यस्यान्तरगतत्वेन कलामाली ह्यविग्रहः ॥ १७१ ॥

भवत्यवश्यं सर्वत्र नाभिचारविभेदगः ।

तत्प्रचारविरोधेन कलनात्मककल्पना ॥ १७२ ॥

विनिरुद्धा भवेत् सर्वं तदा कालोऽप्यकालता ।

जायते तदभावाद् वा सर्वसत्त्वं सकृत्रिकम् ॥ १७३ ॥

Sampath_eBooks

तदवाप्य महाभाग भवेत् कालान्तकः स्वयम् ।

मत्तगन्धप्रयोगेण चक्रावा प्रविदारिणा ॥ १७४ ॥

विदार्य ग्रन्थयः सर्वा ब्रह्मक्षत्रवधे रतः ।

निपात्य पातगं क्षत्रमन्तरस्थं द्विजं नृप ॥ १७५ ॥

तत्क्रम ं प्रान्तविश्रामात् तद् वधः प्रभवेत् तदा ।

तद्भवप्रान्तविश्रामा द्वितीयात् पन्निलात्मज ॥१७६ ॥

सदारोहावरोहाद् वागतिचारनिरोधतः ।

चारचारगती ध्वन्ये ऋक्षराशिविभागतः ॥ १७७ ॥

त्रुटित्रुटयन्तरारूढो मासवासरभेदतः ।

सन्धिसन्ध्यंतरालज्ञो कालचारगतीश्वरः ॥ १७८ ॥

तत्तद्विश्रान्तियोगाद् वा ब्रह्मक्षत्रवधः स्मृतः ।

रूढक्रमेण विहतो येन तस्याज्ञता भवेत् ॥ १७९ ॥

ब्रह्मक्षत्रा महाभाग तस्य सिद्धिः करे स्थिता ।

गतिचारनिरोधेन निहतो येन तस्य हि ॥ १८० ॥

पुरप्रवेशमावेशं सम्यक् सिद्धिमुपैति हि ।

चारगत्या येन नृपो निहतो यो न साम्प्रतम् ॥ १८१ ॥

परोक्षवेधसः सिद्धिस्तस्य सिद्ध्यत्यसंशाया ।

चारगत्या ब्रह्मक्षत्रौ निहतौ येन तस्य हि ॥ १८२ ॥

कालस्य प्रभुता सम्यक् तस्य सम्पद्यते नृप ।

रक्षाभेदक्रमेणैव येनैतौ विनिपातितौ ॥ १८३ ॥

उडुचक्रेश्वरत्वं स्यात् पुरक्षोभो महान् भवेत्।

लग्नक्रमविभागेन करणेन्दुबलेन च ॥ १८४ ॥

पातितौ येन तस्यापि भवेद् दूरावलोकनम् ।

मरणं कालचक्रस्य प्रभूतं नास्ति संशयः ॥ १८५ ॥

त्रुटिस्त्रुटयन्तरेणैव येन सम्यङ्निपातितौ ।

तस्य मन्त्र प्रसिद्धिः स्याद् वाक्पतित्वं प्रवर्तते ॥ १८६ ॥

सर्वशास्त्रार्थवेत्तृत्वं विच्छिन्नज्ञानमेव च ।

प्रस्फुरद् विमलं ज्ञानं विभूत्यास्य स्फुटं भवेत् ॥ १८७ ॥

मासायामनियोगेन करणक्रमयोगतः ।

ब्रह्मक्षत्रौ हतौ येन तस्य सिद्धिः करे स्थिता ॥ १८८ ॥

वृक्षस्यालम्भनं वह्नेर्ज्वलनं तद्धि योगजम् ।

असङ्गफलं प्राप्य षट्मासात् सिद्धिरेव हि ॥१८९॥

परेणैव हतो येन ब्रह्मक्षत्रौ नृपात्मज ।

षष्ट्या द्वादशभेदेन तस्य तद्वत् स्वरोदयम् ॥ १९० ॥

विचारितं बाह्यकाले तत् तस्य स्यात् फलप्रदम् ।

परदेहप्रवेशादि वृक्षालंभनपूर्वकम् ॥ १९१ ॥

अनग्निज्वलनं वेधं दुरालोकोऽज्ञतादयः ।

तदा सिद्ध्यन्त्यनायासाद् ब्रह्मक्षत्रवधैषिणः ॥ १९२ ॥

Sampath_eBooks

सत्त्वयोगविधानेन करणानुक्रमेण हि ।

द्विजहा नृपहा यस्मात् तस्य सिद्धिः प्रवर्तते ॥ १९३ ॥

फलानुकूल्याच्चक्रस्य पूर्वोक्तस्योदयेन हि ।

चञ्चलत्वादस्थिरत्वात् तन्निरोधः स्फुटं यदा ॥ १९४ ॥

तदा पूर्वोक्तयोगेन सिद्धयः संव्यवस्थिताः ।

प्राणकालप्रयोगोत्थप्राणोच्चारगतिः सदा ॥ १९५ ॥

संप्रवृत्त एवास्य साधकस्य महात्मनः ।

सन्ध्यन्तरालसंयोगाद् ब्रह्मक्षत्रौ हतौ यदि ॥ १९६ ॥

वाडवेन्द्रप्रयोगेण पूर्वोक्तक्रमयोगतः ।

तदा परोक्ष एवास्य सिद्ध्यन्त्येवं न संशयः ॥ १९७ ॥

एकस्माद् योजनात् तावद् दशयोजनमन्तरम् ।

तत्रस्थो योजनः सो वै वेधयेन्नात्र संशयः ॥ १९८ ॥

वृक्षस्यालंभनं सम्यग् दर्शनादेव सिद्ध्यति ।

अनग्निर्ज्वलनं सर्वं प्रकरोति यदृच्छया ॥ १९९ ॥

दूराकर्षणमेवास्य योजनानां शतैरपि ।

सिद्ध्यत्येव न संदेहो नरेन्द्रादिविधेयता ॥ २०० ॥

भवत्ययत्नतोभ्यासान्नित्यमेव जयद्रथ ।

अणिमाद्यष्टकं प्राप्य मोदते साधकेश्वरः ॥ २०१ ॥

कालचक्रक्रमेणैव करणाभ्यासयोगतः ।

तत्र देशादिबन्धेन रात्रिसञ्चारयोगतः ॥ २०२ ॥

ब्रह्मक्षत्रौ यदा मन्त्री हन्ति वीरेन्द्रयोगतः ।तत्र देशादिबन्धेन

रात्रिसञ्चारयोगतः ॥ २०३ ॥

इडादिरूपसंयोगाच्चक्रभेदोपभेदतः या रूढिरभितो जायेत् साधकस्य

प्रसर्पतः ॥ २०४ ॥

तया पूर्वोक्तमखिलं योगिनोऽस्य भविष्यति ।पुनरप्यत्र या वृत्त्या

निबोधगदतो मम ॥ २०५ ॥

येन सम्यक् प्रजायेत ब्रह्मक्षत्रवधोत्तमम् ।

शब्दवृत्त्यनुसन्धानाद् दशधा सा निगद्यते ॥ २०६ ॥

चिञ्चिनी वीरवान् घोषरावस्वरविशेषणैः ।स्फोटझाङ्कारनामान्यः संयोगः

साकृतिः स्वनः ॥ २०७ ॥

एतास्ता व्यक्तयो ज्ञेया शब्दस्यैकत्रसंस्थिताः ।

अत्र चैकैकशो व्यक्तो यदा रूढिः प्रजायते ॥ २०८ ॥

साधकेन्द्रस्य नियतं मनोमन्तव्यरूहितः ।

तल्लयादनुपाल्येव तल्लयस्तस्य धीमतः ॥ २०९ ॥

ब्रह्मणः क्षत्रियाणां स्याद् वध एव न संशयः ।

स्पर्शरूढ्या व्ययस्यैवमास्तां शृणु नृपात्मज ॥ २१० ॥

बाह्याभ्यन्तरभेदेन बाह्याश्च सुखदुःखजाः ।

आन्तरो द्विप्रकारः स्यादालेख्यः करणोद्गतः ॥ २११ ॥

Sampath_eBooks

कन्दचक्रक्रमोद्भूतः परः स्याच्च द्वितीयकः।

तत्र सम्यग् यया रूढस्तदा साधकसत्तमः॥ २१२॥

ब्रह्मक्षत्रौ विनश्येते साधकस्य न संशयः।

रूपभेदेन यो बिन्दुश्चतुर्धा वर्णभेदतः॥ २१३॥

दशधा वा सवर्णात्मा तदाभ्यासेन सर्वदा।

ब्रह्मक्षत्रवधो ं जायेत् तद्वच्चात्र स योगतः॥ २१४॥

गन्धोद्विरूप एवासौ तदभ्यासात्तु तत्क्षयः।

ब्रह्मक्षत्रवधं जायेत्तद्वच्चात्र स योगतः॥ २१५॥

गन्धो द्विरूप एवासौ तदभ्यासात्तु तत्क्षयः।

ब्रह्मक्षत्रवधस्त्वेवं दिनरात्रिविभागजः॥ २१६॥

समं दिनं योगिनोऽस्य तत्समा यामिनी भवेत्।

एवं प्राणोदयात् कालोऽप्युक्तोऽसौ योगिनां प्रिये॥ २१७॥

तथा वै वञ्चते तद्वत् सम्प्रदायं ब्रवीमिते।

नासाग्रे मूर्ध्नि लक्ष्मे वा संहृत्यैकाग्रगं मनः॥ २१८॥

ऊर्ध्वाधः प्रवहत्त्यक्तो यावतस्त्यजतेऽनिलम्।

तावत् कालविभागन्तु योगी वञ्चयते स्फुटम्॥ २१९॥

तुट्याद्यं प्राक् समुद्दिष्टं समन्तं मुनिनन्दनः।

समावासरसङ्ख्याता लक्षमालां विकर्षयेत्॥ २२०॥

उक्तोपदेशभेदोर्ध्वे त्यक्तप्राणस्तु योगवित्।

प्राणोत्कलिकया हीना समासाद्यन्तपालिका ॥ २२१ ॥

घटिकायुर्वृद्धिकरी योगिनां कर्षिता प्रिये ।एवमाधिक्यनैभृत्याद् बलस्य बलवर्धनम् ॥ २२२ ॥

प्राणिनामायुराद्यस्य योगाभ्यासवशाद् भवेत् ।

अथाचलाक्षमालायां चित्तस्थैर्यगतो मुनिः ॥ २२३ ॥

निराधारान्तरंगस्तु शक्तियोगं समभ्यसेत् ।

तेनास्याकाशगामित्वमचिरात् सम्प्रजायते ॥ २२४ ॥

अथ द्वयोस्तु यद् रूपं चित्तशक्त्या विभावयेत् ।

तत्तत् तन्मयतत्वस्य चित्तं यत् समुपैति हि ॥ २२५ ॥

पश्याधः कर्मजातस्य साध्यस्यानंतरूपिणः ।

मनः साधनमुद्दिष्टं साधर्मयाद् धर्मभावगम् ॥ २२६ ॥

दीपनं वायुवह्नीनां संयोगः कार्यतः स्मृतः ।

निवृत्तौ चाप्युपायोगः शंसितो योगवित्तमैः ॥ २२७ ॥

स्वकार्यं नान्यचित्तेन वान्ये नैवोदकात्मना ।

समत्वागतचित्तेन चलाचलगुणं न हि ॥ २२८ ॥

चलं चाचलभावेन साधनीयं विपश्चिता ।

मित्रारिसामभेदन्तु ज्ञात्वावरण संस्थितम् ॥ २२९ ॥

कर्मसाधनयुक्तानां नान्यथा याति पार्वति ।

अथ गुप्ततरं योगं शृणु भैरवभाषितम् ॥ २३० ॥

Sampath_eBooks

देहेऽनुभवगम्यन्तु वीरवीर्यसमुद्भवम्।

सरोजासनमारूढो योगी स्वस्तिकमेव वा॥ २३१॥

आतानितशिरोरस्था मूर्द्धिर्न निक्षिप्तसंभ्रमः ।

तुङ्गीकृतगलोदीर्णविवृताधरपल्लवः॥ २३२॥

ओंकारमुच्चरेदूर्ध्वं न च तत्शव्दरूपिणं ।

तस्य वृत्तिं समालम्ब्य नभस्वन्तं महौघगम्॥ २३३॥

खद्योतकनिभाकारैः खचितं परमाणुभिः।

समाहितमना योगी निर्गच्चन्तं निरालयम्॥ २३४॥

व्योम्ना त्रिकूटसंस्थानं स्थायिनो ब्रह्मरूपिणः।

तत्स्पर्शं पिपीलिकावदारम्भे भाव्य योगवित्॥ २३५॥

ततः कण्टकवद्द् भेदो वेदना च तदात्मिका।

त्रुट्यद्द् रश्मिवदस्तुल्यं ततो वृत्कालसम्पदम्॥ २३६॥

ततोऽम्वुरुहरागोच्चशिखापुञ्जसमच्चविम्।

पूरिताकाशमार्गन्तु प्रवृद्धं दृश्यतेऽमलम्॥ २३७॥

तस्मिम्ल्लीनस्तु तद्योगी शृणु ते पश्यतेऽथवा।

कथितं योगिनां तद्धि निर्व्याजं तादृशं भवेत्॥ २३८॥

समतागतचित्तत्वात् तत्स्वरूपमुपागतः।

प्रयात्ययं गुणं धाम धाम्नां निधिरनामयम्॥ २३९॥

अथ तद्द् द्रुतमध्यस्थविशुद्धे त्रैकटे तु वै।

Sampath_eBooks

निर्गत्य लीयते व्योम्नि तीव्रोद्धातबहिष्क्रिया ॥ २४० ॥

न च प्रच्यवते तस्मादाकर्षाकारितेऽनघ ।

योगोऽयममृतात्मा तु योगिनाममृतप्रदः ॥ २४१ ॥

अथ द्वन्द्वेन कं मूर्ध्नि कृत्वा निश्चलमादरात् ।

आयामापानसङ्कोचः कार्यो देहविकम्पगः ॥ २४२ ॥

क्रियमाणे भृशं तस्मिन् यच्चन्दमुपजायते ।

तत् तावदुपलभ्यन्तु यावत् स्यादुषानागमः ॥ २४३ ॥

प्राग्लवे बिन्दुसंयोगः स्वरयोगो द्वितीयके

तृतीये बालसंस्पृष्टो बलवद् विषयात्मवान् ॥ २४४ ॥

प्रत्यङ्गं वीक्षते योगी साध्यानि भवगानि तु ।

योगानां जायन्ते परिकीर्तितः ॥ २४५ ॥

भोगमुख्यमिमं प्राप्य राजनिर्वाणभाग्भवेत् ।

देहेऽनुभवरूपन्तु सम्प्रदायैकसाधनम् ॥ २४६ ॥

भ्रमन्तं चिन्तयेच्चित्तं पादाङ्गुष्ठाग्रयोर्द्वयोः ।

तत्र कान्तमणिप्रख्यं गोलकं दृष्टनष्टकम् ॥ २४७ ॥

कृत्वाग्रं चित्तसंरोधात् तस्मिन् तन्मयतां गतः ।

निवृत्तेरधिकारन्तु योगी भुङ्क्ते स्वलीलया ॥ २४८ ॥

ध्वजाग्रस्थायिनी ह्येवं प्रतिष्ठावृद्धिमर्चति ।

मन्दिरावर्त्तगोविन्दसिद्धो वेद्यं पदं ददेत् ॥ २४९ ॥

Sampath_eBooks

ध्रुवमन्तर्गतोऽगाधः साधयेच्चान्तिगोचरम्।
यत् तद्धि परमं धाम कन्दलत्रयवन्धकम्॥ २५०॥
श्वेतपत्रसुपत्राङ्गं चायाबिन्दुकदम्बकम्।
प्रस्फुरन्तं समन्तात् तु तस्मिन् वीक्ष्य स्थिरात्मवान् ॥ २५१॥
चित्तशक्त्यैकभावत्वात् पिण्डिभूतं तु कुम्भवत्।
तन्निष्पन्नं यदा सम्यक् तदा तद् रूपतां गतः॥ २५२॥
शान्त्यतीतात्मकाभोगकालसङ्कर्षणीसमः।
योगी सर्वगुणं भुक्त्वा योग्यानामयमिच्चया॥ २५३॥
षोढा शिवात्मकाद्योगात् को न याति परं पदम्।
भुक्त्वा परापरां लक्ष्मीमसमानं त्यजेच्चिरं ॥ २५४॥
विशुद्धां सुस्थवीर्यां च सदानन्दां सदोदयाम्।
प्राणायामादिकैरङ्गैस्स्थिरः स्वान्तात्मवान् गुणी ः॥ २५५॥
वाचकोच्चारसंसारचितमेवास्य रूपकः।
सर्वावयवसंपूर्णमनुलोमविलोमतः॥ २५६॥
भावयेच्चित्तशक्त्या तु शिववीर्यैकतन्मयः।
तत्तन्मयत्वमापन्नस्तत्स्वरूपमवाप्नुयात्॥ २५७॥
द्विरेफोत्तुङ्गमुचाभजटामण्डलमुत्तमम्।
तापिच्च पुष्पविस्तारि चायापल्लवविस्तरम्॥ २५८॥
रत्नालङ्कृतभोगाढ्य भोगसंयमिताश्रयम्।

भावयेच्चांशुसंघट्टं हृतवेतालसञ्चरम् ॥ २५९

समन्ताच्चादितापाङ्गशङ्खचन्द्रकलामलम् ।

मुकुटं भावयित्वा तु ललाटं भावयेत् सुधी ः॥ २६० ॥

तरूरपाच्चिखातोपैर्निर्गतं गगनाश्रयम् ।

चक्षुरत्र विभाव्योच्चैरुपेतं भूतले सिते ॥ २६१ ॥

ज्यासज्जुकार्मुकाभिख्ये ततश्चाम्बुजवर्चसम् ।

चक्षुषी पक्षशोभाढये चिन्तयेन्मनसा हितम् ॥ २६२ ॥

प्रलम्बश्रवणाधन्मात्रालङ्करणान्वितम् ।

भास्वद्विकाससद्रूपां नासिकां चिन्तयेत् ततः ॥ २६३ ॥

प्रस्फुरद्दर्पणाभासिकपोलोष्ठौ समौ शुभौ ।न्यग्रोधोदर्कसंकाशमुन्नताधरप

ल्लवम् ॥ २६४ ॥

इन्द्रनीलरुगुद्धाहि द्विजपंक्तिविराजितम् ।अट्ट

हासोत्थचायाभपरिवेशावगूहितम् ॥ २६५ ॥

मोहनं शोभनायाङ्गं नतो वक्रं विचिन्तयेत् ।शशिकान्तरुगूर्ध्वन्तु

माघोनं किंशुकश्रियम् ॥ २६६ ॥

शृङ्गालीवलयाभासशिरोरुहदिगाश्रितम् ।

विशुद्धालकलावण्यच्चायालोकरुगागमम् ॥ २६७

अपांपतौ स्फुटाटोपसफाटिकोल्लासितच्चविम् ।

ततोऽम्भोजोज्ज्वलग्रीवासमानं कन्धराश्रयम् ॥ २६८ ॥

Sampath_eBooks

सार्धमम्बुवणिव्रातसरोमण्डलमण्डितम् ।
सुश्लक्ष्णमणिहारोरुसूत्रान्तरम्बिलम्बितम् ॥ २६९ ॥
भावयेच्चित्तशक्त्या तु बहिरर्धविमुक्तया ।
मृदुवृत्तोन्नतौ तस्या दशदोर्दण्डलालसौ ॥ २७० ॥
दोष्णश्चापि सदा ध्येया ः बहुमार्गेण सङ्गता ।
विस्तीर्णशाखाकलिताश्चन्दनानां द्रुमा इव ॥ २७१ ॥
नरास्थिकटकाटोपसुभ्रूटकमण्डिता ः ।
कलाचितास्तु सर्वासु दोर्लतासुविचिन्तयेत् ॥ २७२ ॥
नागपाशकृतां नागैः प्रस्फुरद्दन्तभोगिभिः ।
बाहुमध्येषु दीप्यन्तां स्वप्रभास्वप्रकाशिकाम् ॥ २७३ ॥
उद्यद्विमिश्रतां चिंचभासि नक्तगणानिव ।
चिन्तयित्वा कराग्रस्थं चिन्तयेद् वेदिमण्डलम् ॥ २७४ ॥
त्रिकण्टकमण्डलं कुब्जं तमालमणिकुट्टिके ।
त्रिशृङ्गं मार्गणं शब्दं वरदं मध्यगोचरे ॥ २७५ ॥
कार्मुकं भयमम्भोजं शिरः पाशं च घण्टिका ।
खट्वाङ्गं मुद्गरं चर्म दर्पणं चापि मध्यतः ॥ २७६ ॥
शिखिनावुन्नतौ ध्येयौ न्यस्तावेशप्रियान्वितौ ।
त्रिवलीराजि जठरं सुकुक्षिं च विभावयेत् ॥ २७७ ॥
उरोचिसरसंस्थाने प्रेङ्खत् पञ्चवटः शुभैः ।

शिरोजन्मजटः सोहि समालोच्यस्तु योगिना ॥ २७८ ॥

स्रवद्रक्तकणाटोपवैयाघ्रमजिनं नवम् ।

निबद्धं तन्महानागैर्भोगरत्नप्रभोज्ज्वलैः ॥ २७९ ॥

विस्तीर्णजघनस्थानस्थगिताशेषगुह्यकम् ।

चरणाक्रान्तकालञ्च चिन्तनीयं विपश्चिता ॥ २८० ॥

सतम्भोरुमग्रसंस्थानादूयुग्मं सुजङ्घकम् ।

चिन्तयित्वा तु गुल्फस्थं भौजङ्घं नूपुरद्वयम् ॥ २८१ ॥

शिरोमणिशिखाजातदीपोद्योतनपद्युगम् ।

विकोशाम्बुरुहप्रख्यं पादयुग्मं विचिन्तयेत् ॥ २८२ ॥

गोनासान्तरिताभिस्तु रञ्जिताभिर्द्विजिह्वकैः ।

मुद्रिकाभिः कृताभोगकरपादधृताङ्गुलि ॥ २८३ ॥

रुचिरैर्मणिबद्धांश्च भावयेद् भावितात्मधीः ।

सर्वाङ्गपिङ्गलं भाव्यं मणिं सकलसम्भवम् ॥ २८४ ॥

खोलोरगमयी रम्या भावनीया शिरस्थिता ।

सर्वावयवसंपूर्णां कालसङ्कर्षणीमुमाम् ॥ २८५ ॥

स्वचितरचिताकारां चिन्तयेद् वा स योगवित् ।

ज्येष्ठाग्राद् यावन् मूर्द्धान्तमूर्ध्वपादावसानिकम् ॥ २८६ ॥

प्रस्फुरावयवद्भाव्यं रूपकं रूपिणां प्रिये ।

तत् तत् तन्मयतां प्राप्य यस्या योगविशारदे ॥ २८७ ॥

Sampath_eBooks

तत्प्रागेवोपदिष्टन्तु शृणु वाचकध्यानजम् ।
फलं सर्वात्मकं देवि किन्तु भूभृद्धितैषिणः ॥ २८८ ॥
पर्यङ्कासनमालम्ब्य चेतोऽग्राग्रे नियामयेत् ।
आदावारभ्य चैकैकं वर्णं दिव्याङ्गसंस्थितम् ॥ २८९ ॥
हविः स्फुलिङ्गसंकाशमधरोष्ठान्तशालिनि ।
मुखाग्रे प्रविशन्तं तु मन्दसञ्चारसञ्चरम् ॥ २९० ॥
स्वमात्रा मण्डलापूर्णं लीयन्तं नाभिगह्वरे ।
अनन्तार्णविरामन्तु दृष्ट्वा च क्रमशः प्रिये ॥ २९१ ॥
मुहुस्तेनैव मार्गेण ह्यूर्ध्वप्राणावलम्बिनि ।
खद्योतकगणं दीप्तं निर्गच्चन्तं चलादिव ॥ २९२ ॥
लीयन्तं शक्तिपद्मे तु वीक्ष्य तद्योगचक्षुषा ।
यदा साक्षरपङ्क्तिस्तु स्थिरा प्रत्यक्षतां गता ॥ २९३ ॥
तदा पदक्षरैः किञ्चित् साध्यते सिद्धिलक्षणम् ।
तदायत्तं भवेत्तद्धि विश्वेऽस्मिन् भूरिविक्रमम् ॥ २९४ ॥
वाचो वाचस्पतेर्यद्वदप्रमेयार्थविस्तराः ।
नावधारयितुं शक्त्या मादृशैरपि गौतमि ॥ २९५ ॥
काल्याः सत्यो द्विरूपाश्च प्राणिनां हितकारिकाः ।
शास्त्रद्वारेण जायन्ते गिरोऽस्या गिरिसम्भवे ॥ २९६ ॥
यद्यद्वर्णाश्रितो योगी कार्यजातमुपक्रमेत् ।

तत्तद् विचित्रभेदेन तस्य तन्मयतां व्रजेत् ॥ २९७ ॥

सम्मोहे भैरवे भीतेऽसौवर्णाद्द् वाप्तसन्ततौ ।

यत् किञ्चित् कर्मरूपस्य योगिनो भोगसङ्गमः ॥ २९८ ॥

भवते देवता यासां स्वाधिकारपदानुगः ।

विरक्तो भोगयोगस्य यदा योगी ख योगो सुरेश्वरि ॥ २९९ ॥

तदा याति परां काष्ठां योगत्वान्न निवर्तते ।

अथवा प्रक्रिया दृष्टाः प्रमेयं प्रविचिन्तितम् ॥ ३०० ॥

योगिनान्तु कलाध्यानं तमेवार्थं प्रसाधयेत् ।

तत्वध्यानमतो वक्ष्ये योगिभ्यो योगभोगदम् ॥ ३०१ ॥

निवृत्त्यादिस्वरूपाणि पृथिव्यादीनि चिन्तयेत् ।

धरादिरूपलावण्यप्रथितानि तथा नृप ॥ ३०२ ॥

गन्धतन्मात्रकादीनि त्मात्रकादीनि तन्मात्राणि तु भावयेत् ।

प्रसन्नं विमलाक्षन्तु कुङ्कुमोदकसन्निभम् ॥ ३०३ ॥

स्त्रगिष्ठं शोचमानन्तु रागेभ्योमत्सथ श्रियम् ।

शवप्रजेशवपुषं चिन्तयेत् सुखसिद्धये ॥ ३०४ ॥

नीलाम्भोजजच्चविध्येयो वायुर्मित्रस्वरूपगः ।

महेन्द्रापरजाकारौ पादौ पीनेन्दुरूपकौ ॥ ३०५ ॥

ध्यातव्यं साधकेन्द्रेण तत्वध्यानाहितात्मनः ।

वाक् वागीश्वरीरूपा प्रतिष्ठाकारधर्मिणी ॥ ३०६ ॥

Sampath_eBooks

भावनीया स्थिताक्षेण वाक्क्रियार्थप्रसिद्धये ।
श्रोत्रं ककुन्मयं भाव्यं तच्च लोकेशरूपकम् ॥ ३०७ ॥
मातरि स्वस्वरूपा ं तु वैजयन्ति गणाकुला ।
त्वग्वेपालघवे देवि शीघ्राय च विपश्चिता ॥ ३०८ ॥
कुण्डली कवची धन्वी स्कन्धनारूढमूर्तिमान् ।
आलोकं सूर्यवद् ध्येयो जगतां दर्शनाय ॥ ३०९ ॥
रसनात्वद्रूपका ध्येया नासिका धरणी गुणा ।
भास्वरप्रतिमं चित्तं तद्रूपं तत्स्वरूपकम् ॥ ३१० ॥
स्थविराकृतिर्मतिर्ध्येया योगिना भावितात्मना ।
बालहेलास्वरूपस्तु प्रद्युम्नाङ्गविलासधृत् ॥ ३११ ॥
भावनीयं रजो देवि मन्मथानन्दलिप्सया ।
भिन्नाञ्जना रुक्मृमहिषी पत्नी चण्डी घनप्रभा ॥ ३१२ ॥
करालवदनो घोरः स सेव्यो योनिशान्तये ।
पद्माक्षं सुप्रसन्नात्मा शङ्खकुन्देन्दुसप्रभः ॥ ३१३ ॥
पद्मजायुधवृद्धये यः सत्वोऽहं शासनस्थितः ।
प्रख्याख्य कर्मणो नित्यं तत्त्वध्यानविदा प्रिये ॥ ३१४ ॥
दशशीर्षां महाघोरां त्रिंशत्तीक्ष्णां शताशयाम् ।
शतार्द्धजघनां देवि शतपादां शतोदराम् ॥ ३१५ ॥
हृदन्तमरुणामूर्ध्वक्रूराकारप्रतिष्ठिताम् ।

भावयेत् प्रकृतिं धीमांस्वाधिकारमिन्दिराप्रभाम् ॥ ३१६ ॥

चक्रावर्तस्वरूपेण ध्येया तारुण्यरूपधृक् ।

रजोवद्वागरूपन्तु तमोवच्चिन्तयेत् त्रुटिम् ॥ ३१७ ॥

प्राकृतेन तु रूपेण संस्थानं वेदिनी कला ।

चिन्तयेद् वर्णभेदस्थां च भ्रूमाञ्जिष्ठकर्बुराम् ॥ ३१८ ॥

सहस्रमूर्ध्वसंघट्टमुकुटाटोपभास्वराम् ।

सहस्रवदनां भीमां व्ययुताक्षविराजिताम् ॥ ३१९ ॥

भुजायुतयुतां नीलभास्वज्ज्वालाप्रभोज्वलाम् ।

सर्वभूमिप्रदेशेषु फणीन्द्रकृतभूषणाम् ॥ ३२० ॥

लम्बोदरसहस्रां तु पादायुतगतिक्रियाम् ।

गजाजिननिविष्टाञ्च गुह्यानेकवराधराम् ॥ ३२१ ॥

आगुह्याकृष्णवर्णाभामाहृदं पीतवर्णकाम् ।

आगलाद् रक्तवर्णाञ्च तदूर्ध्वे सर्वतः सिताम् ॥ ३२२ ॥

मायामेवंविधां ध्यायेन्मायाभोगैकलालसः ।

विद्यावच्चिन्तयेद् विद्यां स्मरेदीश्वरमीशवत् ॥ ३२३ ॥

विद्याधिपं सदेशोक्त्या प्रत्यया दृष्टमार्गतः ।

प्रोक्तोपलब्धिलक्षेण शेषं सर्वं विचिन्तयेत् ॥ ३२४ ॥

स्वव्याप्तिविभवास्वादधामकं भवते प्रिये ।

निष्पन्नं योगिनां तत्वं ध्यानयोगे तथा पुरम् ॥ ३२५ ॥

तच्चापि प्रक्रियादृष्टरूपकेन विचिन्तयेत्

भूतघातकजं ध्यायेत् पदमव्यक्तरूपकम् ॥ ३२६ ॥

पुद्गलाकृतिगन्धाख्यं वाक्यसंस्थास्वरूपगम् ।

यत् तद्वत् तेजस्तत्वं त्रुटिरूपं विचिन्तयेत् ॥ ३२७ ॥

प्रपञ्चप्रतिमं ध्यायेद् यत् तद् योगीश्वरीपदम् ।

तथा चण्डपदं देवि विद्याविश्वविलासगम् ॥ ३२८ ॥

महापदं महेशाङ्गलीलालोकावलंक्षितम् ।

ध्यायेच्चक्तिपदं दीप्तं शक्तं शबलशालिनम् ॥ ३२९ ॥

प्रणवं महाप्रणवं प्राणवृत्त्यां विभावयेत् ।

पदं यत्तत् स्वरूपन्तु तद्व्याप्तिव्यापकं स्थितम् ॥ ३३० ॥

यच्च स्यात् तेन सिद्धेन प्राङ्मयं तदुदीरितम् ।

शब्दध्यानमतो ब्रूमि श्रूयतां पद्मलोचने ॥ ३३१ ॥

प्रोदिते धाम्नि योगीन्द्र सानन्देष्वष्टसङ्गमे ।

पर्यङ्कासनगः कुर्याच्चित्तं शून्ये समानसम् ॥ ३३२ ॥

चेतांसि सन्ति भूतानि नाहं चिन्त्यं न चिन्तनम् ।

चिन्तयेत्खं खयोगीन्द्र परेवपुषि निश्चलः ॥ ३३३

प्राप्नोति परमां काष्ठामशोच्यां वचनच्युताम् ।

नित्यानन्दां परां विद्धि मसृणां निरुपद्रवाम् ॥ ३३४ ॥

ततो ज्ञानदृशा वीक्ष्य स्वरषोडशकेन तु ।निजवक्त्रन्तु निष्पन्नं सकण्ठं

दक्षिणं भुजम् ॥ ३३५ ॥

कवर्गेण तथा वामं चवर्गेण टवर्गजम् ।

नितम्बमध्यवह्व्यन्तं वामं चैव तवर्गजम् ॥ ३३६ ॥

दक्षपार्श्वन्तु निष्पन्नं वामे चैव परेण तु ।

तदन्तेनोत्तरं देवि जाठरं चैव निर्मितम् ॥ ३३७ ॥

पृष्ठं कृष्टेन निष्पन्नमन्धतामिस्रजां गुहाम् ।

अर्चात्मकां त्वचं देहे मूकत्वेनाम्भमेव च ॥ ३३८ ॥

निष्पन्नं जिघ्रमाफुल्लं सूत्रमुन्मादकेन तु ।

जत्वेन ख जात्वेन च तथास्थीनिमज्जां कुणितसम्भवाम् ॥ ३३९ ॥

रेतः पङ्कविनिष्पन्नं चैतन्यं त्रिवलेन तु ।

संहारकं महाघोरं नयनांबुमनन्तजम् ॥ ३४० ॥

एवं वर्णात्मकं वीक्ष्य वपुरुत्तुङ्गविस्तरम् ।

भगणैर्भासितं तद्वद् तद्वत् ध्रुवदेहं तथोत्तरे ॥ ३४१ ॥

रोमरन्ध्रांग चिद्रैस्तु सन्तानं वर्णजातजम् ।

निर्गच्चन्तमजस्त्रन्तु ताराबिन्दुस्वरूपिणम् ॥ ३४२ ॥

स्तिमितेन समालोच्य मनसापूरीताम्बरे ।

तस्य संस्थानसंघट्टघट्टितो गगनान्तरे ॥ ३४३ ॥

चन्द्रादित्यौ न दृश्येते न ग्रहा न सुरालयः ।पूर्णं सर्वं जगद् दृष्ट्वा

ततो योगी स्थिराक्षवृत् ॥ ३४४ ॥

प्राणशक्त्योत्तमैकैकां लिपिमाहृत्य लीलया ।

पीयूषगोलकाकारं ग्रसेताश्रुदनाहितः ॥ ३४५ ॥

यत्तद्विलम्बिनीचक्रं तस्मिन्युक्तस्तु योऽङ्कुरः ।

तं दृष्ट्वा सितकुम्भाभं तद्रागं ग्रसितं क्षिपेत् ॥ ३४६ ॥

तावत् तावत् स योगीन्द्रो यावद् बाह्यमनक्षरम् ।

पूर्णञ्च वीक्षयेत् कुम्भं सुधिया स्नापिताङ्गिनम् ॥ ३४७ ॥

एवं काये प्रसूयन्ते प्रविशन्तं मुहुर्मुहुः ।

चिन्तयेद् योगवित् तावद् यावत् प्रत्यक्षतां गतम् ॥ ३४८ ॥

निष्पन्नेऽस्मिन् महाध्याने न तज्जगति विद्यते ।

यदस्य न स्याद् वस्तूयं सर्वज्ञत्वादिकं प्रिये ॥ ३४९ ॥

प्रारम्भेऽक्षरवेत्तृत्वं दृष्टनष्टादिका क्रिया ।

प्राणस्थिरेऽपि ध्यातेऽस्मिन् सर्वशास्त्रार्थविद् भवेत् ॥ ३५० ॥

कादिक्षांतार्णरूपेषु ध्यानस्तन्मयगा गिरः ।

पृथिव्यादीश्वरास्ते भोगं भुङ्क्ते यथाक्रमम् ॥ ३५१ ॥

लघुमात्राप्रसिद्धौ तु तेजोनिधिपदास्पदौ ।

देदीप्यते गुरूणाञ्च गुरुवक्रसुनिर्मलः ॥ ३५२ ॥

षडध्वे चोपदेशेन योगोऽयमुक्तः स्फुटार्थोऽर्थसन्तानसंयोगकारी ।

विभक्तो विशेषैर्विचित्रैरमेयैः सुबुद्ध्यापि यः सोऽपि दध्यौ स्ववीर्यम् ॥

३५३ ॥

श्रीदेव्युवाच ।

त्रिनेत्राग्निसंदीपितानङ्गदेह-भृगुद्योतपिङ्गीकृतोत्तुंगजूट ।

विषोल्लासलावण्यकीकृष्णकण्ठ परित्राहि लोकोस्त्वमीशेषभक्तान् ॥

३५४ ॥

जयाशेष विश्वेन्दिराक्षीरसिन्धो ।

जयानन्त दुःखाधिप क्रूरसिंह ।

जयाशुद्धिभीमान्धकारोग्रभानो

जयात्यन्तसंतप्तसौधाम्बुवाह ॥ ३५५ ॥

जयालोलगङ्गाम्बुनिर्धूतजटा जयेन्दुश्रियाभासिताशेषमूर्ध्वम् ।

जयोद्दामशङ्खावलीहारलील जयोल्लासिदंष्ट्रैंदुरश्म्यास्यवेश ॥ ३५६ ॥

जयाविर्भवद्धूममालाग्निदृष्ट्या समालोकिताराद्वरेण्य प्रदातः ।

जयोदग्रशूलाग्रभिन्नान्धकार जयानन्त रक्तपूर्णोत्तमाङ्ग ॥ ३५७ ॥

जयोपेन्द्रभयभीतदैत्येन्द्रभिन्नान्धकार जयात्यन्त दृप्तारिसंभग्नमान ।

जयानन्तवीर प्रदत्तप्रसिद्ध जयापूर्णगाम्भीर्यतत्त्वेन शुद्धा ॥ ३५८ ॥

जयालोलललोलो हि कर्णावतंस जयोत्फुल्लनेत्रोत्तमारामशोभ ।

जयान्धासुरं वाश्रमैरेयमत्त जयाहीशमौलाङ्गसंदीपिताशेषदेह ॥ ३५९ ॥

जयानन्यजातिक्षयाकारि दृष्टा जयामोघशक्ते महावीरमूर्त्ते ।

जयास्वादिताशेषविश्वस्वभावः जयाक्रोडितानेकशत्रुस्वभाव ॥ ३६० ॥

जयानन्त विघ्नौघ दुष्टाशयात्मन् जयावद्यसंरुद्धचिद्दत्त शर्मन् ।

Sampath_eBooks

जयाद्यंत-वाम-क्रियाराध्य देव जयानन्त ब्रह्माप्तवामोक्तसिद्धः ॥ ३६१ ॥

जयाचोर्मिविद्याचलासिन्धुनाथ

जयाशेषशक्तिप्रबन्धोर्ध्वपीठ ।जयध्वस्तवीर्याणुवीरोर्ध्वकेश

त्वदुक्तेन योगेन तृप्तास्मि नाथ ॥ ३६२ ॥

कल्पासनानि तन्त्रेऽस्मिन् योगसंसाधकानि तु ।

तानि मे ब्रूहि शूलाग्रभिन्नान्धकशवोद्वह ॥ ३६३ ॥

श्रीभैरव उवाच ।

श्रवित्सं स्वस्तिकं दण्डं पर्यङ्कशकलोद्वहम् ।

प्रलम्बं भैरवं वीरं चगलं सुप्रसादिनम् ॥ ३६४ ॥

लीलं लीलाकरं चैव द्वादशैतानि सुन्दरि ।

आसनान्यनुमेयानि प्रतिपन्नानि सूरिभिः ॥ ३६५ ॥

मन्त्रविद्यायुजां देवि सिद्धियोगदिनानि तु ।

कार्पासशाल्मलीतूलपूरिते पक्षवस्त्रजे ॥ ३६६ ॥

त्वङ्मयेव द्विहस्ते तु षडङ्गुलसमन्विते ।

समन्ताच्चतुरस्त्रे तु वृत्ते वा सुमृदा सुधीः ॥ ३६७ ॥

सपूरके स्थितो योगमासनस्थोऽभ्यसेत् सदा ।

द्वौ तुलौ तु समुत्थाना धूरूर्ध्वे पादयोर्द्वयोः ॥ ३६८ ॥

सव्यञ्जकादधःकार्या वामा मूर्ध्नि निवेशयेत् ।

श्रीवत्समिदमुक्तन्तु स्वस्तिकं शृण्वतः परम् ॥ ३६९ ॥

जङ्घोरुसंपुटाधोर्ध्वस्थितौ मध्योत्तरौ च तौ ।
स्वस्तिकाकारकृत्पृष्ठो दण्डेषूच्छ्रितजानुभिः ॥ ३७० ॥
अन्योन्यवलिते जङ्घे काये तिर्यङ्मनाः प्रिये ।
तदेव योगबन्धेन पर्यङ्कं श्लथमादिशेत् ॥ ३७१ ॥
दक्षिणां यो नयेज्जङ्घां वामां शुद्धां निवेशयेत् ।
न कृष्णाञ्जलितद्योगी बन्धयेत् सकले ध्रुवम् ॥ ३७२ ॥
करौ यथा सुखं स्थाप्यौ वामाङ्घ्रि भुवमास्थितः ।
दण्डमीषत्पुरोभागे प्रलम्बं विस्तृतं भवेत् ॥ ३७३ ॥
वामजानूर्ध्वगः सन्धिः किन्तु कार्यस्तु दक्षिणः ।
अग्रगे जानुनी कार्ये जङ्घे किञ्चित् प्रतिष्ठिते ॥ ३७४ ॥
पृष्ठप्रतिष्ठितौ पादौ बहिःस्थौ तौ नितम्बयोः ।
काये भैरवभावेन प्रोदितं भैरवासनम् ॥ ३७५ ॥
वामपादोपवेशेन वीरं साध्यकरालिनम् ।
उपधानकयोगेन पृष्ठे जङ्घाप्रसारणात् ॥ ३७६ ॥
सुप्रसारितमुद्दिष्टं सरेष्टाच्च निकृष्टयोः ।
सव्यजङ्घोरुसन्धिस्थं वामगुल्फं निधापयेत् ॥ ३७७ ॥
इषन्निपतिता जङ्घा वामा लोला प्रशंसिता ।
स्वीय जङ्घोरुगं स्थाप्य नूपुरस्थानमुत्तमम् ॥ ३७८ ॥
घटिते सन्निवेष्टव्ये वामे कूर्परजानुनी ।

प्रसारितभुजो योगी विस्तृतोरुः शिरोन्नतः ॥ ३७९ ॥

लीलाकरं विजानाति प्रभुलीलाधरः प्रिये ।

लक्ष्मीहस्ते निधित्वञ्च ज्ञानमष्टगुणोद्भवम् ॥ ३८० ॥

शौचाप्यायनमुष्टिश्च मातृवीर्यश्रियामलः ।

मन्त्रविद्यास्त्रं देहि त्वमनन्यज गुणात्मज ॥ ३८१ ॥

ऐश्वर्यं चक्रमादेवि वीर्यमेषामुदाहृत्तम् ।

उदर्काजः सुसन्नद्धा नैस्पृहान्तत्वदर्शिवान् ॥ ३८२ ॥

एकान्ते स्थितिशीलत्वाद् योगः सिद्ध्यति योगिनाम् ।

सममन्त्रममन्त्रं वा योगमेकस्वरूपकम् ॥ ३८३ ॥

निष्पाद्य नौस्तितीर्षुर्यो घोरात् संसारसागरान् ।

अतो रहस्यमन्यद्वा साधकः स्ववते यदा ॥ ३८४ ॥

तदा रहस्यभेदेन सुखोपायव्यवस्थया ।

तदानायासतः सिद्धं रहस्यत्वान्महेश्वरि ॥ ३८५ ॥

वृत्तिक्रमप्रयोगोऽत्र व्यक्तवृत्तिव्युपाश्रयात् ।

वीरेन्द्रवृत्तिजों योगः प्रभवेत् तन्न संशयः ॥ ३८६ ॥

कटुतिक्तकषायस्य मधुराम्लस्य सांप्रतम् ।

लावण्यस्यापि यत्रेच्छा तत्रारंभानुशीलनात् ॥ ३८७ ॥

पर्यन्तेऽपि च सा व्यक्तिः स्थिता सर्वानुषङ्गिनी ।

तत्रत्याज्ञत्व चार्तृत्वं उपजायत एव हि ॥ ३८८ ॥

अत्र संयोगिकां वृत्तिं यदा भजति साधकाः।

तदास्य सर्वसंपर्कक्रोडीकारो निवृत्तिमान् ॥ ३८९॥

सत्वानुस्यूत एवासौ समुदेति महाफलः।

भव्यतन्त्रीस्वराद्यन्ते यदा तल्लीयते स्थिरा॥ ३९०॥

तद्वेत्तृत्ववाध्यत्वात् तदास्य व्यज्यते परम्।

येन व्यक्तेन सर्वज्ञ कर्तृता स्यादकृत्रिमा॥ ३९१॥

दृश्यार्थप्रतिभानान्तर्यदि तन्मयतां भवेत्।

तन्मयत्वात् तदन्तस्य परावाप्तिः प्रजायते॥ ३९२॥

तन्निरासेन वा स्वान्तविवेकप्रविकासनात्।

विकसत्येव चिद्वृत्तिस्ततस्थं स लभते शिवम्॥ ३९३॥

तदुपालध्वयोगेन पररूपस्वरूपभाक्।

दृक्स्वरूपेऽत्ति संलीना तन्निरासेन पश्यति ॥ ३९४॥

तस्योदेति परः साक्षात् स्वरूपस्थः शिवोऽव्ययः।

अथ दृश्ये स्वात्मसत्ता स्वदेहामोक्षणे कृति ः॥ ३९५॥

सदावरणभावेन तात्स्थ्यात् तद्वत् स्वयं स्थितः।

स्थिरः समाधियोगेन योगाकारविचारयुक् ॥ ३९६॥

व्यापकः प्रभुतामेति परदेहानुजीवने।

मृतजीवशरीरादौ विचरत्यविशङ्कितः॥ ३९७॥

प्राग्वस्तु रव प्राग्वसु दृष्टतादात्म्यसत्ताधिगमयोगतः ।

Sampath_eBooks

सर्वाकारादिवैचित्र्यात्स्वरूपोद्योगयोजनात् ॥ ३९८ ॥

व्यापकत्वमतस्तस्य सर्वगं प्रविजृम्भते ।

दृश्यद्रष्टोर्निरासेन प्रवृत्तिः प्रभवोत्तरा ः॥ ३९९ ॥

तया व्यक्तेरुदारा सा साटोपा विहिता भवेत् ।

आहारपानसंश्लेषाद्द् रासहासकृती स्मृते ॥ ४०० ॥

जृम्भाक्षतशरीरस्य तनुता स्फुटसन्धिनः ।

स्फोटान्ता शक्तिरतुला चिद्रूपा व्यक्तिमेति हि ॥ ४०१ ॥

यथा तथा शृणुष्वैव तद्विलोमनिभालनम् ।

आहारादौ यावदिष्टा मूलप्रसरयोगतः ॥ ४०२ ॥

निरोधं यदि कुर्वीत तदा व्यक्तिमुपैति हि ।

परितृप्त्यवसानांते प्रारम्भे मध्यपूरणात् ॥ ४०३ ॥

मूलस्वरूपचिद्व्यक्त्या मूलतः प्रभवोत्तराम् ।

प्रेयसीकण्ठसंश्लेषप्रारम्भे मध्ययोगतः ॥ ४०४ ॥

पर्यन्ताद्यनुसन्धानात् स्मृतिमूलमुपाश्रयात् ।

तत् स्मृतिर्वा केवलैव चिद्व्यक्तिकरणी स्मृता ॥ ४०५ ॥

तद्योग एव सा सम्यङ् मूलप्रसरयोगतः ।

निरोधकृत् समाख्यातो ज्ञात्वा कर्तृत्वलक्षणः ॥ ४०६ ॥

तद्योगः स्यात् स्वसंवित्त्या विवेकानन्दनन्दितः ।

महानन्दमयः सम्यक् चिद्रूपः प्रभवेदसौ ॥ ४०७ ॥

तदाकारविकाराद्यैस्तत्तद्रूपनिभालनात् ।

तद्बोधपरिणामाभ्यां सर्वज्ञत्वं भवेदतः ॥ ४०८ ॥

शत्रुशस्त्रमहाभूतविद्युत्स्तनितवातजम् ।

त्रासमुत्रासजं यच्च तन्मध्याद्यंतयोगतः ॥ ४०९ ॥

मूलप्रसरयोगोऽत्र भाव्यस्तद्रूपमानसः ।

निरुद्धः सर्ववेत्तृत्वं प्राप्नोतीति किमद्भुतम् ॥ ४१० ॥

सर्वज्ञत्वमतोऽभ्यासाज्ज्ञानान्ते साधकस्य च ।

आनन्दलाभसंप्राप्त्या हर्षाच्चातीवसुन्दरम् ॥ ४११ ॥

आद्यन्तमध्ययोगेन मूलप्रसरयोगतः ।

आसीत् तत्प्रविवेकेन चिद्व्यक्तिः स्फुटमेव हि ॥ ४१२ ॥

विस्मृतस्य महाभाग स्मृतिसन्ध्यंशयोगतः ।

अनुसन्धिक्रमादेव मूलयोगप्रकाशनात् ॥ ४१३ ॥

समुदेति परः साक्षाद् येन व्यज्यति तत् पदम् ।

आद्यमध्यान्तगं मूलं जृम्भाकेलिं विभावयेत् ॥ ४१४ ॥

तद् बोधात् तत्प्रतीघाताच्चिवताव्यक्तिमेति हि ।

तद्वक्रं तस्य सौभाग्ये मूलवृत्तिविकासनात् ॥ ४१५ ॥

अभ्युदेति परः साक्षात् तद्वद् देहादिताडने ।कृते सति समभ्येति

मूलप्रसर एव हि ॥ ४१६ ॥

वर्णव्यक्तौ यदा व्यक्तौ गुणेतरविचालितौ ।

Sampath_eBooks

तद्गुणेतरयोगेन स्फुटः स्फोटादयः कृतः ॥ ४१७ ॥

एवमादिपदार्थानां संस्थिता शिवता हि या ।

प्रतिभेदप्रभेदेन साख्याता ते यथार्थतः ॥ ४१८ ॥

शक्तेरपरिभेदेन या व्यक्तिः पिण्डमाश्रिता ।

सा शृणु प्रभवोद्भावं क्रमव्युत्क्रमयोगतः ॥ ४१९ ॥

या सा कन्दोदरे रूढा कुण्डलाकारविग्रहा ।

गुहागुढागुहान्तस्था तारकेन्दुविराजिता ॥ ४२० ॥

फणापञ्चकसंयुक्ता प्रक्षुब्धाम्भो विभास्वराः ।

ज्वलद् वह्निप्रतीकाशा प्रसुप्तभुजगोपमा ॥ ४२१ ॥

पञ्चग्रन्थिधरा घोरा विश्वग्रसनघस्मरा ।

तस्याः प्रबोधनं व प्रधोपन कार्यं महा करयोगतः ॥ ४२२ ॥

तत्र वै सुप्रसन्नात्मा सुखासनमधः स्थितः ।

बद्धपद्मासनो वीरो ऋजुकायः कृताञ्जलिः ॥ ४२३ ॥

वक्रमीशद् वृवृत्तं स्यान्नेत्रे लुलिततारके ।

सानन्दं चापि वेद्योऽयमुग्रनादप्रयोगतः ॥ ४२४ ॥

दक्षिणावर्तयोगेन यावत् कन्दोदरं खगः ।

घोराघातप्रयोगेण यदा संपीडनं सकृत् ॥ ४२५ ॥

क्रियते तु तदा तस्य क्रमद्वेष्टानयोगतः ।

प्रवृद्धचते क्षणार्द्धेन सा शक्तिर्घोरविक्रमा ॥ ४२६ ॥

फणपञ्चकमत्युग्रं विकास्य प्रविजृम्भते ।

सशंखदण्डवच्चासौ विद्युद्वद् व्यक्तिमेति हि ॥ ४२७ ॥

आदत्ते पञ्चग्रन्थीशोऽनुदारौजा महोल्वणः ।

यावत्प्रथमसन्धिस्थस्तावच्चिह्नं प्रवर्तते ॥ ४२८ ॥

भ्रमणं कम्पनं मूर्चा ज्वलमानं शरीरता ।

पश्चादानन्दमत्युच्चैर्विपुलं कामकालवत् ॥ ४२९ ॥

द्वितीयां पाटयेद् ग्रन्थिं यदा देवी सुदुःसहा ।

तदा चिह्नं शरीरस्थं तस्य सम्यक् प्रवर्तते ॥ ४३० ॥

विकासं चामिषं प्लावं स्तोभमत्यन्तशोभनम् ।

आवेशं बहुधाकारं योगिभाषाप्रभाषणम् ॥ ४३१ ॥

अतीतानागतार्थादिकथनं वा करोत्यलम् ।

तृतीयां वै महाग्रन्थिं व -न्थि यदा पाटयते बलात् ॥ ४३२ ॥

तदादर्दुरवद्भूमिं प्रथमं त्यजते भृशम् ।

पुनश्च चक्रवद् व्योम आस्ते साधकसत्तमः ॥ ४३३ ॥

महाव्याप्तिस्ततः पश्चात् समुदेति सदैव हि ।

योगनिद्रा महानन्दो भवत्येवास्य योगिनः ॥ ४३४ ॥

तीव्रता पटुतात्यर्थं सर्वज्ञत्वादिकं स्फुटम् ।

दूरादेवादि सर्वं स्यात् साधकस्य महात्मनः ॥ ४३५ ॥

चतुर्थी सा महाग्रन्थिं यदा पाटयते शिवा ।

Sampath_eBooks

तदास्य सिद्धयश्चित्राः प्रवर्तन्ते न संशयः ॥ ४३६ ॥

कम्परोमाञ्च आक्षेपस्तोभ विभ्रम दृषः ।

आकर्षवेधपातादि पुरक्षोभणमुल्बणम् ॥ ४३७ ॥

घट्टनं रोधचलनमाक्षेपावेशमद्भुतम् ।

षड्रसाकृष्टिरतुला षड्भिः श्रुतिरनुत्तमा ॥ ४३८ ॥

षड्स्वभूः प्रभुता न स्यादाकारान्ता क्षतिस्तथा ।

महाव्याप्तिरुता घोरा चञ्चलाक्षेपसुन्दरी ॥ ४३९ ॥

समुदेति न सन्देहमिति भैरवभाषितम् ।

पञ्चमं ग्रन्थिसंयोगमतुलं घट्टयेद् यदा ॥ ४४० ॥

तदा पूर्वोक्तमखिलं समुदेति महाक्रमम् ।

कलाविलासमतुलं दशद्वादशभेदतः ॥ ४४१ ॥

षोडशक्रमयोगेन तासां यः प्रसरः परः ।

वह्नीन्दु सूर्यसद्रूपो ह्यष्टाविंशत्प्रकारजः ॥ ४४२ ॥

सोऽपि प्रसरमायाति चक्रभ्रमणविभ्रमः ।

बिन्दुचक्रः समस्तोऽपि चतुर्धा चित्तलक्षणः ॥ ४४३ ॥

कलाक्रमेण सकलः सोऽपि प्रसरति प्रिये ।

वाग्वृत्तिरखिलायास्ताश्चतुर्धा ख्यातिलक्षणा ॥ ४४४ ॥

तत्पतित्वमतोऽभ्येति प्रकारावेशलक्षणम् ।

तदतीतमतः सोढा योऽव्यक्तः प्रसरः स्मृतः ॥ ४४५ ॥

परापरविभागेन विसर्गान्तावधौ हि सः।

तद्व्याप्तिरेव जायेत तन्त्रवीर्यप्रकाशिका ॥ ४४६ ॥

सिद्धयोगिनिचक्राणां विमानानां च दर्शनम्।

प्रविभागविभागेन वेत्ति भुङ्क्ते च सर्वशः॥ ४४७ ॥

भुक्त्वा तत् तत्समापन्नो शिवः केवल एव सः।

व्युत्क्रमयोगोऽयं पत्रान्तरविराजितः ॥ ४४८ ॥

अनुषङ्गगताः सर्वाः सिद्धयः संव्यवस्थिताः।

क्रमभेदमतो वच्मि शृणु पन्निलनन्दन॥ ४४९ ॥

विसर्गधामधाम्नोन्तर्या कला परमेश्वरी।

सर्वगर्भा सर्वमूर्त्तिः स्थितिप्रलयलक्षणा॥ ४५० ॥

विद्युल्लेखेव संपातं कुर्वती नन्दमध्यगा।

भवेद्यावत्तावदेव षड्व्याप्तिं व्यक्तिमेति हि॥ ४५१ ॥

आद्यव्यक्तौ कारणेन्द्रं व्यक्तिमायाति सिद्धिदा।

द्वितीयव्यक्तिसामर्थ्याद् वीर्यमौदार्यमेति च॥ ४५२ ॥

तृतीया व्यक्तिभेदेन ग्रन्थयो भान्ति सर्वतः।

आधारकरणेन्द्राणां चक्रास्तदनुसंस्थिताः॥ ४५३ ॥

चतुर्थक्रमभेदेन सर्ववीरेन्द्रसंस्थिताः।पञ्चमार्गा भवेद् व्यक्तिः पञ्च

व्योमान्यथा मता ॥ ४५४ ॥

तेषु पञ्चरतः सम्यक् खेचरीपदभाग् भवेत्।

Sampath_eBooks

या षष्ठी व्यक्तिरुद्दिष्टा रसद्रव्यप्रसूतिकाः ॥ ४५५ ॥

एवं षड्भूमिरूपेण व्यक्ता सा परमेश्वरी ।

व्याप्यव्यापकभेदेन परमार्थविचारतः ॥ ४५६ ॥

विचरंती जगत् कृत्स्नं सदेवासुरमानुषम् ।

तद् वष्टम्भयोगेन तत्स्वरूपविकासनात् ॥ ४५७ ॥

तत्स्वरूपो भवेद् योगी सिद्धिसन्दोहसंयुतः ।

एवमैकात्म्यसंपत्त्या शाक्तं शाम्भवमाणवम् ॥ ४५८ ॥

योगमाख्यातमेतद्वै गुरोरर्थप्रकाशकृत् ।

अवाप्य घोरात् संसारादुत्तरेन्नरसत्तमः ॥ ४५९ ॥

प्रोक्तोऽयं योगचन्द्रो जनकुसुमवतोच्वासमद्भूरिवाचां

विस्तीर्णांशुप्रतापप्रविहततिमिरे विस्तृते विश्वखाते ।

योगज्ञानप्रवृत्तिस्थितिविलयकरी स्वांशदेशस्वतन्त्रा

दीक्षा संगेव पूता समवपुरुदया श्रूयतां साम्प्रतं भोः ॥ ४६० ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां योगनिर्णयो नाम द्वादशः

पटलः ॥ १२ ॥

त्रयोदशः पटलः ॥

श्रीदेव्युवाच ।

दीक्षा कतिविधा देव कामार्थान् साधयत्यपि ।

समाना वासमाना वा ह्येतदिच्छामि वेदितुम् ॥ १ ॥

श्रीभैरव उवाच

ज्ञानक्रियोदयादानात् तन्निरोधकसंक्षयात् ।

पुंसां हि गीयते दीक्षा दानक्षपणरूपतः ॥ २ ॥

सा सामयाथ निर्वाणाद् विभिन्नाद् विस्वरूपतः ।

समया हि पुनर्याति द्विर्भावं फलभेदतः ॥ ३ ॥

ज्ञानयोगप्रवृत्तिस्था प्राणिनामधिकारदा ।

तद्वासा नवधा नित्या व्याप्तिपददायिका ॥ ४ ॥

समया या च विज्ञेया निर्वाणापि द्विरूपिणी ।

मोक्षार्थिकारभेदाभ्यां स्थाणुभिस्तंत्रवेदिभिः ॥ ५ ॥

भूयो विमुक्तिदा दीक्षा निर्वाणा बहुभेदगा ।

शिवधर्मा लोकधर्मा क्षिप्रघ्नी पिण्डपातिका ॥ ६ ॥

एकातपोर्ध्वचिच्चुद्धव्यावृतेर्बन्धनत्रये ।

शिवाप्तिर्दर्शिता शेषसमयाचारपालनात् ॥ ७ ॥

मोक्षावाप्तिकरी या तु लोकाचारविपर्ययात् ।

शिवधर्मा स्मृता दीक्षाधिस्वरूपा महेश्वरी ॥ ८ ॥

निर्बीजाख्या सवीर्या च दीक्षाभेदः शिवागमे ।

पाकमूर्खा सुदीर्णाङ्गी एडत्वकुणियोषिताम् ॥ ९ ॥

सरूढात्यन्तभक्तानां भूभृत् संन्यासिनां प्रिये ।

विशुद्धसमयाचारा या कृता दैशिकेन तु ॥ १० ॥

निर्बीजा सा भवेद् दीक्षा सबीजा स्याद् विलोमतः ।

विधिद्वन्द्वसहानान्तु सुन्दरि क्रियते तदा ॥ ११ ॥

गुरुदेवाग्निकार्याणि तैः कार्याणि सुभक्तितः ।

अकुर्वतां हि तत्तेषां वाञ्चितं न भवेत् फलम् ॥ १२ ॥

लोकधर्मा तु या दीक्षा सा स्यात् स्थितिविलोमगा ।

शिवधर्मक्रिया सा तु किन्तु लौकिकवृत्तिगा ॥ १३ ॥

शोधयेदथवा सर्वं धर्ममेकं न शोधयेत् ।

लौकिकाचारधर्मस्था तद् भुक्त्वा निर्वृतिं व्रजेत् ॥ १४ ॥

अथासितं विशोध्यन्तु कर्मैकं दैशिकेन तु ।

मलिनोध्वाथवा देवि शुद्धो भोग्यो न जायते ॥ १५ ॥

तद्भोग्यं तद् विभुक्तत्वात् प्रयात्यात्मा परं पदम् ।

स्मृते यं लोकधर्मा तु दीक्षानिर्वाणगामिनी ॥ १६ ॥

एषातीते निरुद्धे तु प्रारब्धे कर्मणि प्रिये ।

क्षीणभोग्यवशाद्या तु सा दीक्षा पिण्डपातिका ॥ १७ ॥

क्षुरिकास्त्रोग्रमन्त्रैश्च योगेनाधाय प्रक्षिपेत् ।

परयोगसमायोगे सद्योनिर्वाणदा हि सा ॥ १८ ॥

क्रिया समानिकाः शूद्रविट्ब्रह्मवर्मिणाम् ।

मुद्रामन्त्रधनस्थानज्ञानयोगाङ्गभेदतः ॥ १९ ॥

समानफलयोगाश्च नासमानाः कदाचन ।

चतुर्दशशरीरस्थजन्तुचक्रस्य सुन्दरि ॥ २० ॥

साधनां त्वं शृणुष्वाग्रे यागं योगेश्वरीप्रियम् ।

समयी स्याददृष्टस्तु परमायापटावृतः ॥ २१ ॥

प्राक्संस्नातो महायोगी वीरभस्मगणेन वा ।

स्थाने यागविधिं कुर्यात् सुप्रतिष्ठे मनोरमे ॥ २२ ॥

षड्बलामण्डलं यत्तु सुस्निग्धद्विजराजिभिः ।

विशोकाम्भोजसंचन्नमानसं पुलिनोरुकम् ॥ २३ ॥

निम्नगाकूललीलाढ्यं पुष्पोदर्काम्बुनिर्झरम् ।

प्राक्पुण्यतपसां पुंसां चिह्नालङ्कारमण्डिताम् ॥ २४ ॥

वितानपर्वतप्रान्तस्थलीकाननवेश्मगम् ।

नगरग्रामघोषेषु पुरं च त्वरघोषगम् ॥ २५ ॥

चौरोरगविनिर्मुक्तं दिव्यावसथनिर्जितम् ।

गणमात्रनिकायैश्च वहुलिङ्गैरलङ्कृतम् ॥ २६ ॥

विश्वक्सेनजयादित्यसविताधिष्ठितन्तुमत् ।

तत्स्मृतं सुप्रतिष्ठं तु मनोहारि शुभप्रदम् ॥ २७ ॥

जन्तुपुञ्जाभिदघ्नन्तु खत्वा सर्वत्र मंत्रवित् ।

तुषाङ्गारास्थिनिर्मुक्तं कृत्वा स्थानं समन्ततः ॥ २८ ॥

सितादिवर्णयुक्तं तु स्वस्वाद्यास्वादसंयुता ।

सुगन्धादिकगन्धाढ्या सर्वसत्वफला रसा ॥ २९ ॥

न देहावयवैर्भिन्नैर्देही भिन्नः प्रशस्यते ।

गुह्याद्यवयवश्चैषु भिन्नसन्धिः सन्धि क्रिया मता ॥ ३० ॥

तद्भेदान्न हि पुंभेदो जातिभेदश्च दृश्यते ।

सन्नामानादिसंस्थाना प्राणिनां जगति प्रिये ॥ ३१ ॥

व्यवहारो जातिसंज्ञो व्यहर्तृपरिकल्पितः ।

भैरवास्त्राम्बुसंसिक्ता भुवो यांति पवित्रताम् ॥ ३२ ॥

जाह्नवी सलिलान्तर्गा यथैवोशरजाश्रया ।

मृदावलिर्गया सूर्यं तत्स्थानं सर्वतः समम् ॥ ३३ ॥

मुद्गराकोटितं कृत्वा समालक्ष्य धरातलम् ।

तत्र यागगृहं कार्यं शुभे शब्दे विपश्चिता ॥ ३४ ॥

नन्दा भद्रा जया रिक्ता पूर्णा च तिथयो मताः ।

रिक्ता वर्ज्या शुभाः सर्वाः सौम्यग्रहभसंयुताः ॥ ३५ ॥

ज्ञेन्द्रो वाचस्पतिः काव्यः सौम्यः क्रूरस्तथोत्तरः ।

नासत्यौ स्थावीरश्चन्द्रो ह्यादित्यः सुरनैगमः ॥ ३६ ॥

योन्यर्यमा नभोदीपश्चलाखण्डलवह्नयः ।

सुहृद्विश्ववपुश्चक्री प्राच्यपश्चोत्तरा प्रिये ॥ ३७ ॥

शान्ता भगणमालेयं शान्तिकर्मणि शस्यते ।

आखण्डलाचतुष्कं यत् तत् सूर्यादिग्रहक्रमात् ॥ ३८ ॥

प्राक् समृत्युरुक् सिद्धिफलकृत् सुरिभिर्मतम्।

सिद्धयोगे सुयोगे च विष्टिद्वन्द्वविवर्जिते ॥ ३९॥

शुभकार्याणि कार्याणि वामे वाचलसञ्चरे।

प्रीतिर्धृतिरथायुष्मान् सौभाग्यं शोभनो ध्रुवम्॥ ४०॥

सुकर्मा सिद्धिवृद्धी च ऋद्धिव्याहर्षणः शिवः।

सिद्धः शुभोच्चः शुक्लश्च ब्रह्मेन्द्रः शान्तमूर्तयः॥ ४१॥

स्मृता ः योगास्त्वमी सर्वे स्वाभिधानार्थसाधकाः ।

क्रूरैराध्यात्मिके काले प्रवृत्ते बलचोदिते॥ ४२॥

मूर्धस्थं चिन्तयेच्चक्रं कालसंकर्षणीयुतम्।

तद्विचिन्तयमानस्य विषुवो वाथवानिलः ॥ ४३॥

यत्काले च प्रवृत्तं तु तदा सर्वं शुभावहम्।

पट्टबन्धाभिषेकाद्यं कार्यजातं समारभेत्॥ ४४॥

बाह्याध्यात्मप्रतिष्ठेन कालेनैकतमेन तु।

दिक्साधनैकनिपुणो देशिकं यागमण्डलम्॥ ४५॥

ताराचन्द्रचले सौम्ये तूर्यघोषैस्तु सूत्रयेत्।

मैत्रार्थं परमा तारा सपक्षमशुभावहा ॥ ४६॥

षष्ठैकादशे दशमे तृतीये जन्मसप्तमे ।

शशिनि कृतारम्भाणां प्रारब्धं निष्फलं न हि॥ ४७॥

प्राक् संसाध्य प्रयत्नेन चित्रास्वातिनिदर्शनात्।

त्वराग्रहस्तमागत्यौ दण्डौ वृत्तौ समौ ऋजु ॥ ४८ ॥

निखन्य तोरणस्तम्भसंस्थायातावुभावपि ।

उभयोरपि वारुण्यां सप्तहस्तांतरेण तु ॥ ४९ ॥

तृणं स्थाप्य नरो मन्त्री चित्रास्वाती निरूपयेत्।

यदि दण्डान्तरारोधाद् दृष्ह्यन्ते ते निरीक्षकैः ॥ ५० ॥

सिद्धा प्राची तदा देवी नोऽथवा तु तथा बुधः ।

तावत् सञ्चालयेद् दण्डं तयोर्यावददर्शनम् ॥ ५१ ॥

ततः स्तम्भान्तरे देवि द्वादशांशविभाजिते ।

सम्तोह्य ख शस्तोह्य दक्षिणे पञ्चभागायामे तदन्तरे ॥ ५२ ॥

रेखा सा विषुवाख्या तु तथा शेषास्तु साधयेत् ।

स्थानस्य विषुवं साध्यं विषुवे च प्रतिष्ठयेत् ॥ ५३ ॥

बिन्दोः पूर्वापरे देया वद्धौ पाणिप्रमाणगौ ।

तयोर्मानेन कर्तव्ये चिह्ने सव्यापसव्ययोः ॥ ५४ ॥

ततोर्ध्वे सूत्रसम्पाते सिद्धे दिग्दक्षिणोत्तरे ।

आशाचतुष्ट्येनैवं विदिशः साधयेत् सुधीः ॥ ५५ ॥

संसिद्धककुभाम्वण्डौ विषमैस्तु समन्ततः ।

एकादश समारम्भा एकादश गतान्तिकैः ॥ ५६ ॥

कैरैः संसूत्रयेद् वामदेवतेजोधिकारजम् ।

वैतालीयादिकान् सर्वान् दक्षयित्वा स्वशक्तितः ॥ ५७ ॥

कुमारीवीरविप्रांश्च भोज्य पूज्य विशेषतः।

चन्दनाभूषिततनुः सिताम्बरधरो मुनिः॥ ५८॥

कुण्डली मुकुटी स्रग्वी कटकी क्षुरिकाकटिः।

लिङ्गवेशधरो वाथविभिन्नं शकुनैः शुभैः॥ ५९॥

सहायात् पूजयित्वा तु सूत्रारम्भं समारभेत्।

शक्त्यष्टकं प्रकृत्यादौ श्रीपर्णमथ ब्राह्मजम्॥ ६०॥

शाणं विल्वजं मौञ्जं वा कौशं मौलमथापि वा।

सर्वसौख्यप्रदं सूत्रं कर्तव्यं देशिकेन तु॥ ६१॥

पिष्टातकप्रदिग्धाङ्गमकल्माषतलं नवम्।

प्रत्यग्रपल्लवोल्लासच्चन्न संसूत्रकन्धरम्॥ ६२॥

कुम्भमध्ये प्रसिद्ध्यादौ पुष्पधूपसुपूजितम्।

हिरण्यं हेमरत्नं वा कटिबन्धोन्नतक्षितौ॥ ६३॥

शङ्कुं बाह्यं सुपूज्यादौ पुष्पधूपार्घविस्तरैः।

दूर्वासिद्धार्थकादप्सु वृद्धिर्द्वीपयथास्रजः॥ ६४॥

मृद्वल्कलसमायुक्तैर्नवार्घोङ्गप्रशंसितः।

ततः क्रूराधिपे तुर्ये त्रिनेत्रे च क्रमात् प्रिये॥ ६५॥

संकवेति च ध्यातव्याः पूजितव्याश्च सूत्रिणः।

दिक्षु वा कीलकान् दद्यात् प्रागादिषु तथा नृप॥ ६६॥

बाह्ये लोकेश्वराः पूज्याः क्षिप्त्वा दिग्बलिमादरात्।

भूतेभ्यः क्रूरसत्वेभ्यः क्षेत्रपालाय चैव हि ॥ ६७ ॥

अथोपयोगिके चाद्यं वादाद्यं वक्ष्यमुज्वलम् ।

एवमाम्नातसंस्थाने कृतपूजाविधिर्गुरुः ॥ ६८ ॥

पूजयेद् वास्तुवीरन्तु शक्तिचक्रतरक्षमम् ।

सूत्रेण सुमितं कृत्वा रूपमङ्गलमानगान् ॥ ६९ ॥

कोष्ठकान् मध्यमे तेषां ब्रह्माणीं सन्निवेशयेत् ।

प्राङ् नीडे स्वभुवं देवीमाग्नेयीं स्थविरो न्यसेत् ॥ ७० ॥

विरिंचित्त्यंतरा तौ तु पिशितादिसनातनाम् ।

पैतामहीं तथा व्रीडां तिर्यग् वै चतुराननाम् ॥ ७१ ॥

हंसयानां निधीशे च कुण्डलीमीशकोणगाम् ।

कोशानां नवकं यत्तु ब्राह्मीचक्रस्य प्राग्गतम् ॥ ७२ ॥

तद्वामेन तु माहेन्द्रीं स्थाप्य सर्वाङ्गसुन्दरीम् ।

सङ्क्रन्दनी सुनासीरा कौशिकी शतमच्चयुति ॥ ७३ ॥

पुरन्दरादिदेवेशी हर्यक्षा मेघवाहनी ।

प्राङ् नीडादीशकोणान्तं न्यस्तव्या विधिवत्र्मना ॥ ७४ ॥

रोहिदास्तप्यथैवं हि न्यस्तव्या मातरो नव ।

कौमारी कार्तिकेयेशी सेनास्कन्दा विशालिनी ॥ ७५ ॥

क्रौञ्चघ्नी शक्तिहस्ता च शतपत्रासना परा ।

सन्मुखी नवमी ह्येतामध्यकोशाधिका प्रिये ॥ ७६ ॥

नरारावापि वाराही याम्या वैवस्वती परा।

वर्मणी चण्डिनी कृष्णा कैनाशी महिषप्रजा॥ ७७॥

नवमी धूम्रघोरा तु मध्यनीडादिका न्यसेत्।

सुगन्धिभुजचामुण्डां द्व्यर्चां चर्चां कपालिनीम् ॥ ७८॥

वैतालीं च रुद्रकालीञ्च महाकालीं करालिनीम्।

विसरां मध्यनीडादिदृष्टाम्नायेन विन्यसेत्॥ ७९॥

नारायणीं ततो मध्ये प्रत्यग्वेष्मगणे न्यसेत्।

माधवी वासुदेवी च विष्वक्सेनां जनार्दनीं॥ ८०॥

वैष्णवी मुञ्जकेशी च वैकुण्ठा योगतन्द्रिणी ।

प्रागुक्ताद्यास्त्विमा देव्यो माधव्याख्यान् निवेशयेत्॥ ८१॥

एकदंष्ट्रा महाकाया वक्रशुण्डा महोदरा।

विघ्नकर्त्रीं महानासा गजवक्त्रानुविग्रहा ॥ ८२॥

आमन्दकामरूपेशमध्यभागनिवासिनी ।

एकदंष्ट्रादिकादीनां प्राग्गृहादिस्थिता स्मृता॥ ८३॥

नैधोऽपि नवके मध्ये रुद्राणीं स्थापयेद्द् बुधः।

त्र्यम्बिका त्रिपुरन्ध्रीव स्थाणवी शशिभूषणा॥ ८४॥

भवानी कृत्तिवासा च धृष्टशोका कपर्दिनी।

पूर्वादिक्रमशो देयास्त्र्यपविष्टे ततः प्रिये॥ ८५॥

दत्वा घोरतरां मध्ये ह्यघोरां घोररूपिणीम्।

तथा घोरतरां देवि घोरघोरतरां पुनः ॥ ८६ ॥

महाघोरा ख रां सुघोराञ्च घोरास्यां घोररूपिणीम् ।

प्राक् क्रमेण न्यसेत् मन्त्री मन्त्रतन्त्रविधानवित् ॥ ८७ ॥

एतदष्टगुणं तत्वमेकाशीतिविभेदतः ।

वासुदेवशरीरेस्मिन् मातृभेदेन विस्तृतम् ॥ ८८ ॥

पदपूज्यानि वृन्दानि नवैतानि भवन्ति हि ।

मध्याद्यादि विशालाक्षि प्रथमं प्रथमः क्रमात् ॥ ८९ ॥

स्वपदेनांगसंयोगः कार्यों जातिविभेदतः ।

हृद्याद्यासनसंकल्पो भिन्नाभिन्नेऽवशिष्यते ॥ ९० ॥

वपुर्वपुष्माश्चैवात्र स्वपदेन प्रशंसितुम् ।

एवं वास्तव वपुषि कृतदेवार्चनः क्रियः ॥ ९१ ॥

कारयेन्मण्डपं तत्र पक्वेष्टमपदारुजम् ।

षड्भागभाजिते धाम्नि त्यक्त्वासौ पार्श्वयोर्द्वयोः ॥ ९२ ॥

अनन्तांश चतुष्के तु समं सूत्रचतुष्टयम् ।

कीलको तानि तं कृत्वा द्विहस्तोपरि विस्तृता ॥ ९३ ॥

तालुत्रिभागोत्सेधे च वतस्रो भिन्तयः व ख भिन्नयः शुभाः ।

वातायनसमायुक्ताः कर्तव्या घनवाजिकाः ॥ ९४ ॥

गर्भपक्षांशकोत्सेधः किञ्चित् समधिकोऽथवा ।

पक्वेष्टकमयः कार्यः पट्टच्चन्नोर्ध्वमण्डलम् ॥ ९५ ॥

कुम्भन्तु घटितं स्थूलं कुक्षिशल्यक्षतास्पदम् ।

निष्कंपाः सुदृढाः स्थूलाः पट्टिकास्तेषु रूपयेत् ॥ ९६ ॥

चतस्रः क्षेत्रमानस्थास्ताश्च कोणाश्रयं गताः ।

सुसमा सर्वतः कार्या ह्यग्राधिष्ठितभिन्नयः ॥ ९७ ॥

तासां मध्ये समे देया किञ्चित् न्यूनेऽथवाप्यथ ।

चतस्रोऽन्या दृढास्तिर्यग् लोहकीलककीलिताः ॥ ९८ ॥

तासामधोर्ध्वतश्चिन्त्यं फलकैस्तु समन्ततः ।

निबद्धे सन्धिदेशे तु पारमायसकीलकैः ॥ ९९ ॥

लीनं कालासृकं कार्यं शिल्पिना शिष्टवेदिना ।

अङ्गविद्धस्य कालस्य शल्यवित् स प्रशंसितः ॥ १०० ॥

कृतदारुमयं ह्येवं समन्तादिष्टकारितम् ।

सुधापाण्डुरितं कुर्याद् दार्विद्धमथ धारयेत् ॥ १०१ ॥

वेणुकाष्ठतृणच्छन्नं कुर्याद्वा काष्ठपञ्जरम् ।बाह्यांशेन समन्ताच्चु वीथिकां

स्तम्भमालिनीम् ॥ १०२ ॥

नेत्रपट्टकृताटोपामन्तरं कारयेत् समाम् ।

वास्तुदेवविभक्तानि समद्वाराणि सर्वतः ॥ १०३ ॥

द्वाविंशतिर्महादेवि वेदितव्यानि चुम्बकैः ।

मरुत्पतिशुभं युग्मं मम क्षेमायुश्च दृक् ॥ १०४ ॥

ऐश्वर्या यत् पदं तच्च नार्हन्ति ततो नृप ।

Sampath_eBooks

स्वचित्तिकृतिवक्रस्थं गौर्या सौभाग्यकृन्मतम् ॥ १०५ ॥

धनवन्तं पदं चैव स्वेषुगं रत्नधातरि ।

सर्वावाप्तिकरं तद्वन्निधिधातृपरि स्थितम् ॥ १०६ ॥

सुकवाटकृताटोपं चतुर्द्वारं प्रशस्यते ।

एकयुग्मरतिं वाथ शुभमेकमुखं गृहम् ॥ १०७ ॥

नौवासवीथिकं कार्यं कार्यं भद्रसमायुतम् ।

युग्मभागं तु दैर्घ्येण भागमानन्तु विस्तरात् ॥ १०८ ॥

भद्रमेकं प्रकर्तव्यं द्वित्रीणि चतुरोऽथवा ।

नित्यार्थं सुमतिः कार्या भद्रभितिस्सरस्यगा ॥ १०९ ॥

पक्षौ चानवनौ धार्यौ गजोष्ट्रसदृशौ समौ ।

मध्ये भारतुला देया भित्तिस्तम्भविदारिता ॥ ११० ॥

तदूर्ध्वे लंबिपटलमारूढं चादकृन्मतम् ।

तृणमण्डपरुद्राणामेतल्लक्षणमीरितम् ॥ १११ ॥

पक्वेष्टानां यथेष्टोर्ध्वं सप्रणालं शुभावहम् ।

उच्छ्रायाद्भित्तितुल्यन्तु द्वारं विस्तारसम्मतम् ॥ ११२ ॥

एकशाखं द्विशाखं वा त्रिशाखोदुम्बरान्वितम् ।

गृहाननं प्रशस्तन्तु सुललाटार्गलान्वितम् ॥ ११३ ॥

रुचको वज्रकश्चैव वह्योऽतिवज्रः प्रलीनकः ।

मन्थानो मन्मथश्चैवषडेताः स्तम्भजातयः ॥ ११४ ॥

रेखाग्रन्थिश्च तारोप्य स्तम्भानां कोशमध्यगाः ।

कोशमध्यसमारोपा द्विधा देवादनिष्टता ॥ ११५॥

भवते साधकेन्द्राणां क्रियामार्गविधायिनाम् ।

परधोमुखस्यास्य ह्यघोरीनवकं शिरः॥ ११६॥

साक्रन्दनं रौरवञ्च स्कन्धयोः संप्रतिष्ठितम् ।

सव्यदक्षिणगानीव गणकौमारसम्भवम्॥ ११७॥

वक्षो हृच्चापि कौडिन्यं वामनं याम्यकंकटी ।

नवकं भाद्रकालञ्च संस्थितं सन्निकृष्टयोः ॥ ११८॥

मर्माणि तस्य संत्यज्य कार्यो वाथ विधिर्बुधैः।

शिरो हृज्जठरं ग्रीवा नाभिर्नेत्रौस्तनान्तरे॥ ११९॥

पादहस्ततलान्यत्र मर्माणि प्रसराणि तु ।सर्वमेवं निरूप्यादौ कृते

यागनिकेतने॥ १२०॥

मध्ये सद्वेदिका कार्या द्वादशाष्टाङ्गुलाथवा ।चतुर्भिर्वासमुत्सेधाद् विस्तरे

रुत्युच्चाटकृन्मता॥ १२१॥

व्याघात ः कर्णी नित्यं प्लवान्तो नूनपान्मही

व्याधिर्मृत्युविधातारी सव्याबुप्लवयोगगा ॥ १२२॥

नैकायां वेदिकायान्तु प्लवां वै सर्वभूमिषु ।आश्रयोद्यतचित्तस्तु मृगयेत

शुभाशुभम्॥ १२३॥

निष्पन्ने मण्डले धाम्नि भद्रेष्वग्निगृहाणि तु।

Sampath_eBooks

स्थाणुना सूत्रणीयानि सिद्धान्यस्मिन् शिरश्छिदे ॥ १२४ ॥

वेदियोन्यर्द्धचन्द्रञ्च त्र्यस्रवृत्तं षडस्रकम् ।सरोजमष्टकर्णञ्च कुण्डमष्टविधं स्मृतम् ॥ १२५ ॥

सूत्रास्याग्निमये क्रूरे ह्यज्वले जन्मजन्मनि ।

भूतेशेव स्थितिः कार्या ज्ञातव्या चुम्बकेन तु ॥ १२६ ॥

भूभृत्सौभाग्यशान्तिश्च दाहसन्तापकामदम् ।

अस्थैर्यं मन्दिरात् सिद्धिः कुर्यादेतदुपासनात् ॥ १२७ ॥

प्रागग्निदक्षिणे वृत्तमविरुद्धे विभूतिदम् ।वासान्तकान्तयोनिश्च सर्वसौख्यप्रदायिका ॥ १२८ ॥

देहाष्टकार्णमन्योन्याश्रया ं शुभसरोरुहे ।

खण्डेन्दुप्रत्यगग्नौ च शान्तिकर्मणि शस्यते ॥ १२९ ॥

क्षेत्रं वेदी समाख्याता गृहानामाशुशुक्षणिः ।

मलभेदगतं जीवं साध्यधर्मेषुगं ततः ॥ १३० ॥

प्रागुक्तक्रमशो देवि मध्यबिन्दोस्ततः सुधीः ।

ज्येष्ठद्वादशकाम्नातसूत्रेणाशाचतुष्टये ॥ १३१ ॥

प्राक्क्रमाच्चिह्नयित्वा तु कौशिकान्तकयोगतः ।

नेमिं कुर्यात् तद्वदेवान्यसन्धौ ह्युत्क्रमेण हि ॥ १३२ ॥

धर्मोद्योगाच्च मरूतो यक्षाधिपयोगतः ।

बिडौजश्चन्द्रसंयोगान्तिमिगीशं प्रसारयेत् ॥ १३३ ॥

Sampath_eBooks

सूत्रस्थानात् तदूर्ध्वे तु तुर्यकर्णे प्रसारयेत्।

तुर्यङ्गुलसमास्तिस्रो मेखला ः वर्तयेद् बुधः॥ १३४ ॥

वदनाङ्गुलादिमस्यादियुग्मगा व्योम वेदगा।संस्कारगा तृतीया तु भूर्लक्ष

णमिदं मतम्॥ १३५॥

वितानोच्छ्रायसं यत्तु तद् भवेच्चतुरङ्गुलम्।

दक्षिणे पश्चिमे वाथ नाभिः कार्या विपश्चिताम्॥ १३६॥

अन्तश्च मेखला मध्यादङ्कयेद् द्वादशाङ्गुलम्।

बाह्या या मेखला तस्या बाह्येद् द्व्यङ्गुलनिर्गमात् ॥ १३७॥

समन्तान्नाभिरुद्दिष्टा द्वादशाङ्गुलमानगा।स्वयोनिलक्षणं नाभिकुण्डानां

शुभदा मता॥ १३८॥

अविरुद्धाथवा कार्या सर्वास्वपि भगाकृतिः।

तुर्यकर्णा तु या योनिस्तस्या उभयपक्षयोः॥ १३९॥

चिह्नाष्टाङ्गुलमानन्तु बाह्यजानि तथैव च।पक्षचिह्नोदलीकृत्य प्रा

क्न्होऽपि दशाङ्गुलम्॥ १४०॥

तदग्रनाभिपक्षाङ्करेखापाते कृते सति।पक्षरेखा द्वितीया तु निपात्या

चुम्बकेन तु॥ १४१॥

नाभिबाह्यागते ह्येवं निर्णीते मेखलायुगे।नाभ्यं तत्तन्मुखं कार्यं

षोढाभागविभाजितम्॥ १४२॥

मेखलाग्रेऽङ्गुलावाम जीवपार्श्वगताकयोः ।

तद्बाह्ययोश्च कर्तव्यो रेखापातो भगाकृतिः ॥ १४३ ॥

एवमेतच्छुभं कुण्डं सर्वमङ्गलसंज्ञकम् ।निष्पाद्यो मेखलाबन्धः

कार्योंषाष्टकजोऽथवा ॥ १४४ ॥

रक्षोमरुद्दते ह्येतद्दिक्षु सर्वासु सुन्दरम् ।अत्र सन्निधिमायाति

मन्त्रहीनोऽपि पावकः ॥ १४५ ॥

त्वदनन्यजमैरेयमदाकृष्टहृदा मया ।प्रकाशितमिदं देवि कुण्डं कु

ण्डाधिनायकम् ॥ १४६ ॥

नित्यनैमित्तिके चैव गर्तेऽस्मिन् द्वादशाङ्गुले ।

काम्ये तु त्रिगुणा कार्या लक्षहोमे महेश्वरि ॥ १४७ ॥

लक्ष्याधोहोमयेद् वास्तुकुण्डे काम्यमधीश्वरि ।

पक्षात्पञ्चदशान्ते तु द्वे हस्ते जुहुयाद् बुधः ॥ १४८ ॥

गुणहस्ते तथा देवि तदूर्ध्वं यावत् त्रिंशति ।

दशलक्षैकहस्ताद्या कुण्डवृद्धिः प्रशंसिता ॥ १४९ ॥

तुरीययुगहस्तं तु यावदूर्ध्वं न कारयेत् ।

कोटिहोमादिको होमो होतव्यस्तत्र साधकैः ॥ १५० ॥

त्रिहस्ताद्यग्रयोनीनां षडङ्गेऽनङ्गमेखला ।

त्रिंशत्या दशवृद्ध्या तु नाभ्यङ्गुलमितिः शुभा ः ॥ १५१ ॥

यन्मानमग्नियोनीनां तद् ग्राह्यं तु समेखलाम् ।

मेखला योनिरूपा तु तद्भिन्नवपुषः शुभाः ॥ १५२ ॥

एकाद्यष्टाङ्गुलं यावत् कण्ठान्वाभ्याद्दता प्रिये ।

स्यातां कुण्डाष्टकस्यापि तदधः कुण्डलोष्ठवत् ॥ १५३ ॥

भास्वत्संसारज्येष्ठा वा नाभिः स्यादेकहस्तके ।

एकपाणीमिति द्विगुणा द्विहस्तापि प्रशस्यते ॥ १५४ ॥

समसुखाम्बिका पत्रनयनाङ्गुलमूर्ध्वतः ।

कर्तव्यं मेखलावृन्दं कुण्डे वै पञ्चमेखले ॥ १५५ ॥

युगकेसरिपक्षैश्च तथा चैव त्रिमेखले ।तुर्यांशमेखलं हस्तं प्रशस्तं चैकमेखलम् ॥ १५६ ॥

मेखलानां समस्तानां वितानोदग्रता सदा ।ददाति वाञ्छिताान् अर्थानान वासा हिंसति प्रिये ॥ १५७ ॥

लभ्यते कारणावाप्तिर्विभक्ता या च मेखला ।त्रिमेखले त्रिनेत्रत्वं क्षेत्रज्ञ त्वमथेतरान् ॥ १५८ ॥

प्रागिवाप्यथ जीवाग्रे सरोषं तूलयोनिग ।निष्काम्य बाह्यतो लक्ष्यं आगाखण्डेऽथवा प्रिये ॥ १५९ ॥

कर्णात् कर्णान्तरैः सूत्रैर्मध्यं मध्यं महामते ।आग्नेयशकलस्यान्तः स्थिरो वामकरो गिरिः ॥ १६० ॥

मरुन्मतां ममाद्याम्यं भ्रामयेद् वा सङ्गमे ।तथैव ऋषभोः खण्डो यमतो जलसङ्गमम् ॥ १६१ ॥

पृष्ठो जीवं प्राक्प्रकृत्यां सङ्गमोपरि रेखया ।

Sampath_eBooks

योनिरेषा समाख्याता प्रागग्राद् वा प्रवर्त्तयेत् ॥ १६२ ॥

वेदीं कृत्वा दशाङ्गान्तु ह्यन्तर्भागाष्टकेन च ।भ्राम्य सव्यापसव्यं तु रत्नधातरि चान्तके ॥ १६३ ॥

भागे कान्तगता ँ देया रेखैका पक्षरेखगा ।

खण्डेन्दुः सिद्ध्यते ह्येवं ततस्त्र्यंशं विचिन्तयेत् ॥ १६४ ॥

कारणांशं बहिर्दत्त्वा मलभिर्जीवकोटिगम् ।तदब्देवं पुरि त्यज्य धक्ष पोस्वाङ्कयेद्बुधः ॥ १६५ ॥

तत्र त्रयं त्रिकोणं स्यात् स च ब्रह्म समन्ततः ।

कालावययमेकेन बहिस्तौ वर्तुलं क्रमात् ॥ १६६ ॥

पूर्वांशकं बह्निर्दत्वा कुम्भयोरथ भागयोः ।धर्मेन्दुभ्यां तदर्धञ्च प्रागङ्काद् ब्राह्मणोऽङ्कयेत् ॥ १६७ ॥

प्रागङ्कब्रह्ममानेन सव्योत्तरदिशोः प्रिये ।पश्चिमेऽप्येवमेवं हि ब्रह्मप्रत्यग्विलेखतः ॥ १६८ ॥

ब्रह्मोर्ध्वे सूत्रषट्केन षट्कोणं सिद्ध्यते शुभम् ।

चतुर्भागविभक्तायां कुर्याद् वृत्तचतुष्टयम् ॥ १६९

मूलयोनौ ततः कार्या कोणरेखा विपश्चिता ।रेखापातः पुनः कार्यो मध्यतो जवकोणयोः ॥ १७० ॥

रेखाषोडशकेनैव दलं स्यात् तत्र रेखिणाम् ।दलाग्रं सङ्गतिः कार्या कर्तुः रेखानुरेखयोः ॥ १७१ ॥

दलसन्ध्यन्तरं प्लोषा कुण्डस्यादम्बुजाकृतिः।द्विगुणीकृतरुद्रांशं क

र्णात्कर्णं कर्णे विलोकयेत्॥ १७२॥

तैर्मत्स्यैश्चतुरस्रन्तु मध्ये त्र्यस्रं प्रसाधयेत्।

तत्क्षणांकितजीवाय प्राग्दक्षश्चैव पश्चिमात्॥ १७३॥

प्राचीन्दु विधोर्गजगा सूत्रतुर्यान् प्रसाधयेत्।

अष्टकोणं हि गर्भस्थं रेखाभङ्गं महीपते॥ १७४॥

कुण्डाष्टकमिदं प्रोक्तं सद्याब्दैरासनादिकम्।

मण्डलाष्टकमेतद्धि भवते द्वारयोगतः॥ १७५॥

अन्तर्भूमिदृढत्वाच्च सुसमं स्थंण्डिलाष्टकम्।

विदितसकलगुर्वाधानवेत्ता गुरुरमरेशगुरुप्रबोधारी।

नयविनयपरः शिवत्वलम्भो ं वितरति विविधैरनेकमार्गैः॥ १७६॥

इति भैरवस्रोतसि विद्यापीठे शिरश्चेदेश्रीजयद्रययामले महातन्त्रे चतुर्विं

शति साहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां त्रयोदशः पटलः॥ १३॥

चतुर्दशः पटलः॥

जयद्रथ उवाच।

कीदृक् संसारकृत् पाशः प्राणिनां दग्धदर्पकः।

संस्कार्यः कीदृशः शिष्यः एतदिच्छामि वेदितुम्॥ १॥

श्रीभैरव उवाच।

भैरवानल निर्दग्ध भूतसव्योग्र भोजनः।

महाभैरवशास्त्राम्बुपरिपूर्णमहोदधिः ॥ २ ॥

मूर्त्तिः मूर्त्ति शुद्धसुधाभासिक्रमप्राप्तक्रियावताम् ।चन्द्रेणैवाभिषेकेन

ममेवालंकृता कृतिः ॥ ३ ॥

विप्रविद्धर्मचर्या वा सर्वविच्चान्तिकृन्मनः ।

नानादेह रूह श्रीमानार्यभाषाविशारदः ॥ ४ ॥

समग्रावयवोत्तुङ्गललाटो रक्तलोचनः ।

मृदुस्निग्धशिरोजन्मभृदगकुटिलश्रियः ॥ ५ ॥

लहरीग्रन्थिर्जटावान् शिखीटोपशिरोऽथवा ।

वक्षोरस्कवितानाङ्गो देवीपुत्रोन्नतत्रिकः ॥ ६ ॥

आयामदोषणीपीनः स्वाङ्गुलिस्वनखेदुरः ।

स्निग्धैकद्वित्रिलोमोतः सुजङ्घमृदुपादुकः ॥ ७ ॥

त्वगक्षिनखदन्तानां स्निग्धधाता प्रसन्नगुः ।

विद्यापञ्चकविद् वीरः कलाविद् विशदोरुरुक् ॥ ८ ॥

कान्तो भद्राकृतिर्धीमान्नयशास्त्रैकरञ्जितः ।

कामनिद्रानिषेवी च न शब्देन निशाटनः ॥ ९ ॥

जाग्रधारभयात्यर्थो दुष्टसंगी न चैव हि ।

सुनिमित्ततरुर्मानी स्वल्पकोपः कोन प्रियंवदः ॥ १० ॥

सुवृत्ताम्नायमृत्सृज्य स्मृतिधृतिनिभौऽन्तकृत् ।

योगशीलश्च तन्त्रेऽस्मिन् गुरुवत् पापवान् यतः ॥ ११ ॥

देवानुदेवतावह्निज्येष्ठस्वामिप्रपूजकः ।

अभ्यागतजने नम्रो नम्रो नीचेऽप्यात्मयवीयसि ॥ १२ ॥

सत्रत्रयप्रयोक्ता तु सर्वसत्त्वहिते रतः ।

विषयी स्नातकः सद्मी रूपस्वी वा प्रशंसितः ॥ १३ ॥

आराध्याराधकस्तालश्चरुभुग् वा महेश्वरी ।

आम्नायानुग्रहायातसर्वाणूनां सनिर्वृतः ॥ १४ ॥

पराद्वयपदावस्थः शून्यतत्वेति निश्चितः ।

तत्वानुभवशैवेषु न दृष्टद्वयगोचरः ॥ १५ ॥

लोकाचारनिरापेक्षो वामाचारकृतास्पदः ।

विषयी विषया विषयासक्तः सर्वानुग्रहकृन्मतः ॥ १६ ॥

पण्यवर्णाङ्गनातन्त्रीप्राप्तभुग् वाथ स्नातकः ।

स्ववर्णान्नीचवर्णाच्च गृहस्थोद्वाहितो मतः ॥ १७ ॥

धराश्रयाश्रयः सो हि लोकसंवृत्तिसंस्थितः ।

गरीयसि पदे चिन्ता ह्यथवास्य सदा यतः ॥ १८ ॥

अतोऽस्य तद्गरीयस्त्वं कुलमध्यनिरोधकम् ।

ब्रह्मचर्यरतो द्वन्द्वो निराकांक्षो जितेन्द्रियः ॥ १९ ॥

लिङ्गवांश्च स्मृतो लिङ्गी लिङ्गाराधनतत्परः ।

चतुर्णामप्यथैतेषां आराध्यादिविभिन्नता ॥ २० ॥

स्वयं चागतचित्स्वान्ता हैमवत्यवधारय ।

Sampath_eBooks

अथातः संप्रवक्ष्यामि तस्याराध्यस्य लक्षणम् ॥ २१ ॥

येन विज्ञातमात्रेण पशवो यान्ति निर्वृतिम् ।

शिववत् सर्वशास्त्राणामाराध्यःआराध्यः शिवपूजकः ॥ २२ ॥

गुरुदेवाग्निभक्तस्तु मन्त्रतन्त्रविशारदः ।

ज्ञानविज्ञानसंपन्नो व्रतचर्याभिनन्दनः ॥ २३ ॥

महाभैरवपीठस्थः कलाकल्पितविग्रहः ।

मन्त्रपीठप्रणेता च तद्योगोयतमानसः - ॥ २४ ॥

क्रियाकालकरः श्रीमांश्चर्याव्रतसमुद्यतः ।

शान्तो दान्तो जितक्रोधो दम्भमायाविवर्जितः ॥ २५ ॥

शुचिर्दक्षो महासत्वं सुप्रसन्नमनाः सदा ।रुद्रवेशधरो नित्यं

जटाभस्मतनूज्वलः ॥ २६ ॥

मैत्रीकारुणीको वीरो ह्यप्रमादी सुनिश्चितः ।

प्रारब्धस्यान्तनिर्वाही वितृष्णो ज्ञानविद् बुधः ॥ २७ ॥

सर्वभोगविलासाढ्यप्राप्तदुःखपराङ्मुखः ।

शैवागमप्रवक्ता च भूतगारुडयोस्तथा ॥ २८ ॥

योगशास्त्रप्रबुद्धश्च शिष्यानुग्रहतत्परः ।

मन्त्रदानादियुक्तो यः कुलीनः सर्वकर्मवित् ॥ २९ ॥

दृष्टक्षेत्रप्रभावश्च जीर्णविद्याव्रतोत्सुकः ।

विरक्तः सर्वभावेषु स्थितिमात्रावलंबकः ॥ ३० ॥

जीवन्मुक्त इवातिष्ठेन्न च भोगेषु रज्यते।

आरोध्यैष समाख्यातः सर्वलक्षणसंयुत ः॥ ३१॥

राज्यवत् सर्वभूतानां भयाभयनिकेतनः।

पशुपाशपतिज्ञानाद् भुक्तिमुक्तिफलप्रदः॥ ३२॥

वर्ततेऽस्य यथा स्वेच्चा तदेव तु शुभं व्रतम्।

भाषते यद्यथा किञ्चित् कश्चित तदेव फलदं ततः॥ ३३॥

आराध्यो देवदेवानांविद्येशो वै स योगिनाम्।

मन्त्रपीठपतिर्ह्यस्मात् तेनाराध्यः प्रकीर्तितः॥ ३४॥

मन्त्रपीठं विजानाति नाराध्योन्मीलनं क्वचित्।

आचार्यः स विधौ ज्ञेयः पूर्वलक्षणलक्षितः॥ ३५॥

विद्यापीठेऽधिकारस्य नाद्योऽनुग्रहकृन्मतः।

आचार्यः संहितार्थज्ञः आचारपथसूचकः॥ ३६॥

आराध्यवत् स्वतन्त्रस्तु व्रतचर्यां न कारयेत्।

मन्त्रपीठं न जानाति सदा विद्याव्रतस्थितः॥ ३७॥

विद्यापीठाधिकारी च स आराधक उच्यते।शतधा भेदमायाति ज्ञ

ानचर्याव्रतक्रमात्॥ ३८॥

चुम्वकस्तालकश्चैव चर्याशी च तृतीयकः।

चरुश्च त्रिविधो यस्मिन् सिद्धः साध्यो गुणात्मकः॥ ३९॥

सिद्धो जात्यात्मकः प्रोक्तः साध्यो व साध्या यः स्रसितोन्नतिः।

गुणात्मकस्तु विज्ञेयो योगजः सुमहौषधैः ॥ ४० ॥

आराध्यो यः गुरुः प्रोक्तो सर्वशास्त्रार्थभासकः ।

आराधकस्य ते ख्याताः किन्तु स्वातन्त्र्यवर्जितः ॥ ४१ ॥

दीक्षां व्याख्यां न कुर्वीत प्रतिष्ठां नैव कारयेत् ।

मन्त्रपीठविधानेन विद्यापीठाधिकारकृत् ॥ ४२ ॥

चुम्बकास्तस्य संहाभ्या भेदश्चान्योऽपि विद्यते ।

साध्यमन्त्ररतो वाग्मी व्रतचर्यासमन्वितः ॥ ४३ ॥

क्षेत्रात् क्षेत्रान्तरं गच्चेन्न च यागान्तरं क्वचित् ।

मन्त्रमुक्तिप्रदाता च सुसहायोऽपि योगवान् ॥ ४४ ॥

तथैकादशसंस्थानसंप्रदायोपदेशकः ।

समिश्रश्चुम्बकः प्रोक्तस्तन्त्रेऽस्मिन् रावणार्चिते ॥ ४५ ॥

सर्वशास्त्राणि जानाति गुरोर्मन्त्रपरिग्रहात्

व्रतचर्याभ्यनुज्ञाता आराध्येन महात्मना ॥ ४६ ॥

ततः प्रभृति क्षेत्रस्थो जितद्वन्द्वो जितेन्द्रियः ।

कश्चिद्देशं परिगृह्य शिवलिङ्गविवर्जितं ॥ ४७ ॥

भिक्षाप्राप्तामिषाहारो जपध्यानार्चने रतः ।

बालकःतालकः स तु विज्ञेयः साध्यसाधकतत्परः ॥ ४८ ॥

संहितां नैव जानाति शास्त्रैकादशवस्तुवित् ।

आराध्यात् स्वाप्तविद्यस्तु सकृत्संस्कारसंस्कृतः ॥ ४९ ॥

एकस्मिन् संस्थिते मार्गे ह्येकाद्वैतसमाश्रितः।

रक्षाकल्पितदेहस्तु चरुभुक् काश्यपो भ्रमेत्॥ ५०॥

शृणुयान्नान्यशास्त्राणि न स्रोतांसि रसक्रियाम्।

चर्यामार्गेण भुञ्जानश्चरुं ध्यात्वा सकृत् सकृत्॥ ५१॥

पात्रस्थं व पात्रस्लं विद्यया लब्धं न तद् भुङ्क्तेऽन्यथा क्वचित्।

सर्वाशी ह्येव सर्वाशी योगिमातृगणार्चितः॥ ५२॥

चरुभोक्ता क्वचित् तन्त्रे चुम्बकश्चानुदाहृतः ।

दीक्षितोऽत्रानुगोलाशी चरुभुक् परिकीर्तितः ॥ ५३॥

त्रिविधोऽपि महादेवि साधकः परिकीर्त्तितः।

एतेभ्योऽन्यो व्रती नास्ति यः पीठस्थो निगद्यते॥ ५४॥

अथातः संप्रवक्ष्यामि शिष्याणां लक्षणं परम्।

येन विज्ञातमात्रेण अधिकारः प्रवर्तते॥ ५५॥

गुरुयोग्ये गुरावुच्चैर्योऽधिकारः शिवात्मकः।

प्रागृतुः परमेशेन गुरुविग्रहरूपिणा॥ ५६॥

आराध्योऽपि तदन्यस्मिन् प्रदद्यात् संस्कृतात्मने।

संस्कारोऽपि भवेत् तस्य यो न ध्यातः शिवेच्छया॥ ५७॥

अनुध्यानांशकालस्य कर्मभोक्तुरिहेष्पते।जन्मन्यपश्चिमे प्राप्ते समे कर्माण योगतः॥ ५८॥

निमित्तमिदमापेक्ष्य शिवज्ञानं प्रवर्तते।येनोन्मीलितसद्भावः परं

निर्वेदमृच्छति ॥ ५९॥

कस्त्राता कुत्र वा यामि कस्याहं का मयि स्थितिः।

किं वा चास्याः करिष्यामि कस्मादेतच्चराचरम्॥ ६०॥

उल्लंघ्य केन वा यास्ये को वा तादृक् कथं हि सः।

समानुग्रहभावेन भवते न भविष्यति॥ ६१॥

नरो विकल्पसङ्कल्पैर्नानाभावविचेष्टितैः।

एवं शक्तिसमावेशाद् ग्रहग्रस्त इवोद्यते ॥ ६२॥

ततोऽन्यासां बलं हत्वा यश्चान्यप्रतिबन्धकम्।

नयत्याराध्यविषयं यं दृष्ट्वा विगतक्लमः॥ ६३॥

भावयेन्मुक्तमात्मानं नान्योऽनुग्रहकृद् भवेत्।

पुनरालब्धदेहानां ध्वस्तसंहारशालिनाम्॥ ६४॥

विनयेनोपपन्नानां भुक्तिर्मुक्तिर्नदूरतः ।

आराध्यस्यापथावेशः परमेशोऽभिजायते ॥ ६५॥

संसारकीटमेत्तत्तु तु परशक्तिप्रबोधितम्।

अनुगृह्णाति संक्षेपात् परस्परविधानतः॥ ६६॥

करणानीतमेथैव जृम्भतेऽनुग्रहं प्रति।

एतद्यस्य भवेच्चिह्नमनुग्राह्यः स सर्वदा॥ ६७॥

तस्य संस्कारयोग्यत्वं नान्यस्यान्यायदर्शनात्।

देवदानवगन्धर्वान् पिशाचोरगकिन्नरान्॥ ६८॥

ब्राह्मणक्षत्रियवैश्यशूद्राणाञ्चैव सुन्दरि ।
संकीर्णजात्यसंकीर्ण योषितो वा नपुंसकम् ॥ ६९ ॥
भोगभुग् जाग्रतं वृद्धं वालवालिशतस्करम् ।
प्रवासिनं विपन्नं च स्तंभं पशुगश्च यत् ॥ ७० ॥
दीक्षयेद् भक्तिभावं तं तीव्रशक्तिप्रचोदितम् ।
तथा तीव्रतरापात्रमन्दमन्दतराख्यया ॥ ७१ ॥
अनुध्यानेन ये निम्ना चतुर्धा शक्तिचोदिता ।
पृथग्भेदेन संस्कारास्तेषां कुर्याद् गुरूत्तमः ॥ ७२ ॥
अथ प्रलपितेन किं भूयसा यद्यपश्चिमम् ।
शक्त्याघ्रातो भवेद् युक्तः सोऽप्यनुग्रहभाङ् मतः ॥ ७३ ॥
तीव्रशक्तिपदाविष्टं चुम्बकत्वे नियोजयेत् ।
तीव्रतीव्रतराविष्ट आराध्यत्वेव सुन्दरि ॥ ७४ ॥
मन्देनाराधकत्वेन त्रिविधं यन्मयोदितम् ।
मन्दमन्दतराविष्टःसमयी स भविष्यति ॥ ७५ ॥
समयादिवसंस्कारैरूर्ध्वोर्ध्वगमनुक्रमात् ।
अधिकारोऽप्यथैव स्यान्न तु व्युत्क्रमलम्भनात् ॥ ७६ ॥
भावैरेतैः परीक्ष्यादौ ततो दीक्षां समारभेत् ।
शिष्ये विनयसंपन्ने दम्भमायाविवर्जिते ॥ ७७ ॥
जितद्वन्द्वे जितक्रोधे जितशोके ह्यलोलुपे ।

रागद्वेषविनिर्मुक्ते प्रारब्धस्यान्तगामिने ॥ ७८ ॥

सुप्रतिष्ठितकाये च सत्यवाङ्खांतचेतसि ।

सुहृत्सद्भावशीले च भवमूलपराङ्मुखे ॥ ७९ ॥

स्वधर्मवत्पनूचाने देवाग्नि गुरुपूजके

गुरुवाक्यानुगामी च गुरोः शुश्रूषणे रतः ॥ ८० ॥

गुरुं संस्मरते नित्यं सदैव हि मुखारणिम् ।

गुरोर्दासत्वमापन्नो वाङ्मनःकायकर्मभिः ॥ ८१ ॥

विज्ञानमथ संपत्तिं प्राणानेकं त्रिकं सदा

गुर्वर्थं धारयेद् यस्तु स संस्कारारुहो भवेत् ॥ ८२ ॥

मन्त्रसिद्ध्यारूढः सो हि निर्वाणाय च सुन्दरि ।

ज्ञानविज्ञानसंपन्नः सर्वावस्थोऽपि मन्त्रवित् ॥ ८३ ॥

अनुग्राह्यो जडस्यानुमन्त्रसिद्धिकरः स्मृतः ।

न दुष्टोऽधमः शिष्यः प्रागुक्तगुणवर्जितः ॥ ८४ ॥

मायाविनयसंपन्नः प्रत्यक्षस्तुतिकारकः ।चुम्बको तत्वनुग्राह्यो यदि वागीश्वरो भवेत् ॥ ८५ ॥

निन्दते यो गुरुं माञ्च शिवमग्निं महामखम् ।स याति नरकं घोरं सर्वसंस्कारवर्जितः ॥ ८६ ॥

न मन्त्रास्तस्य तिष्ठन्ति पूजादानतपःक्रिया ।

निर्दहेत गुरुः सर्वं यदि शिष्यो करिष्यति ॥ ८७ ॥

नास्ति रक्षा सुरेशानि गुरुमन्त्राग्निनिंदके।
अफलस्येव वृक्षस्य पुष्पकन्दं वृथा भवेत्॥ ८८॥
तस्मात् सर्वप्रयत्नेन त्रिषु भावः समाश्रितः।
नयत्यूर्ध्वमसंदेहो यत् तत् पदमनिन्दितम्॥ ८९॥
यदेतद्भैरवं देवं यत् सदेवो भवोद्भवम्।
व्योमव्यापी परः शान्तः आराध्यः स तु दैशिकः ॥ ९०॥
त्रयीव विघ्नहा क विघ्नहा योगी तेजोनिधिवपुर्मतः।
स सर्वार्थपवित्रस्तु द्विविधोऽप्यत्र शासने॥ ९१॥
येन येन तु संस्पृश्य स्पृशेद् यद् यद् यदाश्रितम्।
चक्षुषा पश्यते यच्च यस्मिन् वा तिष्ठते क्षणम् क ॥ ९२॥
शिवतत्वानुभावेन दीक्षितं तद् भवेत् प्रिये।
कर्मास्याक्षिप्तं तुष्टं शिष्टमारोपितं यतः॥ ९३॥
दीक्षितः प्रोच्यते देवि संपर्काद् दैशिकस्य तु।
भूतं भव्यं भविष्यञ्च कुलानां तारयेच्चतम्॥ ९४॥
एकाह्नं तिष्ठते यत्र तत्तीर्थं तत् तपोवनम्।
तेनाघ्रातं पदालीढं स्पृष्टमालोकितं च यत्॥ ९५॥
सोमद्रव्यं भवेत् तद्धि चरुप्रोडात् शतां व्रजेत्।
आराध्याः ये क्रमाचार्यास्तत्प्रसादेन सिद्धयः॥ ९६॥
सर्वाः एव समाप्यन्ते राजन्नन्यत् परित्यज।

Sampath_eBooks

उदितमनंतशास्त्रजलधेर्विकृष्य शतोरुशिशुलक्षणं ॥ ९७ ॥

स्फुटतरं स्फुरितवन्तु बहिः ।

यदुपनियोगयायि शिवसात्म्यविधावतुलं तदखिलमद्रिपुत्रि

कथयाम्यधुनापि तव ॥ ९८ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां चतुर्दशः पटलः ॥ १४ ॥

पञ्चदशः पटलः ॥

श्रीभैरव उवाच ।

अथातो वच्मि संक्षेपात् क्रमात् स्नानकदंबकम् ।

वृत्तमेतत् परिच्छन्नं समन्ताच्चतुरङ्गुलम् ॥ १ ॥

अपनीयास्त्रमन्त्रेण खात्वा मृद् गाहयेत् सुधीः ।

धौते रोधसि संस्थाप्य धारारोधसि विस्तरे ॥ २ ॥

स्रगक्षतकुशांश्चैव हृदायुधगुणेन वा ।

समुच्चार्या त्रिशक्तिश्च दशातान्यवलोकयेत् ॥ ३ ॥

ततस्तु दृष्टिरूपिण्या महापीयुषमुद्रया ।

प्रप्लाव्यायुधजप्तानां पिङ्गलेनावगुण्ठयेत् ॥ ४ ॥

स्वभावपरितोषान्तं कृतशौचोभयः सुधीः ।

मृदर्धेनास्त्रजप्तेन कृत्वा स्नानं मलापहम् ॥ ५ ॥

स्वाचान्तस्तु कृतन्यासो विधिनाम्ना समारभेत् ।

तदर्धं वामहस्तेन त्रिविभक्तं करे परे ॥ ६ ॥

प्रागग्रप्रमाणस्थं विद्याङ्गगुणघातकैः ।

समालभ्यास्त्रजप्तेन प्रक्षिपेत दिशो दशः ॥ ७ ॥

आच्चादनं प्रकुर्वीत भागेन ज्वलनर्चिषा ।

अङ्गामङ्गाभिजप्तेन समन्तादवगुण्ठ्य तत् ॥ ८ ॥

विद्याजप्तेन कल्पादौ तीर्थं तीर्थवरोत्तमम् ।

निमज्जयेत् ततस्तस्मित् स्वेच्चयाराधकेश्वरः ॥ ९ ॥

आमोदामलकाद्यैस्तु हरिद्रापिष्टकेन वा ।

धराश्रयोपचारेण लिङ्गहीनं क्रियाश्रितम् ॥ १० ॥

जपेद् विद्येश्वरीविद्यां स्नानं कृत्वा श्रियावहम् ।

विच्चै ये ततो मूर्ध्नि स्वच्चवारिभृतं सुधीः ॥ ११ ॥

स व्योमपाणिरचनासुवद्धांशु घटक्रियाम् ।

विद्याभुवौ षद्धचाराद् वपुः संप्लाव्य सर्वतः ॥ १२ ॥

ततोम्बुतः समुत्तीर्य कौपीनमथवान्वरम् ।

संयम्य पाणिपादौ च मृदद्भिः क्षालयेत् ततः ॥ १३ ॥

उत्थितश्चोपविष्टो वा मूलवद्धं विकर्षयेत् ।

विद्याद्यं कुशमन्त्रेण विद्यातीर्थं ततः परम् ॥ १४ ॥

द्विराचम्य ततस्तस्मिन् मालया तद् वदाथवा ।

करावायुधसंशुद्धौ विधायामृतसंप्लुतौ ॥ १५ ॥

तत्तले विन्यसेन्मालां तदङ्गानि ततः क्रमात्।

यवीयस्यां गुहां न्यस्य जीवांतां विमलादिकाम्॥ १६॥

स परारोपिते मूर्ध्नि योगिनाम्नि हरादिके।

क्रूरान्ता चूलिकादिर्या भवाद्यन्तरयोरपि॥ १७॥

बोधनानां वपुः श्यालं तारादिश्च तदन्तयोः।

आवर्मान्ता च तृक् स्थाप्या घोषाद्याङ्गुष्ठमूलयोः॥ १८

खचरमस्त्रमुग्रादिमुदगादिंच पूजयेत्।

ज्ञानं संचादितं कृत्वा तदूर्ध्वे करसंपुटम्॥ १९॥

ततो ज्ञानात्मके काये हृत्मस्तकशिखातनौ।

दृक्पाण्योश्च यथान्यायं विभागान्मदिरादयः॥ २०॥

न्यस्तव्या शास्त्रपर्यन्ता स्वच्चस्थानावभासकः ः।

बीजसंवीजितेऽङ्गानि विद्याङ्गवदुपाचरेत् ॥ २१॥

वपुष्पास्त्रसमायोगः ककुब्जाले सिते सति।

भस्मं कुर्यान्मलस्नानं स मुहुस्तापसो यदि॥ २२॥

नासावतकमेष्टं वा धरणीजमथापि वा।

क्षेत्रजं वा विरक्तानां शस्तं भस्म तपस्विनाम्॥ २३॥

तदालभ्य तमालेन खड्गाग्निकनकत्विषा।

तेन मूर्ध्नास्य हृद्गुह्यपादान्तं गुण्ठयेत् क्रमात्॥ २४॥

ततः क्रमहृदोद्धूल्य विद्यया सेकमाचरेत्।

Sampath_eBooks

भस्मनैव विधानेन प्रागुद्दिष्टेन सुन्दरि ॥ २५ ॥

कौपीनमपनीयान्यत् परिधार्य च निर्मलम् ।

निर्णीर्जित करांघ्रिस्तु फेनोष्कत्वविवर्जिते ॥ २६ ॥

वार्भिराचम्य यत्नेन पूर्ववन्मरुराष्ट्रजः ।

कृतपाणितनुर्न्यासस्ततः सन्ध्यामुपासयेत् ॥ २७ ॥

विद्याविद्याङ्गविक्षिप्तैर्वामहस्तच्युताम्बुभिः ।

परिमृज्य स्वशिरसि पाणिना दक्षिणेन तु ॥ २८ ॥

तत्पश्चात् पूर्वसञ्चारमपसव्येन पाणिना ।

वारिं उत्सृज्य मेधावी वारिणा पूरिताञ्जलिः ॥ २९ ॥

कुर्याद् रवेरूपस्थानं अञ्जल्यो भुवि मोचनात् ।

कृताघमर्षणक्षेप उपस्थाने कृते सति व सभि ॥ ३० ॥

भास्वन्मन्ण्डलमध्यस्थं मन्त्रचक्राभिनात्मवान् ।

जपेद् विद्येश्वरीं देवीमेकोच्चारादघापहाम् ॥ ३१ ॥

शतं शतार्धधर्मं वा रूपमेकमथापि वा ।

दशैकरूपकं वाथ जप्त्वा गायत्रसङ्गते ॥ ३२ ॥

कृतप्रदक्षिणो भक्त्या स्वभिवन्द्य मुहुर्मुहुः ।

कृत्वा भास्वत्स्थितं स्वच्चं तर्पयेन् मन्त्रसंहिताम् ॥ ३३ ॥

मूलमन्त्रांस्ततो देवान् तापसा क्रमशः पितृनू ।

सुमनोऽक्षततिलद्रव्यैः कुशहस्तौ हृदम्बुनाम् ॥ ३४ ॥

नमः स्वाहास्वधान्तेन मन्त्री व्यञ्जलिना सदा ।
प्रागुदग्दक्षिणस्यान्तु ऋजुसव्यापसव्यतः ॥ ३५ ॥
शाखाप्राङ्गुष्ठतर्जन्यो ततः सव्यापसव्ययोः ।
त्रिभिस्तीर्थैरिमैमन्त्रैः पाणिस्थैः संप्रतर्पयेत् ॥ ३६ ॥
गणा मातृगणा याश्च योगिनीरुद्रपन्नगान् ।
रक्षोभूतगणा होतास्तर्प्य कर्म हृदा बुधः ॥ ३७ ॥
पूर्ववद्धि समाचम्य कृतमन्त्रतनुर्मुहुः ।
मन्त्री तीर्थोपसंहारं प्रकुर्यात् पूरकेण तु ॥ ३८ ॥
प्राणायामादिना वाथ विशुद्धभक्तपुद्गलः ।
वपुरुत्सृज्य मेधावी प्राक्तनं शास्वरम् ॥ ३९ ॥
विधाय चित्तशक्त्या तु देवाधा चुप्लवप्लुतम् ।
विभाव्य दृग् दृशान्युच्चैर्मन्त्रस्नानमुपाचरेत् ॥ ४० ॥
बहिर्द्रव्यवपुर्गन्धशुच्यशुचिविकल्पतः ।
भावेनाद्वयकृद् गम्यं तावत् स्तनितमुच्यते ॥ ४१ ॥
भस्ममायोमयादुच्चैर्गुरुर्गौरितरं ततः ।
तस्मादुपेयमीशानि भावस्नानं प्रशंसितम् ॥ ४२ ॥
निर्विकल्पमहाबुद्ध्या द्वैतकायमहैनसः ।
निर्लेपास्तरवो यद्वन्मणयोमृतवान् द्विजाः ॥ ४३ ॥
लोकभोगाविरक्तानां लोकसम्भृतौ ।

स्नाने द्वे विकरे प्रोक्ते स्थाणूनां जलभस्मनी ॥ ४४ ॥

स्नानाच्च मनः शौचानि दिवाकृत्तर्पणानि च ।

मयोक्तो व्यवहारोयं तन्त्रसंरक्षणं प्रति ॥ ४५ ॥

अन्यथा विप्लुताचारैस्ततोभिस्तत्र लाघवम् ।

स्याद्धितल्लाघवाच्चापि तदुक्तां लघुतां व्रजेत् ॥ ४६ ॥

तस्य लाघवकर्तृणां यत्फलं स्यान्नगात्मजे ।

तत्वमेव हि कल्याणि स्वहृदा संविवेचय ॥ ४७ ॥

एवमेकतमेनायं स्नानस्नानेन चुम्बकः ।

हंति संयमिताशेषककुप्पंजरमध्यगः ॥ ४८ ॥

सङ्गच्च विमलां देवीं स्मरन् मनसि निर्मले ।

सप्ततन्तुमहाज्वालाद्वारोद्देशे ततः प्रभो ॥ ४९ ॥

निर्णीह्य स्वकरौ देवि प्राग्वदाचमने कृते ।

व्योमेवतारकाभिस्तु दीप्ताभिर्मन्त्रमूर्त्तिभिः ॥ ५० ॥

शरीरं लाञ्छयित्वा तु पिङ्गलास्त्रावगुण्ठिते ।

धाम्नि तच्चाखयोः पूज्यौ पालौ कङ्कमहारवौ ॥ ५१ ॥

इज्यश्चोदुम्बरे कूर्मो ललाटे भुजगाधिपः ।

हस्तपादतलास्फालं प्रविशेत् सममुत्सृजम् ॥ ५२ ॥

पूजायां कर्म हृन्यस्त क्प्रवेशस्तं नृपात्मज ।

मन्त्रकर्महृदो योगो दृश्यतेऽसौ स्वगोत्रवित् ॥ ५३ ॥

नभोजित् खड्गदण्डं वा तत्पदं स्यात् क्रियावहम्।

प्रविश्येज्यागृहांतस्थं वीक्ष्य विज्ञानचक्षुषा ॥ ५४ ॥

पुनर्यदुत्तरेणैव प्रवेशो वामशासने।वामपाणिप्रमोक्षश्च स्त्रजानाराचमुद्रया

॥ ५५ ॥

भुवोऽन्तरिक्षविघ्नानां शस्त्रहुङ्कारयोगतः।

प्रध्वंसयोगयुग्मेन ककुभां शमने पुनः ॥ ५६ ॥

शंसितं चुम्बकेन्द्राणां क्रियाक्रमविधायिनाम्

अत-आत्मभुवो याम्ये रुचिरासनसंस्थितः ॥ ५७

कृत्वा चित् सन्निवेशन्तु महावपुषि निश्चलम्।

उपचारहृदं भोजैर्निविष्टः करपङ्कजे ॥ ५८ ॥

मन्त्रवृन्दं निवेश्यादौ प्राणायामं समाचरेत्।

दृष्ट्वोपदेशतो देवि मलव्योमसमानगः ॥ ५९ ॥

वितर्प्य विमलां मूर्त्तिं दद्यान्न च विपर्ययैः।अन्धतामिस्त्रकाद्यैश्च

नमोन्तैः प्रणवादिकैः ॥ ६० ॥

ऊर्ध्वे प्राग्दक्षिणे वामे प्रत्यक्षं क्रमशः प्रिये।

आवाहयेत् ततो मालां तदङ्गे लाञ्छिते सति व सनि ॥ ६१ ॥

कन्दर्पमार्गसंसर्गाच्चिच्चैतन्यकृतास्पदः।

हृत्सखं पूज्य संपूर्णं शान्तद्रव्यैर्मनोरमैः ॥ ६२ ॥

निबद्धककुभश्चान्ते स्थण्डिले मण्डलेऽथवा।

Sampath_eBooks

कालसङ्कर्षणीदेवीं देवीमण्डलवेष्टिताम् ॥ ६३ ॥

उपहारैर्मनोहृद्यैः पूजयेत् सुप्रसन्नधीः ।

सर्वाणुभिः क्रियापात्रं कृत्वा वा जीवपात्रकैः ॥ ६४ ॥

दिगङ्गगोपितं कृत्वा दृष्ट्या चापादिनामृतम् ।

तदायोभिः समभ्युक्ष्य द्रविणस्थानमादरात् ॥ ६५ ॥

कृत्वा भूषां परां प्रोक्तां वपुषः स्वस्य शोभितान् ।

मातरि स्वनि संपूज्य प्रणवेन विविग्रहम् ॥ ६६ ॥

शिपिविष्टे गुरुं वीरस्तेनैव परमौजसा ।शार्वं वीर्यमनन्तं तु महतोऽष्टौ

गुणास्ततः ॥ ६७ ॥

अधोर्ध्व चेदने तस्मात् क्रमादेव सितासिते ।

ततः कोकनदं शुभ्रं पद्मकिञ्जल्कशोभितम् ॥ ६८ ॥

बीजानि शक्तिवृन्दञ्चमाः सूर्यन्निधिस्ततः ।

एतत् शक्त्यासनं प्रोक्तं तदूर्ध्वे प्रेतमाददेत् ॥ ६९ ॥

अथवानन्तसत्रोर्द्धं विमलाम्भोरुहस्य वा ।

अनन्ताद्यब्जचरममनन्तासनमुच्यते ॥ ७० ॥

गात्रकर्त्रेऽपि देवेशि नान्याख्यास्य विधीयते ।

शक्तिकन्दोऽथवालम्बकण्टकाः पत्रसन्धयः ॥ ७१ ॥

पत्राण्यग्राणि किञ्जल्ककर्णिकापुष्कराणि च ।

पद्मासनमिदं प्रोक्तं विभुं वामादिकं प्रिये ॥ ७२ ॥

त्रिमण्डलवसानन्तु प्राश्यते विमलासनम्।

एवमेकतमे धाम्नि प्रेतोर्ध्वे मूर्त्तिविद्यया ॥ ७३ ॥

मूर्त्तिं दत्वा मुखैः क्रामन् शिरांसि परिकल्पयेत्।

शिखाललाटभ्रूचक्षुश्रुतिगण्डमुखेषु च ॥ ७४ ॥

ग्रीवोरोशेषहृन्नाभिस्थानेष्वेतेषु विन्यसेत्।

विमलादिविसर्गान्तैः सानुभिर्देवताक्रमात् ॥ ७५ ॥

पादयोर्गुल्फयोश्चैव जङ्घाजानू रुषस्फिजौ।

दूत्यः पादादिका देयाः पवनाद्या महेश्वरि ॥ ७६ ॥

शिखादिनाभिपर्यन्तं व्यापिन्यादिगणक्रमः।

कर्तव्यं किङ्कराणाञ्च पादशाखाकृतास्पदः ॥ ७७ ॥

तदन्तरेषु तन्वङ्गि तथा चानुचरात्मकः।

तलापृष्ठे तु दातव्या वामपादादिका गणाः ॥ ७८ ॥

अनूद्ध्वन्यग्रतो देव्या नितम्बे वाममार्ग्गगाः।

ततो मालाधरे काये दत्वाङ्गानि यथा पुरा ॥ ७९ ॥

कूटमावाहयेन्मन्त्री स्थापयेत् सन्निरोधकृत्।

आवाहनसमुच्चाराद्भूयोवर्चात्र स्थापनम् ॥ ८० ॥

कठिनक्रियानिरोधः क्रियाकाले प्रशस्यते।

स्वक्रियारचनाटोपात् सान्निध्यं च सुराम्बिके ॥ ८१ ॥

स्वाहास्वधानमोऽन्ते च पाद्याचमनमर्घणम्।

Sampath_eBooks

सामान्येन हृदा शस्तं सर्वस्मिन् मंत्रमण्डले ॥ ८२ ॥

स्रगलङ्कारवासांसि धूपस्नानानुलेपनम् ।

सर्वोपचारसंभारं कार्यं कर्म हृदा सदा ॥ ८३ ॥

ततस्तु देवता देया भोगस्थाने विपश्चिता ।

व्यापिनी सुसुधा सौधा सुसूक्ष्मा सूक्ष्मरूपिणी ॥ ८४ ॥

वीरा जगाविनी नन्दा सुसुम्णा मन्दिरोदया ।

गान्धारी भैरवी देवी ---------का प्रिये ॥ ८५ ॥

मन्त्रद्वादशकोपेते सिताब्जकरशालिनी ।

शस्त्राष्टककरा देव्यः पतिरूपवपुर्वहा ॥ ८६ ॥

मुण्डखट्वाङ्गशूलञ्च परिघं पाशमंकुशम् ।

महारावोऽथ घण्टा च सर्वासां चायुधानि च ॥ ८७ ॥

चतुर्दोष्णश्चतुर्वक्त्राः पीनोन्नतपयोधराः ।

पाशाङ्कुशधरा दूत्यो मुण्डखट्वाङ्गहस्तिकाः ॥ ८८ ॥

स्वस्वामिनि समाशेषनेपथ्यरचनाचिताम् ।

स्वदेवतादलाग्रेषु सर्वाश्चापि कृतास्पदा ॥ ८९ ॥

पवनव्योमवेगा च शशिरेखा मदनातुरा ।मन्मथा च मनोहारी विपुला विपुलेश्वरी ॥ ९० ॥

चित्रलेखा च चित्राङ्गी चित्रग्रीवा विलासिनी ।

एता दूत्यः समाख्याता आशामं ता ते प्रतिष्ठिताः ॥ ९१ ॥

Sampath_eBooks

आसां स्वरूपधारिण्यो ह्यनुदूत्यो महाबलाः ।

द्वित्रिशस्त्रयाननन्ताभ्यां एतदेव विशिष्यते ॥ ९२ ॥

वीरा विप्रा जयन्ती व कौमुदी मदिरावती ।

केकरा तन्तुवा लीला मालती विनयावती ॥ ९३ ॥

कोलाहला कराला च नामभिस्ताः प्रकाशिता ।

स्वस्वामिनि प्रसादेन्दुविकासितभृगूत्पला ॥ ९४ ॥

रमन्तीशवपुश्चन्द्रच्छाया शुभ्रमहास्पदे ।

अतोऽन्ते कोकरं वृन्दं राश्यवस्थानसंस्थया ॥ ९५ ॥

करालवदनां घोरं केकरारक्तलोचनम् ।

भृङ्गालीवलया भासमुल्लसद् स दुर्धरीधरम् ॥ ९६ ॥

कर्कशं भग्ननासञ्च सर्पालङ्कारमण्डितम् ।

यावत् तत्स्पर्शविस्तारसम्पूर्णमुखमण्डलम् ॥ ९७ ॥

रक्तासितैकवासो वा पाशाङ्कुशाङ्कुशकरं न्यसेत् ।

मरुत्पति समारभ्य अपनीयातपस्थितम् ॥ ९८ ॥

हालाहलोऽभ्रमातङ्गः करालो वडवामुखः ।

पिङ्गलः पिङ्गकेशश्च वल्कलः केकरेक्षणः ॥ ९९ ॥

हालाहलो बिडालश्च हिडिम्बो विकृताननः ।

द्वादशैते महावीर्याः किङ्कराः परिकीर्त्तिताः ॥ १०० ॥

एतद्रूपधरा घोराः किन्तु कुब्जा नरा इव ।

Sampath_eBooks

महानासा विशालाक्षा लम्बोच्चालं वकुक्षयः ॥ १०१ ॥

न्यस्तव्या बाह्यतो देवि कपालकनकोद्यताः ।

धूर्नासस्त्रिशिराः कङ्को लंबोष्ठो गुदलोचनः ॥ १०२ ॥

उरोमुखोऽहृजिह्वें गुदवक्रोऽलकाननः ।

नवशीर्षस्त्रिशीर्षश्च त्रिपाणिर्द्वादशो मतः ॥ १०३ ॥

तदन्ते तु गणाः पूज्या गजवक्त्रा महाबलाः ।

कुठारालकराः कृष्णास्त्वंगाकुम्भास्त्रिस्त्रिचक्षुषः ॥ १०४ ॥

लम्बोदरो दुराधर्षो महाकालो महोदरः ।

चक्रश्चण्डैकदन्तश्च महाकायदुरोदरौ ॥ १०५ ॥

एते चाष्टौ गणाः प्रोक्ता विन्यसेद् रोधवर्त्मना ।

मरुत्मतो हरान्तन्तु प्रणवादिनमस्कृताः ॥ १०६ ॥

तदन्ते पूजयेद् राजन् लोकपालान् स्वदिग्गतां ।

कौशिकं स्त्रक्कलंकालं पलाशं मकरध्वजम् ॥ १०७ ॥

धीरं गदाधरं वीरं मुञ्जकेशं पितामहम् ।मतङ्गह्हडशृङ्गेषु

खरयानप्रतिष्ठितान् ॥ १०८ ॥

मकारेण नवानद्धगरुत्मद् धृतराष्ट्रगान् ।

हेमेन्द्रभोगमधुपपारावतहिमात्मकान् ॥ १०९ ॥

जम्बालमौक्तिकाम्भोजनीलोत्पलशवात्विषः ।

लोकपालाः क्रमादेते स्वास्त्रयुक्ताः क्रियावहाः ॥ ११० ॥

तदस्त्रावरणो न्यासः कर्तव्यस्तद्विरागमः ।

दुरापं शक्तिदण्डञ्च कृपाणसुरगायुधम् ॥ १११ ॥

वैजयन्तीं शत्रिहणं व ख चद्रूघणं त्रिशूलमणिमम्बुजम् ।

बालभास्वन्मयूखाभं संस्मरेद् हेतिमण्डलम् ॥ ११२ ॥

स्वचित्स्वरूपगं भीमं विघ्नमेघप्रभञ्जनम् ।

हरो हरान्तिकं न्यस्य गन्धैः पुष्पैः प्रपूजयेत् ॥ ११३ ॥

सनातनादि सर्वेषां धूपं दग्ध्वा पुनः पुनः ।

हेमादि जाज्वलं मन्त्री दीपैरुद्बोध्य सर्पिषा ॥ ११४ ॥

हविष्यैरहविष्यैश्च नैवेद्यैरच्युतादिकम् ।

समन्त्रैः प्रोक्षयेत् क्रामन् प्रीयेचन्द्रमण्डलम् ॥ ११५ ॥

मुद्रासंदर्शनादेतच्चिराचमनकर्मणि ।

निर्णीति दन्त ताम्बूलः सप्रणामो बहिर्गणम् ॥ ११६ ॥

क्षेत्राणां पूर्वतः पूज्यं नीलग्रीवावसानकम् ।

कोलाहलं करालञ्च यमदण्डं महाभिषम् ॥ ११७ ॥

क्रव्यादं चण्डवेतालं भीमभैरवमेव च ।

मन्थरं तुरगेशञ्च श्मशान दशकं प्रिये ॥ ११८ ॥

क्षेत्रपालैः समोपेतं घोराकारं सुदारुणम् ।

रक्षोभूतगणाकीर्णं योगिनीगणसङ्कुलम् ॥ ११९ ॥

नामानि यानि क्षेत्राणां तानि पुंपाठयोगतः ।

संज्ञाविधायकानि स्युः फलानां स्वच्चगोचरे ॥ १२० ॥

जलप्लवानुमानेन स्वस्वविषयगेन तु ।

क्षेत्रपालानुमीयन्ते तन्त्रेस्मिन् रावणार्चिते ॥ १२१ ॥

दम्पत्यानि तदन्ते तु दिक्पालानां प्रपूजयेत् ।

एभ्यश्चैव वलिर्देयः स्थानं स्याच्चैकदेशतः ॥ १२२ ॥

बलिमाहारमेतेषां सदैव पितृकर्मणि ।

तस्करादिषु निर्विघ्नः सुसुखं तत्र तिष्ठति ॥ १२३ ॥

महाजङ्घो विकारी च धूम्रजीह्वो महोदरः ।

प्राच्यं सर्वं प्रतीच्यञ्च तथोदीच्यं क्रमा स्थिताः ॥ १२४ ॥

पिङ्गुह्या महावक्त्रा गुदवक्त्रा च पूतना ।

वह्निस्त्र्यम्बवकान्तन्तु तेषां भार्याःप्रपूजयेत् ॥ १२५ ॥

तत्वमूलविसर्गान्तैर्नामभिः क्षेत्रपालकाः ।

बलिमन्त्रावसानस्तु गणशः स्तोत्रशासने ॥ १२६ ॥

शिवाज्ञातो नमस्कारो द्वन्द्वरूपामिमां प्रिये ।

जपोपचारे मन्त्राणां मध्यच्चिन्नं प्रयोजयेत् ॥ १२७

अष्टावरणिकं ह्येतच्चिवद्रव्यैः शिवात्मनः ।

यष्टव्यं साधकेन्द्रेण गृहे तु गृहिणा सदा ॥ १२८ ॥

वृतभीमव्रतैर्धीरैर्वीरद्रव्यैः सपुष्कलैः ।

सुसहायेन गिर्यग्रे श्मशानेऽथ चतुष्पथे ॥ १२९ ॥

एकलिङ्गैकवृक्षे वा जने धाम्नि सुरालये

यष्टव्यो भैरवो योगो भैरवाचारवर्तिना ॥ १३० ॥

गर्भाद्धरणिकंपान्ते मयैकावरणक्रमात् ।

मालामण्डलमेतद्धि फलमेकाकृतिं भजेत् ॥ १३१ ॥

अथोक्तक्रमयोगेन स्यादेतन्मंत्रमण्डलम् ।

यामलं यमलान्यासाल्लयभोगेषु सुन्दरि ॥ १३२ ॥

शिवादिपदमाला च मालाङ्गप्रविजृम्भिता ।

त्रिरूपस्यापि मन्तृत्वे नवकास्य क्रियावहा ॥ १३३ ॥

वाचो ये केचिदाप्तेऽस्मिन् रूपिणो धनसंस्थिताः ।

एकाद्यनन्तपर्यन्ताः साधका जातिलालसाः ॥ १३४ ॥

मालामूलप्रयोगेन जातिर्भिर्वाङ्गकल्पिताः ।

स्वकाण्डदाप्रयत्नेन तत् स्याद्भक्त विधानतः ॥ १३५ ॥

अथ किंवहुनोक्तेन ध्रुवाक्षरमनिर्मितम् ।

स्वचित्तरुचिते वाक्ये वाचकत्वे निरोधकम् ॥ १३६ ॥

वक्रादिकल्पना येयमुक्तासीत्तत्र निश्चयः ।

न कर्त्तव्यो हृदाह्लादो यदि न स्यात् स्वचेतसे ॥ मुद्रावर्णकरूपाणां

भावानां चानुसंततौ ।

नैकरूपो हि नियमो यतस्ते विश्वरूपिणः ॥ १३८ ॥

स्फटिकोपमसंस्थानां सर्व एते शिवाणवः ।

Sampath_eBooks

यदुपाधिवशं प्राप्तास्तद्रागाच्चतुरो मताः ॥ १३९ ॥

एवमेकतमे यष्टे ज्ञप्ते चैवमिवोदिते ।

प्रागुक्ताग्निगृहे कार्यमग्निकार्यं विपश्चिताः ॥ १४० ॥

तत्वधवलारुणां वा विचित्रैर्वर्णकैर्नवैः ।

योगीपुत्रपुटव्याप्तं सितसूत्रां सितामिव ॥ १४१ ॥

हेतिशुद्धं हृदा शोध्य पयःसत्कुशयोगतः ।

तदन्तर्विष्टरं दत्वा कृत्वा दिक्षु चतुष्पथम् ॥ १४२ ॥

तेजोनिधिं समानीय धातुजैर्मृन्मयेन वा ।

पात्रेणानुपयुक्तेन ताड्याघ्यार्ध्वास्त्रियोगतः ॥ १४३ ॥

हेत्यङ्गपाशितं कृत्वा प्रक्षिपेन्मूलविद्यया ।

पुञ्जिते ज्वलिते मूर्त्या ज्वालया सन्निधीकृते ॥ १४४ ॥

हृदाहुतित्रयं कृत्वा मालापूर्णप्रपातनात् ।

लोके शास्त्रगतः पूज्यो मूलमेखलमूर्ध्वगः ॥ १४५ ॥

अर्घ्यशक्तिक्रियाहृष्टवह्निसंहारमुद्रया ।

हृदा पूरकयोगेन स्ववक्राभ्यसनक्रमम् ॥ १४६ ॥

मृतकं तं विहत्याशु मूर्तिरूपं विभावसुम् ।

दत्वा पूर्वक्रियाः कार्याः समला धरणान्तिकाः ॥ १४७ ॥

प्रागानीतस्य वह्नेर्वा क्रम एषः प्रशस्यते ।

किमत्राहुतिदानेन कर्मविस्तरकारणात् ॥ १४८ ॥

सहस्त्रं तद्दशं वाथ शतमर्धमथापि वा ।

ध्रुवात्रपाश्रितेभ्यश्च शतभागे हुते सति ॥ १४९ ॥

वौषडन्ताम्बिका योगपूर्णा पातक्रियावहा ।तिलामृतादिभिर्देवि होमद्रव्यैः

सुगन्धिभिः ॥ १५० ॥

ततो विसर्जयेन्मालां स्थानद्वयनिवासिनीम् ।

सत्वधृत्तिसमायुक्तासूपचारं हृदा प्रिये ॥ १५१ ॥

निर्माल्यापनयं कृत्वा दत्वाज्ञावर्तिकात्रयम् ।

तत्र यद्दानदुष्टन्तु तत्सर्वं प्रक्षिपेदम्भसि ॥ १५२ ॥

नो वा विसर्जिते वह्नौ शेषगर्भा प्रशस्यते ।

एषोक्तिर्यत् व ख एवोक्तिर्य क्रियामार्गात्कृताप्तज्येष्ठसन्ततिः ॥ १५३ ॥

शस्त्रदेवेन किं योगं समाप्नोत्यभिवाञ्छितम् ।

सकलहविविधिर्न वेत्ति सम्यङ्विविधविधिं शिवाप्तदृष्टाम् ॥ १५४ ॥

जगति गुणकृते करोति योऽर्चां ।

कथमबुधमतिः सुखं स लेभे ॥ १५५ ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां पञ्चदशः पटलः ॥

१५ ॥

षोडशः पटलः ॥

जयद्रथ उवाच ।